### नवमी कक्षा

# आमोदः

## सम्पूर्ण–संस्कृतम्




महाराष्ट्रराज्य-पाठ्यपुस्तक-निर्मितिः तथा अभ्यासक्रम-संशोधन-मण्डलम्, पुणे-४

नवमी कक्षा

# सम्पूर्ण-संस्कृतम्

# आमोदः

(मराठी, गुजराती, हिन्दी, इंग्रजी इत्यादीनां माध्यमानां कृते)




समीपे विद्यमानं क्यू. आर. चिह्नं (Q.R.code) स्मार्टफोनद्वारा 'स्कॅन' कर्तुं शक्यते । 'स्कॅन' कृत्वा पाठ्यपुस्तकस्य अध्ययनाय/अध्यापनाय उपयुक्तम् अधिकं साहित्यं (URL) प्राप्यते ।


अभ्यास-२११६/(प्र.क्र.४३/१६) एसडी-४ दिनाङ्कः-२५.४.२०१६ इत्यमुं शासननिर्णयक्रमाङ्कम् अनुसृत्य स्थापितायाः समन्वयसमित्याः उपवेशने ३.३.२०१७ दिने इदं पुस्तकम् अनुमानितम् ।

**प्रथमावृत्तिः** : २०१७

© महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलम्, पुणे - ४११ ००४.
अस्य पुस्तकस्य सर्वे अधिकाराः महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलस्य सन्ति। महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलस्य सञ्चालकस्य लिखित-अनुमतिं विना अस्य पुस्तकस्य कमपि भागम् उद्धृतं कर्तुं न शक्यते।

**संस्कृतभाषातज्ज्ञसमितिः**

पं. गुलाम दस्तगीर बिरासदार (अध्यक्षः)
श्रीमती तरङ्गिणी खोत
डॉ. माधव केळकर
डॉ. माधव भुस्कुटे
डॉ. प्रज्ञा देशपाण्डे
श्रीमती सविता वायळ (सदस्य-सचिव)

**संस्कृतभाषाभ्यासगणसदस्याः**

डॉ. माधवी जोशी
डॉ. प्रसाद भिडे
डॉ. प्रसाद कुलकर्णी
श्री. जगदीश इन्दलकर
श्रीमती अदिती माधवन्
श्रीमती विज्ञापना गोकर्णकर
श्रीमती ऋचा वैद्य
श्रीमती काञ्चन जोशी
श्रीमती शेवन्ती दाङ्गट
डॉ. माधवी नरसाळे
श्रीमती स्वाती जाधव
श्रीमती अर्चना जोशी

**संयोजनम्** :
श्रीमती सविता अनिल वायळ
विशेषाधिकारी, मराठी

**चित्रकारौ** :
फारुख नदाफ, यशवन्त देशमुख

**मुखपृष्ठम्** :
यशवन्त देशमुख

**अक्षरयोजनम्** :
भाषाविभागः
पाठ्यपुस्तकमण्डलम्, पुणे.

**निर्मितिः** :
सच्चिदानन्द आफळे,
मुख्यनिर्मिति-अधिकारी
राजेन्द्र चिन्दरकर,
निर्मिति-अधिकारी

**कागदम्** :
70 GSM Creamwove

**मुद्रणादेशः** :
N/PB/2017-18/1.00

**मुद्रकः** :
M/S. RUNA GRAPHICS, PUNE

**प्रकाशकः**
विवेक उत्तम गोसावी

**नियन्त्रकः**
पाठ्यपुस्तकनिर्मितिमण्डलम्,
प्रभादेवी, मुम्बई - २५.

## प्रस्तावना

आत्मीयाः छात्राः,

अष्टमी-कक्षायां संस्कृतभाषायाः सुष्ठु परिचयः जातः स्यात् युष्माकम्। के नित्यप्रयुक्ताः शब्दाः, कथं शब्दानां परस्परसम्बन्धः, कीदृशं वर्णानाम् उच्चारणं, कीदृशी वाक्यरचना च इति विषये स्पष्टता स्यात्। एतैः एव भाषासाधनैः अधुना साहित्यपरिचयः अपि प्राप्तव्यः। संस्कृते के कवयः, कानि नाटकानि, के प्रमुखाः ग्रन्थाः च इति विषये शनैः शनैः ज्ञायते अस्मिन् वर्षे।

भाषासूत्रेषु नूतनशब्दानां, लकाराणां विविधव्याकरणबिन्दूनां च ज्ञापनं भवति। अहो! व्याकरणनिबद्धता संस्कृतभाषायाः इत्यपि कदाचित् उद्वेगः भवेत्। किं विना व्याकरणं भाषाध्ययनं न शक्यते? आम् शक्यते। अस्मिन् पुस्तके 'रम्यसंस्कृतम्' इति विशेषपाठमालिकाद्वारा भाषायाः प्रत्यक्षप्रयोगः, 'भाषासूत्र'द्वारा भाषासिद्धान्तः च इत्यनयोः मिश्ररीतिः अस्माभिः आश्रिता।

सर्वदा स्मरत-

अव्याकरणमधीतं भिन्नद्रोण्या तरङ्गिणीतरणम्।
भेषजमपथ्यसहितं त्रयमिदमकृतं वरं न कृतम्॥

अवगमनेन विना पठितं रटितं च विस्मृतं भवति, अवगत्य अभ्यासेन प्रयुक्तं सर्वदा एव स्मरणे तिष्ठति।

शब्दसम्पदः विना, भाषानियमानां ज्ञानेन विना नूतनभाषाध्ययनम् अपूर्णम्। श्रवणं-भाषणं-पठनं-लेखनम् इति भाषासोपानानि क्रमशः आरोहत।

अनेन पुस्तकमाध्यमेन वेदाः, उपनिषदः, महाकाव्यानि, पञ्चतन्त्रं, सुभाषितानि च इति संस्कृतग्रन्थसम्पद् युष्माकं पुरतः उपस्थापिता। अस्यां चिरनूतनायां संस्कृतसाहित्यसृष्ट्याम् **आमोदेन** रमध्वम्।

(डॉ. सुनिल मगर)
सञ्चालकः
महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा
अभ्यासक्रमसंशोधनमण्डलम्, पुणे.

पुणे
दिनाङ्कः - २८ एप्रिल, २०१७, अक्षय्यतृतीया
भारतीय सौर : ८ वैशाख १९३९

# भारतस्य संविधानम्

## प्रस्तावना

वयं, भारतस्य जनाः, भारतं सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादिनं, सम्प्रदायनिरपेक्षं, लोकतन्त्रात्मकं गणराज्यं विधातुं, तस्य समस्तान् नागरिकांश्च

सामाजिकम्, आर्थिकं, राजनीतिकं च न्यायं,
विचारस्य, अभिव्यक्तेः, आस्थायाः, धर्मस्य,
उपासनायाश्च स्वतन्त्रतां,
प्रतिष्ठायाः, अवसरस्य च समतां प्रापयितुं;
तेषु सर्वेषु च
व्यक्तिगौरवस्य राष्ट्रस्य एकतायाः,
अखण्डतायाश्च सुनिश्चायिकां बन्धुतां
वर्धयितुं;

कृतदृढसङ्कल्पाः अस्याम् अस्मदीयायां संविधानसभायाम्

अद्य, ख्रिस्तीये १९४९ तमे वर्षे नवम्बरमासस्य २६-तमे दिने (२००६-तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ) एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्, आत्मार्पितं च कुर्महे ।

## राष्ट्रगीतम्

जनगणमन–अधिनायक जय हे
भारत–भाग्यविधाता ।
पंजाब, सिंधु, गुजरात, मराठा,
द्राविड, उत्कल, बंग,
विंध्य, हिमाचल, यमुना, गंगा,
उच्छल जलधितरंग,
तव शुभ नामे जागे, तव शुभ आशिस मागे,
गाहे तव जयगाथा,
जनगण मंगलदायक जय हे,
भारत–भाग्यविधाता ।
जय हे, जय हे, जय हे,
जय जय जय जय हे ।।

## प्रतिज्ञा

भारतो मम देशोऽयं भारतीयाश्च बान्धवाः ।
परानुरक्तिरस्मिन् मे देशेऽस्ति मम सर्वदा ।।१।।

समृद्धा विविधाश्चास्य या देशस्य परम्पराः ।
सन्ति ताः प्रति मे नित्यमभिमानोन्नतं शिरः ।।२।।

प्रयतिष्ये सदा चाहमासादयितुमर्हताम् ।
येन तासां भविष्यामि श्रद्धायुक्तः पदानुगः ।।३।।

संमानयेयं पितरौ वयोज्येष्ठान् गुरूंस्तथा ।
सौजन्येनैव वर्तेय तथा सर्वैरहं सदा ।।४।।

स्वकीयेन हि देशेन स्वदेशीयैश्च बान्धवैः ।
एकान्तनिष्ठमाचारं प्रतिजाने हि सर्वथा ।।५।।

एतेषामेव कल्याणे समुत्कर्षे तथैव च ।
नूनं विनिहितं सर्वं सौख्यमात्यन्तिकं मम ।।६।।

# संस्कृतम् ।

**नवमीकक्षाच्छात्राणां संस्कृतभाषाविषये अधोलिखितानां क्षमतानां विकासः भवेत् इति अपेक्षा वर्तते ।**

| क्षेत्रम् | क्षमताविधानानि |
|---|---|
| **श्रवणम्** | १. आकाशवाण्या तथा दूरचित्रवाण्या प्रसारितस्य संस्कृतवार्तापत्रस्य श्रवणम् ।<br>२. शिक्षकेण संस्कृतमाध्यमेन प्रदत्तानां दैनन्दिनसूचनानां श्रवणम् अवगमनं च ।<br>३. पाठम् अनुसृत्य याः रचनात्मककृतीः शिक्षकः संस्कृतमाध्यमेन सूचयति, तासां श्रवणम् अवगमनं च ।<br>४. संस्कृते पद्यस्य छन्दोबद्धता, वृत्तानि एतेषां श्रवणेन अधिकः अभ्यासः । |
| **भाषणम्** | १. संस्कृतस्य उच्चारणवैशिष्ट्यानां सम्भाषणमाध्यमेन अधिकः अभ्यासः ।<br>२. शिक्षकेण पृष्टानां प्रश्नानां संस्कृतमाध्यमेन सविस्तरं प्रत्युत्तराणि ।<br>३. मित्रैः सह संस्कृतमाध्यमेन संवादः ।<br>४. वर्तमानविषयेषु संस्कृतमाध्यमेन किञ्चित् मतप्रदर्शनम् । |
| **पठनम्** | १. अपठितसंस्कृतपाठ्यस्य अर्थपूर्णं वाचनम् ।<br>२. वेद-महाकाव्य-नाटकादिसाहित्येषु विद्यमानाः याः सूक्तयः व्यवहारे प्रचलिताः, तासां पठनम् ।<br>३. संस्कृतस्तोत्राणां यथायोग्यं पठनम् । |
| **लेखनम्** | १. दोषविरहितं श्रुतलेखनम् ।<br>२. लेखननियमान् अनुसृत्य परिच्छेदलेखनम् ।<br>३. संवादपूर्तिः ।<br>४. कृतीनां संक्षेपेण विवेचनम् । |
| **अध्ययनम्** | १. संस्कृतशब्दकोषस्य नियतोपयोगः शब्दसङ्ग्रहे अभिवृद्धिः च ।<br>२. समस्यापूर्ति-प्रहेलिका-आदीनां काव्यप्रकाराणां रसास्वादनम् ।<br>३. भाषिकक्रीडानाम् आनन्दानुभूतिः ।<br>४. गद्यपद्यानुवादस्य स्वाध्यायः ।<br>५. स्वानुभूतप्रसङ्गस्य चित्रस्य वा संस्कृतमाध्यमेन वर्णनम् ।<br>६. शास्त्रग्रन्थानां विषये जिज्ञासायाः वृद्धिः ।<br>७. अमरकोषस्य अधिकम् अध्ययनम् । |
| **भाषाभ्यासः** | १. संस्कृतशब्दजालस्य पूर्तिः ।<br>२. व्यवहारे संस्कृतमाध्यमेन सरलसम्भाषणं लकाराणाम् उचितः प्रयोगः च । (आज्ञार्थः विध्यर्थः च ।)<br>३. अव्ययानां वाक्येषु उचितः प्रयोगः ।<br>४. सन्धिविग्रहं सन्धिं च कृत्वा पाठ्यवाचनम् ।<br>५. समासानां सन्दर्भम् अनुसृत्य विग्रहः ।<br>६. एकतः शतपर्यन्तं (१-१००) सङ्ख्यानां ज्ञानम् । |

**पाठ्यपुस्तकस्य अपेक्षितपरिणामार्थं सर्वासां क्षमतानां सुयोग्यविकासार्थं प्रतिसप्ताहं षट् (६) तासिकाः अपेक्षिताः ।**

# किम् अस्ति पुस्तके ?

## रम्यसंस्कृतम् ।


१. किं कृत्वा ? किं कर्तुम् ? ...७
२. वर्णानां साहचर्यम् । ...१४
३. किं करवाणि ? ...१७
४. किं कुर्यात् ? किं भवेत् ? ...३२
५. क्रियापदं किं कथयति ?–१ ..३५
६. कः कृतवान् ? का कृतवती ? ..३८
७. उपपदविभक्तयः ...४३
८. सङ्ख्याविशेषणानि–१ ...५४
९. सङ्ख्याविशेषणानि–२ ...५९
१०. क्रियापदं किं कथयति ?–२ ..६२
११. केन कृतम् ? ...८०
१२. विशेषणम् । ... ८६


## प्रथमं सत्रम् ।


१. सुष्ठु गृहीतः चौरः । (गद्यम्) ...५
२.अव्ययमाला । (पद्यम्) ...११
३.धन्यौ तौ दातृयाचकौ । (गद्यम्) ..१५
४. विध्यर्थमाला । (पद्यम्) ...३३
५. किं मिथ्या ? किं वास्तवम् ? (संवादः) ..३६
६. वीरवनिता विश्पला । (गद्यम्) ..४०
७. योगमाला । (पद्यम्) ...४४
८. पिन्कोड्प्रवर्तकः महान् संस्कृतज्ञः । (गद्यम्) ...४६
• लेखनकौशलम्–१ । ...९९
• लेखनकौशलम्–२ । ...४८


## सुगमसंस्कृतम् ।


१. सङ्ख्याः ।
२. चित्रपदकोषः । ... १
३. समयः । ...३१



• अमरकोषः ।..९५
• शब्दकोषः ।..९६



• परीक्षाप्रारूपम् ।९८
• कृतिपत्रिका । १००


## द्वितीयं सत्रम् ।


९. सूक्तिसुधा । (पद्यम्) ...५६
१०. पितृभक्तः नचिकेताः । (गद्यम्) ... ६०
११. मनसः स्वच्छता । (गद्यम्) ...६३
१२. अमरकोषः । (संवादः) ...६५
१३. सरमायाः शीलम् । (पद्यम्) .. ६७
१४. काव्यशास्त्रविनोदः ।(पद्यम्) ..८१
१५. मनोराज्यस्य फलम् । (गद्यम्) ८४
१६. स्वागतं तपोधनायाः ।(संवादः) ८८
• लेखनकौशलम्–३ । ...६९


## भाषासूत्रम् ।


१.अ) नामानि । आ) सर्वनामानि । इ) धातुसाधित–अव्ययानि । ई) लोट्लकारः । .२१
२. अ) विधिलिङ्लकारः । आ) समासाः । ...४९
३. अ) नामानि । आ) सर्वनामानि । इ) क्रियापदानि । (धातूनां द्वितीयः समूहः) ई) कर्मवाच्यं क्रियापदम् । उ) विभक्तितत्पुरुषसमासः । ७०
४.अ) लृट्लकारः । आ) कर्मधारयसमासः । इ) भूत.–धातु.–विशेषणानि । ...९०

## प्रार्थना । (केवलं कण्ठस्थीकरणार्थम्)

**अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।**
**सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥१॥**

**या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता**
**या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।**
**या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता**
**सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥२॥**

**अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।**
**चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥३॥**

**काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।**
**देशोऽयं क्षोभरहितः सज्जनाः सन्तुनिर्भयाः ॥४॥**

**सर्वेऽत्र सुखिनः सन्तु सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखमाप्नुयात् ॥५॥**



**शिक्षकेण अवधातव्याः अंशाः ।**

अष्टम्यां कक्षायां भाषायाः सुष्ठु परिचयः जातः । अतः यावच्छक्यं संस्कृतस्य संस्कृतमाध्यमेनैव पाठनं भवतु । कक्षायां संस्कृतवातावरणं भवेत् । नूतनशब्दानां परिचयार्थम् अनुवादस्य अपेक्षया वस्तु/कृतिं दर्शयित्वा अभिनयद्वारा पाठनं भवेत् । 'रम्यसंस्कृतम्/सुगमसंस्कृतम्' एतयोः माध्यमेन विषयप्रवेशः भवेत्। 'भाषासूत्रस्य' माध्यमेन नियमज्ञानं भवेत् । **उपस्थापनम्, अभ्यासः प्रयोगः** च इति त्रिसूत्री अध्यापने आश्रयणीया । पाठभिन्नाः नैके पूरकाः मनोरञ्जकाः अंशाः पुस्तके योजिताः, यथा- पठत-बोधत, हसत-नन्दत, गीतानि, रसप्रश्नाः इत्यादयः । ते भाषाविकासार्थम् आवश्यकाः। भाषाभ्यासे दत्ताः कृतयः पाठस्य आकलनार्थम् आवश्यकाः । परीक्षानिमित्तं प्रारूपानुसारम् अपेक्षिताः प्रश्नाः शिक्षकैः स्वयं रचनीयाः ।

# सुगमसंस्कृतम्। सङ्ख्याः।

| | | | | |
|---|---|---|---|---|
| १. एकम् | २१. एकविंशतिः | ४१. एकचत्वारिंशत् | ६१. एकषष्टिः | ८१. एकाशीतिः |
| २. द्वे | २२. द्वाविंशतिः | ४२. द्विचत्वारिंशत् | ६२. द्विषष्टिः | ८२. द्व्यशीतिः |
| ३. त्रीणि | २३. त्रयोविंशतिः | ४३. त्रिचत्वारिंशत् | ६३. त्रिषष्टिः | ८३. त्र्यशीतिः |
| ४. चत्वारि | २४. चतुर्विंशतिः | ४४. चतुश्चत्वारिंशत् | ६४. चतुःषष्टिः | ८४. चतुरशीतिः |
| ५. पञ्च | २५. पञ्चविंशतिः | ४५. पञ्चचत्वारिंशत् | ६५. पञ्चषष्टिः | ८५. पञ्चाशीतिः |
| ६. षट् | २६. षड्विंशतिः | ४६. षट्चत्वारिंशत् | ६६. षट्षष्टिः | ८६. षडशीतिः |
| ७. सप्त | २७. सप्तविंशतिः | ४७. सप्तचत्वारिंशत् | ६७. सप्तषष्टिः | ८७. सप्ताशीतिः |
| ८. अष्ट | २८. अष्टाविंशतिः | ४८. अष्टचत्वारिंशत् | ६८. अष्टषष्टिः | ८८. अष्टाशीतिः |
| ९. नव | २९. नवविंशतिः | ४९. नवचत्वारिंशत् | ६९. नवषष्टिः | ८९. नवाशीतिः |
| | (एकोनत्रिंशत्) | (एकोनपञ्चाशत्) | (एकोनसप्ततिः) | (एकोननवतिः) |
| १०. दश | ३०. त्रिंशत् | ५०. पञ्चाशत् | ७०. सप्ततिः | ९०. नवतिः |
| ११. एकादश | ३१. एकत्रिंशत् | ५१. एकपञ्चाशत् | ७१. एकसप्ततिः | ९१. एकनवतिः |
| १२. द्वादश | ३२. द्वात्रिंशत् | ५२. द्विपञ्चाशत् | ७२. द्विसप्ततिः | ९२. द्विनवतिः |
| १३. त्रयोदश | ३३. त्रयस्त्रिंशत् | ५३. त्रिपञ्चाशत् | ७३. त्रिसप्ततिः | ९३. त्रिनवतिः |
| १४. चतुर्दश | ३४. चतुस्त्रिंशत् | ५४. चतुष्पञ्चाशत् | ७४. चतुस्सप्ततिः | ९४. चतुर्नवतिः |
| १५. पञ्चदश | ३५. पञ्चत्रिंशत् | ५५. पञ्चपञ्चाशत् | ७५. पञ्चसप्ततिः | ९५. पञ्चनवतिः |
| १६. षोडश | ३६. षट्त्रिंशत् | ५६. षट्पञ्चाशत् | ७६. षट्सप्ततिः | ९६. षण्णवतिः |
| १७. सप्तदश | ३७. सप्तत्रिंशत् | ५७. सप्तपञ्चाशत् | ७७. सप्तसप्ततिः | ९७. सप्तनवतिः |
| १८. अष्टादश | ३८. अष्टात्रिंशत् | ५८. अष्टपञ्चाशत् | ७८. अष्टसप्ततिः | ९८. अष्टनवतिः |
| १९. नवदश | ३९. नवत्रिंशत् | ५९. नवपञ्चाशत् | ७९. नवसप्ततिः | ९९. नवनवतिः |
| (एकोनविंशतिः) | (एकोनचत्वारिंशत्) | (एकोनषष्टिः) | (एकोनाशीतिः) | (एकोनशतम्) |
| २०. विंशतिः | ४०. चत्वारिंशत् | ६०. षष्टिः | ८०. अशीतिः | १००. शतम् |

**१००० – सहस्रम्, १०,००० – अयुतम्, १, ००,००० – लक्षम्, १०,००,००० नियुतम्, १,००,००,००० – कोटिः**

**एकं दश शतं चैव सहस्रमयुतं तथा। लक्षं च नियुतं चैव कोटिरर्बुदमेव च॥**
**वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः। अन्त्यं मध्यं परार्धं च दशवृद्ध्या यथाक्रमम्॥**

**क्रीडा – सङ्ख्यान्वेषणम्।**


समीपे विद्यमाने चतुष्कोणे एकतः शतपर्यन्तं सङ्ख्याः लिखिताः सन्ति। एकः गणः सङ्ख्यां वदति। अपरः गणः चतुष्कोणे विद्यमानां सङ्ख्याम् अन्विष्यति।

यथा – एकादश

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| ५ | १०० | ३७ | ९७ | १४ | ४३ | ३० | ६६ | ८१ | २३ |
| ८२ | ४१ | ९६ | ६५ | ३१ | ६० | ७१ | ८७ | ३ | ५९ |
| ९९ | ८० | ९ | ४२ | ७२ | ६४ | १२ | ३२ | ८ | ४८ |
| ३८ | ७४ | १६ | ३५ | ५१ | १५ | ९८ | ३६ | ६३ | ५८ |
| ६ | २४ | ६७ | १ | ७३ | २५ | ४६ | २० | ३३ | १० |
| ७५ | ४४ | ५२ | ३४ | २१ | ६२ | ८८ | ४७ | ८३ | ४० |
| ९१ | २६ | ११ | ८४ | ६१ | ५० | २२ | ७६ | ४ | ५७ |
| १७ | ८५ | ५३ | ८९ | २७ | ७८ | २ | ९३ | ७० | २८ |
| ३९ | ९२ | ७ | ९५ | ७९ | ५५ | ४५ | ५६ | १३ | ८६ |
| २९ | ५४ | ६८ | ४९ | १८ | ९४ | १९ | ६९ | ९० | ७७ |



द्वारम्


रङ्गवल्ली


पादकटः



प्रधानकक्षः



जवनिका


पर्यङ्कः


तल्पः


उपधानम्


आच्छादकम्



समीकरः



क्षालनयन्त्रम्


पुष्पाधानी


पाकशाला


भोजनपीठम्


वायुचुल्लिः


पात्रम्


दर्वी


मिश्रकः


स्थालिका


कटाहः

# वृत्तयः ।


दन्तवैद्यः


परिचारिका


वैमानिकः


अन्तरालवीरः


वैज्ञानिकः


आरक्षकः


तक्षकः


कुम्भकारः


भारवाहः


धीवरः


आपणिकः


सौचिकः


तन्तुवायः


अभियन्ता


पत्रवाहकः


यानचालिका



मालाकारः


लेपकारः


शिक्षकः


पाचकः

# क्रियाः ।



जृम्भते



कासते



जिघ्रति



शृणोति



कृषति



निष्कासयति



मथति/मथ्नाति



भिनत्ति



प्रक्षालयति



निष्पीडयति



पुटीकरोति




सीव्यति



अभिनयति



आलिखति




दर्शयति



खनति



अवसर्पति



उत्प्लवते



लङ्घते



टङ्कयति

## पुन:स्मारणम्।

● पञ्चदश वाक्यानि।

| | | लट् (वर्तमानकाल:) | | लङ् (भूतकाल:) | |
|---|---|---|---|---|---|
| | | परस्मैपदम् | आत्मनेपदम् | परस्मैपदम् | आत्मनेपदम् |
| प्रथम: पुरुष: | स: पुरुष: / सा कन्या / तद् अपत्यं | गच्छति | रमते | अगच्छत् | अरमत |
| | तौ पुरुषौ / ते कन्ये / ते अपत्ये | गच्छत: | रमेते | अगच्छताम् | अरमेताम् |
| | ते पुरुषा: / ता: कन्या: / तानि अपत्यानि | गच्छन्ति | रमन्ते | अगच्छन् | अरमन्त |
| मध्यम: पुरुष: | त्वं | गच्छसि | रमसे | अगच्छ: | अरमथा: |
| | युवां | गच्छथ: | रमेथे | अगच्छतम् | अरमेथाम् |
| | यूयं | गच्छथ | रमध्वे | अगच्छत | अरमध्वम् |
| उत्तम: पुरुष: | अहं | गच्छामि | रमे | अगच्छम् | अरमे |
| | आवां | गच्छाव: | रमावहे | अगच्छाव | अरमावहि |
| | वयं | गच्छाम: | रमामहे | अगच्छाम | अरमामहि |

● स्मरत कारकाणि।

| कारकाणि | विभक्तय: | उदाहरणानि |
|---|---|---|
| १. कर्ता | प्रथमा | **आशुतोष:** गायति। ________ (बाल) लिखति।<br>**रसिका** खादति। ________ (रीमा) वदति।<br>**यानं** चलति। ________ (पर्ण) पतति। |
| २. कर्म | द्वितीया | सुधांशु: **मेघं** पश्यति। राजा ________ (सेवक) आह्वयति। |
| ३. करणम् | तृतीया | अहं **मुखेन** वदामि। रक्षक: ________(दण्ड) ताडयति। |
| ४. सम्प्रदानम् | चतुर्थी | माता **पुत्राय** भोजनं परिवेषयति।<br>धनिक: ________ (याचक) धनं ददाति। |
| ५. अपादानम् | पञ्चमी | **स्यूतात्** वस्त्रं पतति। ________ (वृक्ष) फलं पतति।<br>________ (आकाश) तोयं पतति। |
| ६. अधिकरणम् | सप्तमी | छात्रा: **वर्गे** उपविशन्ति। खगा: ________ (वृक्ष) कूजन्ति।<br>मत्स्या: ________ (नदी) तरन्ति। |

✻ षष्ठी विभक्ति: न क्रियापदसम्बन्धिनी। अत: सा न कारकविभक्ति:।


देवदत्तः नाम कोऽपि धनिकः आसीत्। एकदा तस्य धनस्यूतः लुप्तः। तस्य गृहे षड् भृत्याः आसन्। तेषु एव एकः चौरः स्यात्, इति तस्य मतम्। चौरं ग्रहीतुं सः वीरबलं साहाय्यम् अयाचत। वीरबलः अवदत्, ''मित्र! अद्य सायङ्काले तव सर्वान् भृत्यान् मम गृहं प्रेषय'' इति।





यथानिश्चितं सर्वे सेवकाः वीरबलस्य गृहम् आगताः। वीरबलेन पूर्वमेव सर्वेषां कृते समानोन्नतयः यष्टिकाः आनीताः। सः सेवकान् अवदत्, ''भोः पश्यन्तु, एताः मायायष्टिकाः। तासु एकां यष्टिकां स्वीकृत्य सर्वैः देवदत्तस्य गृहं गन्तव्यं, श्वः प्रभाते पुनरागन्तव्यम्। येन केनापि धनस्यूतः चोरितः स्यात् तस्य यष्टिका अङ्गुलिमात्रं दीर्घा भविष्यति।''

रात्रौ सर्वे भृत्याः सुखेन निद्राम् अकुर्वन् ऋते एकस्मात्। सः अचिन्तयत्, ''श्वः प्रातः मम चौर्यं प्रकटितं भवेत्। अतः अहम् अधुना एव मम यष्टिकाम् अङ्गुलिमात्रं कर्तयामि।'' इति चिन्तयित्वा तथा कृत्वा सः सुखेन सुप्तः।





अन्येद्युः लघुयष्टिकां दृष्ट्वैव वीरबलेन चौरः सम्यक् ज्ञातः गृहीतः च। अपराधी भृत्यः वीरबलस्य पादयोः पतित्वा स्वस्य अपराधम् अङ्गीकृतवान् धनस्यूतं च प्रत्यर्पितवान्।



**भाषाभ्यासः**

## १. उचितं पर्यायं चिनुत।

१. कस्य धनस्यूतः लुप्तः ?
   (अ) देवदत्तस्य (आ) वीरबलस्य (इ) भृत्यस्य (ई) नृपस्य
२. गृहे कति भृत्याः आसन् ?
   (अ) पञ्च (आ) सप्त (इ) षड् (ई) एकः
३. वीरबलः कस्य मित्रम् ?
   (अ) भृत्यस्य (आ) धनिकस्य (इ) यष्टिकायाः (ई) चौरस्य
४. 'श्वः मम चौर्यं प्रकटितं भवेत्।' इति चिन्ता कस्य चित्ते जायते ?
   (अ) दासस्य (आ) वीरबलस्य (इ) धनिकस्य (ई) नृपस्य

## २. कः कं वदति ?


१. ''पश्यन्तु एताः मायायष्टिकाः।''
२. ''मित्र, अद्य सायङ्काले तव सर्वान् भृत्यान् मम गृहं प्रेषय।''

## ३. माध्यमभाषयत उत्तरं लिखत। वीरबलेन चौरः कथं गृहीतः ?


## ४. स्तम्भमेलनं कुरुत।


| विशेषणम् | विशेष्यम् |
|---|---|
| समानोन्नतयः | धनस्यूतः |
| सर्वान् | चौरः |
| लुप्तः | यष्टिकाः |
| गृहीतः | भृत्यान् |


## ५. विरुद्धार्थकशब्दानां युग्मं चिनुत लिखत च।





## ६. पाठात् समानार्थकं शब्दं चित्वा रेखाचित्रं पूरयत।

१)



२)



३)



४)


# किं कृत्वा ?

बालकः → पुस्तकं पठति → पाठशालां गच्छति च ।






बालकः पुस्तकं **पठित्वा** पाठशालां गच्छति ।

---

माता → पाकं करोति → भोजनं परिवेषयति च ।





माता पाकं **कृत्वा** भोजनं परिवेषयति ।

---

एतौ → पत्रं लिखतः → पत्रपेटिकायां पत्रं निक्षिपतः च।





एतौ पत्रं **लिखित्वा** पत्रपेटिकायां निक्षिपतः ।

---

नर्तक्यः → शिक्षिकाम् अनमन् → अनृत्यन् च ।





नर्तक्यः शिक्षिकां **नत्वा** अनृत्यन् ।

पठित्वा, कृत्वा, लिखित्वा, नत्वा इत्येतानि पूर्वकालवाचक-त्वान्त-अव्ययानि ।

अद्वैत: → वृक्षम् आरोहति → उपविशति च।





अद्वैत: वृक्षम् **आरुह्य** उपविशति।

वृद्धादेवं प्रार्थयते → निद्रां करोति च। →





वृद्धा देवं **प्रार्थ्य** निद्रां करोति।

पुरुषौ → हस्तौ प्रक्षालयत: → भोजनं कुरुत: च।







पुरुषौ हस्तौ **प्रक्षाल्य** भोजनं कुरुत:।

| आरुह्य, प्रार्थ्य, प्रक्षाल्य इत्येतानि पूर्वकालवाचक-ल्यबन्त-अव्ययानि। |
|---|

शुभदा → आपणं गच्छति → धनं ददाति → पुस्तकम् आनयति → पठति च।




शुभदा आपणं **गत्वा** धनं **दत्त्वा** पुस्तकम् **आनीय** पठति।

**वाक्यानि निरीक्ष्य भेदम् अवगच्छत –**

१. साधव: फलानि **दत्त्वा** निर्गच्छन्ति। → १. साधव: फलानि **प्रदाय** निर्गच्छन्ति।

२. वृद्धा देवं **नत्वा** कार्यम् आरभते। → २. वृद्धा देवं **प्रणम्य** कार्यम् आरभते।

३. आरक्षका: चौरं **ताडयित्वा** कारागृहं नयन्ति। → ३. आरक्षका: चौरं **सन्ताड्य** कारागृहं नयन्ति।

४. धनं **हृत्वा** चौर: पलायित:। → ४. धनम् **अपहृत्य** चौर: पलायित:।

## सम्भाषापत्रम्

### १. मेलनं कुरुत।

| | |
|---|---|
| खादति | सम्मिल्य |
| पिबति | स्मृत्वा |
| सम्मिलति | खादित्वा |
| स्मरति | प्राप्य |
| प्राप्नोति | पीत्वा |

### २. गणद्वये लिखत।

उक्त्वा, पूजयित्वा, सम्पाद्य, संहृत्य, धृत्वा, धावित्वा, प्रविश्य, स्नात्वा, उड्डीय, निमज्य, अवतीर्य, उत्थाय, आरुह्य, उत्पत्य, सिक्त्वा, स्थित्वा, चलित्वा, निष्पीड्य, उद्घाट्य, निष्कास्य

### ३. पूर्वकालवाचकयोः उपयोगं कृत्वा दीर्घं वाक्यं कुरुत।



मर्कटः वृक्षात् -----पेटिकां-----टोपिकां ----- मस्तके ------ वृक्षम् आरोहति।

### ४. भिन्नम् अव्ययं चिनुत।

१. रक्षित्वा, उषित्वा, उपदिश्य, उप्त्वा
२. निमन्त्र्य, वन्दित्वा, पराजित्य, सम्भूय
३. तीर्त्वा, अनुज्ञाय, सुप्त्वा, मत्वा,
४. गणयित्वा, प्रयुध्य, प्रगाय, अभिषिच्य


**क्रीडा – पूर्वकालवाचकयोः उपयोगं कृत्वा अतिदीर्घं वाक्यं वदत।**

## रम्यसंस्कृतम्। किं कर्तुम् ?




युवकः चित्रपटगृहं गच्छति चित्रपटं पश्यति च।

युवकः किमर्थं चित्रपटगृहं गच्छति? युवकः चित्रपटं द्रष्टुं चित्रपटगृहं गच्छति।

बालकाः गृहम् आगच्छन् जलं च अपिबन्।

बालकाः किमर्थं गृहम् आगच्छन् ? बालकाः जलं **पातुं** गृहम् आगच्छन्।

- छात्रौ पुस्तकालयम् अगच्छताम्। **किमर्थम्**? छात्रौ **पठितुं** पुस्तकालयम् अगच्छताम्।
- मेघा फेनकं स्वीकरोति। **किमर्थम्** ? मेघा वस्त्राणि **प्रक्षालयितुं** फेनकं स्वीकरोति।

द्रष्टुं, पातुं, पठितुं, प्रक्षालयितुम् इत्येतानि हेत्वर्थक-तुमन्त-अव्ययानि।

**पठत अवगच्छत च –**


१. शुनकाः **खादितुम्** इच्छन्ति। २. अहं **वक्तुम्** ऐच्छम्।

३. भारवाहकः भारं **वोढुं** शक्नोति। ४. ताः नार्यः रुचिरं **पक्तुं** शक्नुवन्ति।

५. जनाः भोजनं **कर्तुम्** आरभन्त।

**सम्भाषापत्रम्**

**१. हेत्वर्थकं योजयित्वा संवादं पूरयत।**



सिंहः – रे मूषक, दण्डयामि त्वाम्।

मूषकः – भोः, अहं ________(गम्) इच्छामि। मुञ्चतु माम्।

सिंहः – किमर्थं मुञ्चामि ? अहं निद्रामग्नः आसम्। त्वया मम निद्राभङ्गः कृतः।

मूषकः – महाराज, एकवारं मुञ्चतु। सङ्कटकाले अहमपि तव साहाय्यं ________ (कृ) आगच्छामि।
परन्तु इदानीं मम बान्धवान् ________ (दृश्) गच्छामि। कृपया मुञ्चतु।

**२. चतुर्थं पदं लिखत।**

१. त्रै-त्रातुम् :: गै – ________ २. मिल्-मेलितुम् :: लिख् – ______

३. पूज् – पूजयितुम् :: कथ् – ______ ४. हन् – हन्तुम् :: मन् – ________

५. लभ्-लब्धुम् :: रभ् – ________ ६. बुध् – बोद्धुम् :: युध् – ________

७. स्मृ-स्मर्तुम् :: कृ – ________ ८. दृश्-द्रष्टुम् :: स्पृश् – ________

**३. धातोः हेत्वर्थकम् अव्ययं प्रयुज्य वाक्यं पुनर्लिखत।**

१. शृगालः द्राक्षाफलम् (खाद्) उत्पतति। २. काकः जलं (पा-पिब्) घटे उपविशति।


३. शृगालः मांसखण्डं (लभ्) काकस्य स्तुतिं करोति। ४. भीमं (हन्) दुर्योधनः कपटम् अकरोत्।

५. शशकः निद्रां (कृ) अगच्छत्। ६. सः पत्रं (लिख्) लेखनीं स्वीकरोति।

# द्वितीयः पाठः । अव्ययमाला । (कण्ठस्थीकरणार्थम्)

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।
तस्यां हि काव्यं मधुरं तस्मादपि सुभाषितम् ।।

सुभाषितं नाम शोभनं भाषितम् । संस्कृतसाहित्ये विपुलानि सुभाषितानि सन्ति । अल्पाक्षरत्वं सुभाषितानां वैशिष्ट्यम् । मधुराणि गेयानि अर्थपूर्णानि एतानि सुभाषितानि । सुभाषितानां पठनेन वाणी सुसंस्कृता निर्दोषा च भवति । वक्तृत्वकलायां निपुणतासम्पादनार्थम् उत्कृष्ट-निबन्धलेखनार्थं च तानि अतीव उपयुक्तानि । अतः इयं सुभाषितानां माला छात्रैः अवश्यं कण्ठे धारणीया ।



**श्रोतुं कर्णौ, वक्तुमास्यं सुहास्यं**
**घ्रातुं घ्राणं पादयुग्मं विहर्तुम् ।**
**द्रष्टुं नेत्रे हस्तयुग्मं च दातुं**
**ध्यातुं चित्तं येन सृष्टं स पातु ।।१।।**

[येन **श्रोतुं** कर्णौ, **वक्तुं** सुहास्यम् आस्यं, **घ्रातुं** घ्राणं, **विहर्तुं** पादयुग्मं, **द्रष्टुं** नेत्रे, **दातुं** हस्तयुग्मं **ध्यातुं** च चित्तं सृष्टं सः (ईश्वरः) पातु ।]

**गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम् ।**
**केतकीगन्धमाघ्राय स्वयमायान्ति षट्पदाः ।।२।।**

[दूरे वसताम् अपि सतां, गुणाः दूतत्वं कुर्वन्ति । (यथा) षट्पदाः केतकीगन्धम् **आघ्राय** (मधुपानाय) स्वयम् आयान्ति ।]

**भुक्त्वा तृणानि शुष्काणि पीत्वा तोयं जलाशयात् ।**
**दुग्धं यच्छन्ति लोकेभ्यो धेनवो लोकमातरः ।।३।।**

[धेनवः शुष्काणि तृणानि **भुक्त्वा** जलाशयात् तोयं **पीत्वा** लोकेभ्यः दुग्धं यच्छन्ति । (ताः) लोकमातरः (खलु) ।]

**अकृत्वा परसन्तापम् अगत्वा खलमन्दिरम् ।**
**अनुत्सृज्य सतां वर्त्म यत्स्वल्पमपि तद् बहु ।।४।।**

[परसन्तापं न **कृत्वा**, खलमन्दिरं न **गत्वा**, सतां वर्त्म न **उत्सृज्य** यत् स्वल्पम् अपि (लभ्यते) तद् बहु (वर्तते) ।]

**यस्य षष्ठी चतुर्थी च विहस्य च विहाय च ।**
**अहं कथं द्वितीया स्यात्, द्वितीया स्यामहं कथम् ।।५।।**

[यस्य (कृते) **विहस्य** (इति) षष्ठी, **विहाय** (इति) चतुर्थी, अहं कथं च (इति) द्वितीया स्यात् (तस्य) अहं द्वितीया (पत्नी) कथं स्याम् ?]

**प्रारभ्यते न खलु विघ्नभयेन नीचैः**
**प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।**
**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः**
**प्रारब्धमुत्तमजना न परित्यजन्ति ।।६।।**

[विघ्नभयेन खलु नीचैः (कार्यं) न प्रारभ्यते । (कार्यं) **प्रारभ्य** विघ्नविहताः (**भूत्वा**) मध्याः विरमन्ति । विघ्नैः पुनः पुनः प्रतिहन्यमानाः अपि उत्तमजनाः प्रारब्धं (कार्यं) न परित्यजन्ति ।]

**स्थानभ्रष्टा न शोभन्ते दन्ता केशा नखा नराः।**
**इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत्॥७॥**

[स्थानभ्रष्टाः दन्ताः, केशाः, नखाः नराः च न शोभन्ते इति **विज्ञाय** मतिमान् (नरः) स्वस्थानं न परित्यजेत्।]

**दैवमेवेति सञ्चिन्त्य न स्वोद्योगं नरस्त्यजेत्।**
**अनुद्यमेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति॥८॥**

[दैवम् एव इति **सञ्चिन्त्य** नरः स्वोद्योगं न त्यजेत्। अनुद्यमेन तिलेभ्यः तैलं कः प्राप्तुम् अर्हति ?]

---

**अन्वयरचना –** साहित्यरचना द्विधा पद्या गद्या च। गेया छन्दोवृत्तबद्धा पद्यरचना। आदौ कर्तृपदं पश्चात् कर्मपदं अन्ते क्रियापदम् इति सरला क्रमबद्धा गद्यरचना। अयं पदक्रमः पद्ये न दृश्यते। अतः कदाचित् पद्यं दुर्बोधं भवति। पद्यस्य पदविभागं कृत्वा विकीर्णानि पदानि संयोज्य पुनः सरलक्रमेण कृता रचना नाम अन्वयः। अर्थबोधस्य सरलं साधनं नाम अन्वयः। अनुवादार्थमपि लाभदायकः अन्वयाभ्यासः। क्वचित् पद्ये ये शब्दाः न वर्तन्ते तान् कल्पयित्वा अर्थपूर्णा वाक्यरचना भवति। पद्यस्थं क्रियापदम् अन्विष्य कः कर्ता, किं कर्म इति प्रश्नान् कृत्वा अन्वयः करणीयः। यथा–

लोभाविष्टो नरो वित्तं वीक्षते न तु सङ्कटम्।
दुग्धं पश्यति मार्जारो न तथा लगुडाहतिम्॥

अत्र किं क्रियापदम् ? वीक्षते। कः वीक्षते ? नरः। कीदृशः नरः ? लोभाविष्टः। लोभाविष्टः नरः किं वीक्षते ? वित्तम्। किं न वीक्षते ? सङ्कटम्। मार्जारः किं पश्यति ? दुग्धम्। किं न पश्यति ? लगुडाहतिम्।

अन्वयः –

**यथा लोभाविष्टः नरः वित्तं वीक्षते, सङ्कटं तु न वीक्षते तथा मार्जारः दुग्धं पश्यति, लगुडाहतिं तु न पश्यति।**

---

## भाषाभ्यासः



**श्लोकः १–**

**१. एकवाक्येन उत्तरत।**

अ) ईश्वरेण श्रोतुं किं दत्तम् ?
आ) आस्यं कीदृशम् ?
इ) ईश्वरेण विहर्तुं किं दत्तम् ?

**२. तालिकां पूरयत।**

| किं दत्तम् | किं कर्तुम् ? | किमर्थम् ? |
|---|---|---|
| कर्णौ दत्तौ | श्रोतुम् | श्रवणार्थम्/श्रवणाय |
| आस्यं दत्तम् | वक्तुम् | वचनार्थम्/वचनाय |
| घ्राणं दत्तम् | ________ | घ्राणार्थम्/________ |
| पादयुग्मं दत्तम् | ________ | ________/विहाराय |
| नेत्रे दत्ते | द्रष्टुम् | ________/दर्शनाय |

**३. मेलनं कुरुत।**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अ | कर्णः | आस्यम् | घ्राणम् | पादः | नेत्रम् | हस्तः | पातु |
| आ | करः | रक्षतु | लोचनम् | श्रोत्रम् | तुण्डम् | नासिका | चरणः |

**श्लोकः २ –**

**१. एकवाक्येन उत्तरत।**

अ) के दूतत्वं कुर्वन्ति ?
आ) के केतकीम् आजिघ्रन्ति ?

**२. सत्यं वा असत्यं लिखत।**

अ) सज्जनाः दूतत्वं कुर्वन्ति।
आ) षट्पदाः स्वयम् आयान्ति।
इ) सज्जनाः केतकीगन्धम् आजिघ्रन्ति।

**३. समानार्थकशब्दं चिनुत लिखत च।**

सज्जनाः, भ्रमराः, आगच्छन्ति।

**४. विरुद्धार्थकशब्दं लिखत।**

गुणाः, दूरे, आयान्ति।

**श्लोकः ३ –**

**१. एकवाक्येन उत्तरत।**

अ) धेनवः किं भुक्त्वा दुग्धं यच्छन्ति ?
आ) धेनवः जलाशयात् किं पिबन्ति ?
इ) लोकमातरः काः ?

**२. श्लोकात् त्वान्त-अव्यये चित्वा लिखत।**

**३. वाक्यतः कर्ता, कर्म क्रियापदं च अन्विष्यत लिखत च।**

दुग्धं यच्छन्ति धेनवः।

**४. एकवचने परिवर्तयत।**

लोकमातरः धेनवः शुष्काणि तृणानि खादन्ति।

**श्लोकः ४ –**

**१. एकवाक्येन उत्तरत।**

अ) मनुजेन किं न कर्तव्यम् ?
आ) मनुजेन कुत्र न गन्तव्यम् ?
इ) मनुजेन किम् अनुसर्तव्यम् ?

**२. तालिकां पूरयत।**

| धातुः | त्वान्त/ल्यबन्तरूपम् | नञ्रूपम् |
|---|---|---|
| कृ | | अकृत्वा |
| गम्-गच्छ् | गत्वा | |
| उत् + सृज् | | अनुत्सृज्य |

**३. श्लोकात् अधोदत्तशब्दानां कृते समानार्थकशब्दं चित्वा लिखत।**

गृहम्, दुष्टः, मार्गः, स्तोकम्, भूरि।

**श्लोकः ५ –**

**१. श्लोकात् ल्यबन्त-अव्ययानि चिनुत।**

**२. योग्यं रूपं चिनुत।**

अ) षष्ठी- विहस्य/देवस्य।
आ) चतुर्थी- विहाय/गेहाय।
इ) प्रथमा- अहम्/कथम्।

**श्लोकः ६ –**

**१. एकवाक्येन उत्तरत।**

अ) के कार्यं न प्रारभन्ते ?
आ) के मध्ये विरमन्ति ?
इ) के प्रारब्धं कार्यं न परित्यजन्ति ?

**२. मञ्जूषातः उचितं पर्यायं चित्वा स्तम्भपूरणं कुरुत।**

| नीचाः | मध्यमाः | उत्तमाः |
|---|---|---|
| कार्यम् | | कार्यम् |
| | | |

(न परित्यज्यन्ति, कार्यात्, न प्रारभन्ते, विरमन्ति)

**३. श्लोकात् प्रथमाविभक्तेः तथा तृतीयाविभक्तेः रूपाणि चिनुत लिखत च।**

**४. पदपरिचयं कुरुत।**

| | मूलधातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| विरमन्ति | | | | |
| परित्यजन्ति | | | | |

**५.वर्णविग्रहं कुरुत।**

प्रारभ्य, विघ्नैः।

**श्लोकः ७ –**

**१. एकवाक्येन उत्तरत।**

अ) स्थानभ्रष्टाः के के न शोभन्ते ?
आ) किं विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ?

**२. समानार्थकशब्दैः वाक्यं पुनर्लिखत।**

स्थानभ्रष्टाः दन्ताः केशाः नखाः नराः न शोभन्ते।

**३. श्लोकात् प्रथमाविभक्तेः रूपाणि चित्वा लिखत।**

**श्लोकः ८ –**

**१. एकवाक्येन उत्तरत।**

अ) नरः किं न त्यजेत् ?
आ) अनुद्यमेन किं प्राप्तुं न शक्यते ?

**२. सत्यम् असत्यं वा इति लिखत।**

अ) नरः दैवं सञ्चिन्तयेत्।
आ) नरः उद्यमं सञ्चिन्तयेत्।
इ) तिलेभ्यः तैलं प्राप्यते।

**३. अमरकोषपङ्क्तिं लिखत।** दैवम्, नरः।


**४. समानार्थकशब्दं चिनुत लिखत च।**

लब्धुम्, आलस्यम्।

**५.वर्णविग्रहं कुरुत।**

सञ्चिन्त्य, तिलेभ्यः।

# वर्णानां साहचर्यम्।





अस्माकं भिन्नानि उच्चारणस्थानानि यूयं जानीथ। वयं सर्वे सहैव तिष्ठामः। अस्माकं परस्परसाहचर्यं रोचकम्। यदा अस्मासु द्वयोः अतीव सन्निकर्षः भवति तदा यद् ध्वनिपरिवर्तनं भवति सः एव **सन्धिः**।




आवयोः संयोगेन आकारः भवति। यथा–
न + अस्ति = नास्ति।




आवयोः सन्निकर्षः ईकारे परिणमते।
यथा– रवि + इन्द्रः = रवीन्द्रः।




आवयोः अपि ऊकारः भवति।
यथा–भानु+उदयः = भानूदयः।




आवयोः संयोगेन ॠकारः भवति।
यथा– मातृ+ऋणम् = मातॄणम्।

(अयं समानानां वर्णानां दीर्घरूपः सन्धिः। अतः सः **सवर्णदीर्घसन्धिः** इति उच्यते।)




यदि आवयोः अतिशयितः सन्निधिः तर्हि आवयोः स्थाने एकारः उपतिष्ठति। यथा गण+ईशः इत्यस्य उच्चारणं गणेशः।




आवयोः सन्निकर्षस्य परिणामरूपेण द्वयोरपि स्थाने 'ओकारः' आयाति।
यथा– लम्ब+उदरः इति लम्बोदरः।




आवयोः संयोगेन ऐ इति सन्धिरूपः आदेशः भवति।
यथा– सदा + एव इति सदैव।




आवयोः संयोगेन औ इति सन्धिरूपः आदेशः भवति।
यथा– गङ्गा+ओघः इति गङ्गौघः।





यदा मम संयोगः स्वरेण भवति (इ/ई वर्जयित्वा) तदा मम परिवर्तनं 'य्' इति वर्णे भवति।
यथा– करोमि + अहम् इति करोम्यहम्।




स्वरेण सह (उ/ऊ वर्जयित्वा) संयोगेन मम स्थाने 'व्' इति वर्णः आयाति।
यथा– खलु + एतत् इति खल्वेतत्।

एवम् अस्माकं मिथः प्रभावः दृश्यते। यथा स्वरसन्धिः तथैव विसर्गसन्धिः व्यञ्जनसन्धिः च अपि भवतः। सन्धिरूपेण यद् ध्वनिपरिवर्तनम् अस्मासु भवति तद्विषयकाः नियमाः वर्तन्ते। यदि तद् ध्वनिपरिवर्तनं सुष्ठु न अवगतं, सन्धिनियमाः न पठिताः तर्हि अर्थावबोधनं न भवति।

# तृतीयः पाठः ।　　धन्यौ तौ दातृयाचकौ ।





महाकविकालिदासविरचितं रघुवंशम् इति महाकाव्यं प्रसिद्धमेव। तत्र पञ्चमे सर्गे महाराजस्य रघोः जीवने घटितं प्रसङ्गं कविः वर्णयति। रघुः विश्वजित्-यज्ञम् अकरोत्। अस्मिन् यज्ञे सः सर्वं धनं दानरूपेण अयच्छत् रिक्तकोषः च अभवत्। तदा एव कौत्सः नाम युवा छात्रः तत्र आयातः। गुरवे दक्षिणां दातुं सः धनम् ऐच्छत्। स एव प्रसङ्गः अत्र वर्णितः।



कस्मिंश्चित् तपोवने **वरतन्तुः** नाम ऋषिः आसीत्। सः अध्यापने निपुणः प्रकृत्या **दयालुः** च आसीत्। तस्य आश्रमे बहवः मेधाविनः **बटवः** आसन्। तेषु कश्चित् कौत्सः नाम **बटुः** आसीत्। विद्याध्ययनं समाप्य गुरुदक्षिणां दातुमुत्सुकः कौत्सः **गुरुम्** उपागच्छत्। सविनयं च स्वस्य इच्छां **गुरवे** अकथयत्। तस्य वचः श्रुत्वा **गुरुः** उक्तवान्, ''वत्स कौत्स, तव अध्ययनेन सेवया च भृशं प्रीतोऽस्मि। अन्यां कामपि दक्षिणां नेच्छामि। गच्छ, स्वस्ति तुभ्यम्।'' **गुरुणा वरतन्तुना** निवारितः अपि कौत्सः वारंवारं दक्षिणां दातुम् ऐच्छत्।

तदा तं परीक्षितुं **वरतन्तुः** अकथयत् – ''त्वया मम सकाशात् चतुर्दशविद्याः अधीताः। अतः चतुर्दशकोटिसुवर्णमुद्राः आनय।'' **गुरोः** वचनं श्रुत्वा कौत्सः चिन्ताकुलः जातः। 'एतावतीः सुवर्णमुद्राः कुतः आनयानि ? महाराजं **रघुं** विहाय न कोऽपि एतावतीः मुद्राः दातुं समर्थः। अतः 'रघुं प्रति गच्छामि' इति विचार्य कौत्सः **रघोः** समीपम् अगच्छत्।



दिग्विजयानन्तरं **रघुः** 'विश्वजित्'नाम्नि यज्ञे अशेषं धनं दानरूपेण अयच्छत्। रिक्तहस्तं **रघुं** दृष्ट्वा कौत्सः निवृत्तः। **रघुः** तम् आहूय आगमनस्य प्रयोजनम् अपृच्छत्। तदा कौत्सः अवदत् ''**रघो**, अहं गुरुदक्षिणार्थं चतुर्दशकोटिसुवर्णमुद्राः **गुरवे** दातुमिच्छामि। किन्तु भवान् पूर्वमेव सर्वस्वदानम् अकरोत्। अतः अहम् अन्यत्र गच्छामि।'' **रघुः** अवदत्, ''हे कौत्स, तिष्ठ। मम यज्ञशालायां विश्रामं कुरु। अहं निश्चयेन तव साहाय्यं करोमि।''

कौत्सस्य गुरुभक्त्या प्रभावितः **रघुः** कुबेरमाक्रान्तुं सङ्कल्पम् अकरोत्। कुबेरः **रघोः** भयात् आक्रमणात् पूर्वमेव प्रभूतां सुवर्णवृष्टिमकरोत्। तत् दृष्ट्वा सन्तुष्टः **रघुः** कौत्सम् आहूय सर्वं सुवर्णं तस्मै दातुमैच्छत्। किन्तु निःस्पृहः कौत्सः अवदत् – ''भोः राजन्, अहं केवलं गुरुदक्षिणार्थं चतुर्दशकोटिसुवर्णमुद्राः अभिलषामि। न वाञ्छामि अधिकम्।''

राजा सर्वस्वं दातुम् ऐच्छत् किन्तु याचकः अधिकमादातुं न अभ्यलषत्। अनेन प्रसङ्गेन दानशूरः **रघुः** तथा निरिच्छः कौत्सः च द्वावपि साकेतजनानां (अयोध्यावासिनां) कृते पूजनीयौ अभवताम्।

## भाषाभ्यासः



**१. एकवाक्येन उत्तरत।**

अ) वरतन्तुः ऋषिः कीदृशः आसीत् ?

आ) कौत्सेन कति विद्याः अधीताः ?

इ) कौत्सः कस्य शिष्यः आसीत् ?

ई) रघोः यज्ञस्य नाम किम् ?

उ) कः स्वर्णवृष्टिम् अकरोत् ?

**२. प्रश्ननिर्माणं कुरुत।**

अ) वरतन्तुः <u>अध्यापने</u> निपुणः। आ) रघुः <u>कौत्सस्य</u> भक्त्या प्रभावितः।

**३. अ) समूहेतरं पदं चिनुत लिखत च।**

क) यज्ञः, क्रतुः, सप्ततन्तुः वरतन्तुः।

ख) पर्जन्यः, वर्षा, दृष्टिः, वृष्टिः।

ग) विज्ञः, अज्ञः, अभिज्ञः, पटुः।

घ) क्ष्माभृत्, याचकः, वनीयकः, मार्गणः।

ङ) कुबेरः, यागः, धनाधिपः, धनदः।

**आ) विरुद्धार्थकशब्दं लिखत।** प्रभूतम्, समीपम्।

**४. वाक्यं शुद्धं कुरुत।**

अ) अहं मुद्राः गुरुं दातुं ऐच्छम्।

आ) वरतन्तुः कौत्सम् अकथयत्।

**५. पाठात् उकारान्तनामानि विशेषणानि च चित्वा लिखत।**

**६. मञ्जूषातः उचितैः अव्ययैः कोष्टकं पूरयत।**

| पूर्वकालवाचकं त्वान्तम् | पूर्वकालवाचकं ल्यबन्तम् | हेत्वर्थकं तुमन्तम् |
|---|---|---|
| | | |

(उपगम्य, श्रुत्वा, दृष्ट्वा, आहूय, दातुम्, आदातुम्, परीक्षितुम्, विहाय, समाप्य)

**मौखिककार्यम् - यथाक्रमं वदत।**

अ) कौत्सस्य रघुं प्रति गमनम्।

आ) गुरोः चतुर्दशमुद्राणां याचना।

इ) कुबेरेण कृता सुवर्णवृष्टिः।

ई) रघोः कुबेर-आक्रमणस्य सङ्कल्पः।

उ) कौत्सस्य अध्ययनेन गुरुः प्रीतः।




**हसत नन्दत !**

**सन्धिरपि विनोदाय...**

पुरा महाराष्ट्रेषु प्रजाहितदक्षः कोऽपि नृपः आसीत्। तस्य महिषी संस्कृतभाषाप्रवीणा विदुषी च। एकदा तौ जलविहारार्थं किञ्चित् रम्यं जलाशयमगच्छताम्। जलक्रीडायां मग्नः नृपतिः महिष्यां जलबिन्दून् क्षेप्तुं प्रारभत। राज्ञीं शैत्यम् अबाधत। अतः सा लज्जया नृपं संस्कृतभाषयैवावदत्, **"मोदकैस्ताडय माम्।"** तस्याः तद् वचनं श्रुत्वा चकितः राजा सेवकं सुवर्णस्थाल्यां मोदकानानेतुमादिशत्। यदा सः तैर्लघुमधुरगोलकैः राज्ञीं ताडयितुमैच्छत् तदा सा स्मितपूर्वकमगदत्, "भो राजन्, शैत्यं मां बाधेत इति चिन्तयित्वा **'मा उदकैः ताडय माम्'**, जलबिन्दुभिः (उदकैः) मा त्रासय, इति वक्तुकामासम्।" भूपतिरपि उच्चैः हसित्वा अभणत्, "मोदकशब्दश्रवणेन अन्यथा गृहीतं मया। तेन अयं परिहासप्रसङ्गः उद्भूतः।"

# रम्यसंस्कृतम्। किं करवाणि?




छात्रा: - आचार्ये, नमो नम:।

शिक्षिका - नमो नम:। सुप्रभातम्। **उपविशत**।

सौरभ: तनय: च - आचार्ये, अपि **मार्जयाव** फलकम्?

शिक्षिका:- अवश्यम्। **मार्जयतम्**। सुवचनमपि **लिखतम्**। नीरजे, वातायनम् **उद्घाटय**। अतीव उष्मा बाधते। अयि मृदुले, व्यजनानि **चालय**।

धीरज: - आचार्ये, अपि **प्रविशानि** वर्गम्?

शिक्षिका - आम् **आगच्छ**। स्थाने **उपविश**। श्रान्त: दृश्यसे। किञ्चित् जलं **पिब**। अयि छात्रा:, अधुना अहं प्रश्नान् पृच्छामि । सम्यक् विचिन्त्य **उत्तरत** यूयम्। कोलाहल: **मास्तु**। एक: एव उत्तरं **वदतु**।

● **कृति:-** १. संवादं पठित्वा स्फुटशब्दानाम् अर्थम् अवगच्छत। तम् अर्थम् अनुसृत्य पञ्चदश वाक्यानि पठत।

पञ्चदश वाक्यानि। (परस्मैपदम् आत्मनेपदं च)

| | | |
|---|---|---|
| १. स:/भवान् खादतु/लभताम्। | २. तौ/भवन्तौ खादताम्/लभेताम्। | ३. ते/भवन्त: खादन्तु/लभन्ताम्। |
| १. सा/भवती खादतु/लभताम्। | २. ते/भवत्यौ खादताम्/लभेताम्। | ३. ता:/भवत्य: खादन्तु/लभन्ताम्। |
| १. तत् खादतु/लभताम्। | २. ते खादताम्/लभेताम्। | ३. तानि खादन्तु/लभन्ताम्। |
| ४. त्वं खाद/लभस्व। | ५. युवां खादतम्/लभेथाम्। | ६. यूयं खादत/लभध्वम्। |
| ७. अहं खादानि/लभै। | ८. आवां खादाव/लभावहै। | ९. वयं खादाम/लभामहै। |

एतेषु वाक्येषु विविधक्रियापदानाम् उपयोगं कृत्वा पुन: वदत स्मरत च।

● **कृति:-** २. कृतिपत्रिकायां या: विविधा: सूचना: सन्ति, ता: एकत्र लिखत।
यथा- गद्यांशं पठित्वा कृती: **कुरुत**। एकवाक्येन **उत्तरत**।

३. गृहे वा पाठशालायां वा सूचना: लोट्लकारे दीयन्ते, तासां सङ्ग्रहं कुरुत।
यथा- उपविशत, पठत, लिखत इत्यादय:।

## सम्भाषापत्रम्



### १. वाक्यानि पूरयत।

(वर्धताम्, गायाम, यच्छ, आरोहाव, पठतु, तरत, खनतम्, रमस्व, लभेताम्)

१. अम्ब, भोजनं ______।
२. स: पाठं ______।
३. वयं गीतं______।
४. यूयं जले______।
५. आवाम् आम्रवृक्षं ______।
६. युवां भूमिं ______।
७. युष्माकं सुखं______।
८. छात्रौ यश:______।
९. त्वं स्वाध्याये______।

### २. भवान्/भवती-स्थाने त्वं योजयित्वा वाक्यानि लिखत।

१. भवान् अत्र उपविशतु।
२. भवती बन्धनं मुञ्चताम्।
३. भवती प्रार्थयताम्।
४. भवान् शीघ्रं पृच्छतु।
५. भवन्त: भद्राणि पश्यन्तु।
६. भवत्य: पाकं पचन्तु।

### पठत-बोधत तत् त्वम् असि।

उद्दालक: श्वेतकेतो: पिता। श्वेतकेतु: उद्दालकस्य पुत्र:। एकदा पिता उद्दालक: पुत्रं श्वेतकेतुम् अपृच्छत्- ''सौम्य, अपि तत् जानासि यस्य ज्ञानेन सर्वं ज्ञातं भवति ?''

पुत्र: - न जानामि, पित:। कृपया कथयतु।

पिता - जलपूर्णं पात्रं मुष्टिमितं लवणं च आनय। (पुत्र: तथा करोति।)

पिता - जलं लवणं च मिश्रय।

पुत्र: - मिश्रितं पित:।

पिता - अधुना जलात् लवणं पृथक्कुरु।

पुत्र: - तत् कर्तुं न शक्नोमि पित:।

पिता - अस्तु। उपरिभागस्थं जलं नलिकया आस्वादय। तत् कथम् अस्ति ?

पुत्र: - लवणमयम् अस्ति, तात।

पिता - मध्यभागस्थं जलं नलिकया आस्वादय। तत् कथम् अस्ति ?

पुत्र: - तद् अपि लवणम् अस्ति।

पिता - जलं बहि: क्षिप्त्वा आगच्छ।

पुत्र: - क्षिपामि तात।(जलं क्षिप्त्वा आगच्छति)

पिता - जले लवणं सर्वत्र व्याप्तं खलु ?

पुत्र: - आम्, तात।

पिता - तथैव ब्रह्म जगत: कारणम् अत: सर्वत्र व्याप्तम्। यथा त्वं जले व्याप्तं लवणं द्रष्टुं न शक्नोषि तथैव त्वं सर्वत्र व्याप्तं ब्रह्म द्रष्टुं न पारयसि। किन्तु तत् सर्वत्र अस्ति। तदेव ज्ञातव्यम्।

**कृति: - गद्यांशत: लोट्रूपाणि चिनुत।**

**(श्वेताश्वतर-उपनिषद: अयं संवाद:।)**

### गायत-नन्दत

**विमानयानं रचयाम।**

राघव ! माधव ! सीते ! ललिते !
विमानयानं **रचयाम**।
नीले गगने विपुले विमले
वायुविहारं **करवाम**।।१।।

उन्नतवृक्षं तुङ्गं भवनम्।
क्रान्त्वाकाशं खलु **याम**।
कृत्वा हिमवन्तं सोपानं
चन्दिरलोकं **प्रविशाम**।।२।।

शुक्रश्चन्द्र: सूर्यो गुरुरिति
ग्रहान् हि सर्वान् **गणयाम**।
विविधा: सुन्दरताराश्चित्वा
मौक्तिकहारं **रचयाम**।।३।।

अम्बुदमालाम् अम्बरभूषाम्
आदायैव हि **प्रतियाम**।
दु:खित-पीडित-कृषिकजनानां
गणेषु हर्षं **जनयाम**।।४।।

**-डॉ. विश्वास:, बेंगलुरू।**





## लेखनकौशलम्–१

### निबन्धं पूरयत।

१) **कालिदासः –** _______ 'कालिदासः' शिरोमणिः इव _______ । तस्य _______ साहित्ये सप्ततारका इव प्रकाशन्ते। तेन कुमारसम्भवम्, रघुवंशम् इति _______ महाकाव्ये रचिते। _______ मालविकाग्निमित्रं विक्रमोर्वशीयं तथा अभिज्ञानशाकुन्तलमिति नाटकानि लिखितवान्। तस्य मेघदूतं नाम काव्यं _______ भाषासु अनूदितम्। _______ सह तस्य नैकाः _______ प्रसिद्धाः।

(**मञ्जूषा** – संस्कृतकविषु, कथाः, सः, सप्तकृतयः, विविधासु, द्वे, राजते, भोजराजेन)

२) **गणेशोत्सवः –** भाद्रपदमासस्य चतुर्थे _______ गणेशोत्सवः _______। तदा नैकेषु गृहेषु _______ स्थापना भवति। एषः उत्सवः कुत्रचित् सार्धैकदिनात्मकः, कुत्रचित् पञ्च वा सप्त वा दश दिनात्मकः। अनन्तरं मूर्तेः विसर्जनं _______ क्रियते। लोकमान्य-तिलक-महोदयेन सार्वजनिक-गणेशोत्सवः आरब्धः। भक्ताः दुर्वाङ्कुरैः, पुष्पैः, मिष्टैः _______ च गणेशं _______।

(**मञ्जूषा** – जलाशये, दिने, मोदकैः, आरभते, गणेशमूर्तेः, पूजयन्ति)



### संवादं पूरयत।

१) माता – अयि कैलास, शीघ्रम् _______।

कैलासः – अम्ब ! अद्य विरामदिनः खलु ! _______ प्रियदिनः। त्वरा मास्तु।

माता – सत्वरं दन्तधावनं _______ स्नानादिकं समापय। अद्य बहिर्गन्तव्यं खलु।

कैलासः – _______, किमर्थं बहिः ? मास्तु भोः।

माता – कैलास, अपि विस्मृतम् ? अद्य _______ जन्मदिनम्। तत्रैव गन्तव्यम्। अतः अविलम्बं स्नात्वा, नवयुतकं धृत्वा सज्जः भव।

कैलासः – भोः ! सत्यमेव ! विस्मृतं मया। सत्वरं _______ करोमि। मातः, उपहाररूपेण किं _____ ?

माता – अनन्तरं चिन्तयावः। त्वरस्व इदानीम्।

(**मञ्जूषा** – नयाव, मातः, उत्तिष्ठ, पितृव्यस्य, कृत्वा, मम, सिद्धतां)

२) शुभम् – नमस्ते श्रीमन् ! अहं नागपूरनगरं गन्तुम् इच्छामि। _______ चिटिकां देहि।

चिटिकाविक्रेता – केन _______ गन्तुम् इच्छसि ?

शुभम् – 'पुणे-नागपूर-गरीबरथ' रेलयानेन _______ इच्छामि।

चिटिकाविक्रेता – एषा _______। त्रिंशत् _______ देहि।

शुभम् – गृह्यताम्। श्रीमन्, एतस्य रेलयानस्य _______ कः अस्ति ?

चिटिकाविक्रेता – एतत् रेलयानम् _______ षड्वादने _______ नागपूरनगरं _______।

शुभम् – _______।

(**मञ्जूषा** – पुणेनगरात्, धन्यवादः, रूप्यकाणि, समयः, गच्छति, गन्तुम्, रेलयानेन, कृपया, चिटिका, प्रातः)

**मञ्जूषात: योग्यशब्दान् योजयित्वा चित्रवर्णनं पूरयत।**

१) **रक्षाबन्धनम्-** ______ चित्रमिदम्। भ्राता आसने उपविष्ट:। तस्य समीपे ______ वर्तते। भगिनी रक्षासूत्रं हस्ते गृहीत्वा तिष्ठति। सा तत् सूत्रं ______ हस्ते ______ सिद्धा। माता ______ पश्यति। ______ दीपस्थालिका स्थापिता। पृष्ठत: भित्तिकाचित्रं सुखासन्दम् अपि दृश्येते। ______ परित: ______ आलिखिता अस्ति।

(उपहार:, रक्षाबन्धनस्य, बद्धुं, रङ्गवल्ली, आनन्देन, आसनम्, भ्रातु:, पीठे)






२) **बसस्थानकम् -** ______ एतत् चित्रम्। बसस्थानके यात्रिका: बसयानं प्रतीक्षन्ते। तत्र द्वे महिले, एका बालिका, एक: पुरुष: च ______। विक्रेता ______ विक्रीणीते। बालिका ______ पश्यति। पार्श्वे ______ सन्ति। मार्गे त्रिचक्रिका द्विचक्रिका च ______ । एकस्या: ______ समीपे एकम् अपत्यं विद्यते। माता अपत्याय विमानं ______ ।

(वृक्षा:, तिष्ठन्ति, दर्शयति, विक्रेतारं, कर्कटी:, महिलाया:, धावत:, बसस्थानकस्य )

**पठत अवगच्छत !** **स्वराणां सृष्टि:।**

**पङ्क्तिद्वयं पठत।**

१. **नास्ति** विद्यासमो बन्धु:। नास्ति = न + अस्ति। (अ + अ = आ)

२. **नरस्याभरणं** रूपम्। नरस्याभरणं = नरस्य + आभरणम् (अ + आ = आ)

**द्वयो: अक्षरयो: एकत्रीकरणम् नाम सन्धि:।**

**१. सवर्णदीर्घसन्धि:।**

**अ) अ/आ + अ/आ = आ**

१. नव + अपि = नवापि।

२. ____ + अत्र = तथात्र।

३. लेखनस्य + ____ = लेखनस्याशय:।

**आ) इ/ई + इ/ ई = ई**

१. पठति + इति = पठतीति।

२. ____ + इव = नदीव।

३. परि + ____ = परीक्षा।

**इ) उ/ऊ + उ/ऊ = ऊ**

१. गुरु + उपदेश: = गुरूपदेश:।

२. ____ + उत्साह: = वधूत्साह:।

३. ____ + ऊर्जा = भानूर्जा।

**ई) ऋ/ॠ+ ऋ/ॠ = ॠ**

१. मातृ +ऋणम् = मातॄणम्।

२. पितृ + ____ = पितॄतम्।

३. भ्रातृ + ____ = भ्रातॄषभ:।



# भाषासूत्रम् – १





## (अ) नामानि ।

**स्वरान्तशब्दानां भेदा: –**


| | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| **अकारान्त:** | देव | – | वन |
| **आकारान्त:** | – | माला | – |
| **इकारान्त:** | कवि | मति | वारि |
| **ईकारान्त:** | – | नदी | – |
| **उकारान्त:** | भानु | धेनु | मधु |
| **ऊकारान्त:** | – | वधू | – |
| **ऋकारान्त:** | अ) पितृ आ) कर्तृ | अ) मातृ आ) स्वसृ | – |

| **चित्रम् →** |  |  |  |  |
|---|---|---|---|---|
| **अकारान्त: शब्द:** | **देव:** | **सूर्य:** | **वात:** | **वृक्ष:** |
| **समानार्थक: उकारान्त: शब्द:** | **प्रभु:** | **भानु:, सहस्रांशु:** | **वायु:** | **तरु:** |

| **चित्रम् →** |  |  |  |  |
|---|---|---|---|---|
| **अकारान्त:/ईकारान्त: शब्द:** | **शिक्षक:** | **सत्त्व:** | **चन्द्र:** | **वंशी** |
| **समानार्थक: उकारान्त: शब्द:** | **गुरु:** | **पशु:** | **इन्दु:, हिमांशु:** | **वेणु:** |

**पठत भेदम् अवगच्छत च ।**

**सूर्य:** नाम तेजोगोल: । **सूर्यस्य** वर्णनं ऋग्वेदे वर्तते । **सूर्यात्** सर्वे प्रकाशं लभन्ते । **सूर्यं** परित: सर्वे ग्रहा: भ्रमन्ति । **सूर्येण** ग्रहमण्डलं शोभते । **सूर्ये** अतीव ऊर्जा वर्तते । **सूर्य:** अस्माकं देवता । **सूर्याय** नम: । **हे सूर्य**, रक्ष माम् ।



**भानु:** नाम तेजोगोल: । **भानो:** वर्णनं ऋग्वेदे वर्तते । **भानो:** सर्वे प्रकाशं लभन्ते । **भानुं** परित: सर्वे ग्रहा: भ्रमन्ति । **भानुना** ग्रहमण्डलं शोभते । **भानौ** अतीव ऊर्जा वर्तते । **भानु:** अस्माकं देवता । **भानवे** नम: । **हे भानो**, रक्ष माम् ।

भानु (सूर्यः)– 'उ'कारान्तं पुंलिङ्गं नाम **उकारान्तनामानि।** धेनु (गौः) 'उ'कारान्तं स्त्रीलिङ्गं नाम

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| भानुः | भानू | भानवः | प्रथमा | धेनुः | धेनू | धेनवः |
| भानुम् | भानू | भानून् | द्वितीया | धेनुम् | धेनू | धेनूः |
| भानुना | भानुभ्याम् | भानुभिः | तृतीया | धेन्वा | धेनुभ्याम् | धेनुभिः |
| भानवे | भानुभ्याम् | भानुभ्यः | चतुर्थी | धेनवे/धेन्वै | धेनुभ्याम् | धेनुभ्यः |
| भानोः | भानुभ्याम् | भानुभ्यः | पञ्चमी | धेनोः/धेन्वाः | धेनुभ्याम् | धेनुभ्यः |
| भानोः | भान्वोः | भानूनाम् | षष्ठी | धेनोः/धेन्वाः | धेन्वोः | धेनूनाम् |
| भानौ | भान्वोः | भानुषु | सप्तमी | धेनौ/धेन्वाम् | धेन्वोः | धेनुषु |
| हे भानो | हे भानू | हे भानवः | सम्बोधनम् | हे धेनो | हे धेनू | हे धेनवः |
| भानुवत् अन्ये शब्दाः – मनु, अणु, विष्णु, साधु, इन्दु, पशु, वारु, प्रभु, गुरु इत्यादयः। | | | | धेनुवत् अन्ये शब्दाः – तनु, चञ्चु, रज्जु, हनु इत्यादयः। | | |

मधु 'उ'कारान्तं नपुंसकलिङ्गं नाम

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| मधु | मधुनी | मधूनि | प्रथमा |
| मधु | मधुनी | मधूनि | द्वितीया |
| मधुना | मधुभ्याम् | मधुभिः | तृतीया |
| मधुने | मधुभ्याम् | मधुभ्यः | चतुर्थी |
| मधुनः | मधुभ्याम् | मधुभ्यः | पञ्चमी |
| मधुनः | मधुनोः | मधूनाम् | षष्ठी |
| मधुनि | मधुनोः | मधुषु | सप्तमी |
| हे मधो, मधु | हे मधुनी | हे मधूनि | सम्बोधनम् |
| मधुवत् अन्ये शब्दाः– वस्तु, अम्बु, जानु, दारु इत्यादयः। **उकारान्त–विशेषणानि।** दयालु, कृपालु, स्नेहालु, प्रेमालु। | | | |

**इच्छार्थक–उकारान्त–विशेषणानि।**
**यथा–ज्ञातुम् इच्छा जिज्ञासा।**
**जिज्ञासा यस्य अस्ति सः जिज्ञासुः।**
एवं – पातुम् इच्छा (पिपासा) यस्य अस्ति सः/सा **पिपासुः**, भोक्तुम् इच्छा (बुभुक्षा) यस्य अस्ति सः/सा **बुभुक्षुः**, विजेतुम् इच्छा (विजिगीषा) यस्य अस्ति सः/सा **विजिगीषुः**। कर्तुम् इच्छा (चिकीर्षा) यस्य अस्ति सः/सा **चिकीर्षुः**।

**जिज्ञासापत्रम्**



## १. योग्यरूपं योजयत।

१. महादेवः ________ पतिः। (पशु)
२. हे________, रक्ष माम्। (प्रभु)
३. सर्वे ________ ज्ञानं पूजयन्ति। (जिज्ञासु)
४. तस्मै ________ नमः। (गुरु)
५. नारदः ________ शरणं गच्छति। (विष्णु)
६. कृषीवलस्य समीपे पञ्च ________ सन्ति। (धेनु)
७. मयूरस्य ________ दीर्घा। (चञ्चु)
८. हिमालयस्य ________ हिमाच्छादितानि। (सानु)
९. ________ रसः मधुरः। (इक्षु)
१०. ________ पूर्णे नेत्रे। (अश्रु)

## २. चतुर्थं पदं लिखत।

१) शम्भु – शम्भुना :: शिशु – ________।
२) धेनु – धेन्वा :: रज्जु – ________।
३) अम्बु – अम्बूनि :: वस्तु – ________।
४) हनु – हनूः :: तनु – ________।

३ तालिकां पूरयत।

| नामरूपम् | प्रातिपदिकम् | अन्तः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| १. पश्वोः | | | | | |
| २. साधौ | | | | | |
| ३. जिज्ञासुभिः | | | | | |
| ४. तरूणाम् | | | | | |
| ५. दारूणि | | | | | |

## ऋकारान्तनामानि।

| अ) सम्बन्धवाचकानि | | आ) धातुतः निर्मितानि | |
|---|---|---|---|
| पुंलिङ्गम् | स्त्रीलिङ्गम् | | |
| पितृ (जनकः)<br>भ्रातृ (सहोदरः)<br>देवृ (पत्युः भ्राता)<br>जामातृ (कन्यायाः पतिः) | मातृ (जननी)<br>दुहितृ (कन्या)<br>यातृ (देवुः पत्नी)<br>ननान्दृ (पत्युः भगिनी) | कर्तृ<br>नेतृ<br>हर्तृ<br>श्रोतृ<br>योद्धृ | दातृ<br>वक्तृ<br>विधातृ<br>अभिनेतृ<br>बोद्धृ |
| • नृ (मनुष्यः) | | • सवितृ (पुं)(सूर्यः), स्वसृ (स्त्री.)(भगिनी), नप्तृ (पुं.) (पौत्रः/दौहित्रः) | |

**'अ' प्रकारः – पितृ 'ऋ'कारान्तं पुंलिङ्गं नाम** **मातृ 'ऋ'कारान्तं स्त्रीलिङ्गं नाम**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| पिता | पितरौ | पितरः | प्रथमा | माता | मातरौ | मातरः |
| पितरम् | पितरौ | पितॄन् | द्वितीया | मातरम् | मातरौ | **मातॄः** |
| पित्रा | पितृभ्याम् | पितृभिः | तृतीया | मात्रा | मातृभ्याम् | मातृभिः |
| पित्रे | पितृभ्याम् | पितृभ्यः | चतुर्थी | मात्रे | मातृभ्याम् | मातृभ्यः |
| पितुः | पितृभ्याम् | पितृभ्यः | पञ्चमी | मातुः | मातृभ्याम् | मातृभ्यः |
| पितुः | पित्रोः | पितॄणाम् | षष्ठी | मातुः | मात्रोः | मातॄणाम् |
| पितरि | पित्रोः | पितृषु | सप्तमी | मातरि | मात्रोः | मातृषु |
| हे पितर्,पितः | हे पितरौ | हे पितरः | सम्बोधनम् | हे मातर्,मातः | हे मातरौ | हे मातरः |

**'आ' प्रकारः (धातुतः निर्मितानि)**

| धातुः | नाम | अर्थः | पुं. प्रथमा ए. व. | स्त्री. प्रथमा ए. व. |
|---|---|---|---|---|
| १. कृ | कर्तृ | यः करोति। | कर्ता | कर्त्री |
| २. हृ | हर्तृ | यः हरति। | हर्ता | हर्त्री |
| ३.नी–नय् | नेतृ | यः नयति। | नेता | नेत्री |
| ४. रक्ष् | रक्षितृ | यः रक्षति। | रक्षिता | रक्षित्री |
| ५. श्रु | श्रोतृ | यः शृणोति। | श्रोता | श्रोत्री |

**कर्तृ 'ऋ'कारान्तं पुंलिङ्गं नाम**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| कर्ता | कर्तारौ | कर्तारः | प्रथमा |
| कर्तारम् | कर्तारौ | कर्तॄन् | द्वितीया |
| हे कर्तः, हे कर्तर् | हे कर्तारौ | हे कर्तारः | सम्बोधनम् |

तृतीयातः सप्तमीपर्यन्तं शब्दरूपाणि पितृवत् भवन्ति। एवम् एव 'आ'प्रकारकाणां शब्दानां रूपाणि भवन्ति। 'आ' प्रकारकाणां स्त्रीलिङ्गशब्दानां रूपाणि नदीवत् भवन्ति। यथा –

**कर्त्री 'ई'कारान्तं स्त्रीलिङ्गं नाम**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| कर्त्री | कर्त्र्यौ | कर्त्र्यः | प्रथमा |
| कर्त्रीम् | कर्त्र्यौ | कर्त्रीः | द्वितीया |
| हे कर्त्रि | हे कर्त्र्यौ | हे कर्त्र्यः | सम्बोधनम् |

**१. निबन्धं पूरयत। – गणेशस्य कुटुम्बम्।**

१) शङ्करः गणेशस्य ------। (पितृ)
२) पार्वती गणेशस्य -------। (मातृ)
३) कार्तिकेयः गणेशस्य ------। (भ्रातृ)
४) -----(मातृ) पार्वत्याः आदेशम् एतौ -----पालयतः। (भ्रातृ)
५) मातामहस्य हिमालयस्य एतौ आदर्शौ ------। (नप्तृ)



## (आ) सर्वनामानि।

| | |
|---|---|
| प्रथमपुरुषवाचकानि | तद्, यद्, एतद्, इदम्, भवत् |
| मध्यमपुरुषवाचकम् | युष्मद् |
| उत्तमपुरुषवाचकम् | अस्मद् |
| प्रश्नार्थकम् | किम् |

**'इदम्' सर्वनाम पुंलिङ्गम्** | **'इदम्' सर्वनाम स्त्रीलिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| अयम् | इमौ | इमे | प्रथमा | इयम् | इमे | इमाः |
| इमम्/एनम् | इमौ/एनौ | इमान्/एनान् | द्वितीया | इमाम्/एनाम् | इमे/एने | इमाः/एनाः |
| अनेन/एनेन | आभ्याम् | एभिः | तृतीया | अनया/एनया | आभ्याम् | आभिः |
| अस्मै | आभ्याम् | एभ्यः | चतुर्थी | अस्यै | आभ्याम् | आभ्यः |
| अस्मात् | आभ्याम् | एभ्यः | पञ्चमी | अस्याः | आभ्याम् | आभ्यः |
| अस्य | अनयोः/एनयोः | एषाम् | षष्ठी | अस्याः | अनयोः/एनयोः | आसाम् |
| अस्मिन् | अनयोः/एनयोः | एषु | सप्तमी | अस्याम् | अनयोः/एनयोः | आसु |

‘इदम्’ सर्वनाम नपुंसकलिङ्गम् –

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| इदम् | इमे | इमानि | प्रथमा |
| इदम्/एनत् | इमे/एने | इमानि/एनानि | द्वितीया |

(तृतीयातः सप्तमीपर्यन्तानि रूपाणि पुंलिङ्गसदृशानि। )

## भवत् आदरार्थकं सर्वनाम।

भवत् – पुंलिङ्गम्   भवत् – स्त्रीलिङ्गम्(भवती)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| भवान् | भवन्तौ | भवन्तः | प्रथमा | भवती | भवत्यौ | भवत्यः |
| भवन्तम् | भवन्तौ | भवतः | द्वितीया | भवतीम् | भवत्यौ | भवतीः |
| भवता | भवद्भ्याम् | भवद्भिः | तृतीया | भवत्या | भवतीभ्याम् | भवतीभिः |
| भवते | भवद्भ्याम् | भवद्भ्यः | चतुर्थी | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| भवतः | भवद्भ्याम् | भवद्भ्यः | पञ्चमी | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| भवतः | भवतोः | भवताम् | षष्ठी | भवत्याः | भवत्योः | भवतीनाम् |
| भवति | भवतोः | भवत्सु | सप्तमी | भवत्याम् | भवत्योः | भवतीषु |
| हे भवन् | हे भवन्तौ | हे भवन्तः | सम्बोधनम् | हे भवति | हे भवत्यौ | हे भवत्यः |

✲ केवलं प्रथमपुरुषस्य क्रियापदेन सह उपयुज्यते किन्तु मध्यमपुरुषस्य दर्शकम्। यथा –

| कर्तृपदम् | लट्लकारः | लङ्लकारः | लोट्लकारः | विधिलिङ्लकारः |
|---|---|---|---|---|
| भवान्/भवती | गच्छति | अगच्छत् | गच्छतु | गच्छेत् |
| त्वम् | गच्छसि | अगच्छः | गच्छ | गच्छेः |

## उपपदविभक्तयः (अव्ययानि)।

कानिचन अव्ययानि विशिष्ट-विभक्तिरूपम् अपेक्षन्ते। तानि अधः निर्दिष्टानि।

१. अभितः = (**द्वितीया**) **भानुम्** अभितः ग्रहाः भ्रमन्ति।
२. परितः = (**द्वितीया**) **मातरं** परितः गणेशः प्रदक्षिणां करोति।
३. उभयतः = (**द्वितीया**) **नदीम्** उभयतः क्षेत्राणि विद्यन्ते।
४. प्रति = (**द्वितीया**) सायङ्काले वत्सः **धेनुं** प्रति वेगेन गच्छति।
५. विना = (**द्वितीया/तृतीया/पञ्चमी**) **चन्द्रमसम्/चन्द्रमसा/चन्द्रमसः** विना निशा न शोभते।
६. सह = (**तृतीया**) **पित्रा** सह अनिकेतः आपणं गच्छति।
७. अलम् = (**तृतीया**) अलं **निद्रया**। अलं **भीत्या**। अलं **वार्तालापेन**।
८. नमः = (**चतुर्थी**) **गणपतये** नमः। **गुरवे** नमः। **मरुते** नमः। **महालक्ष्म्यै** नमः।
९. बहिः = (**पञ्चमी**) **गृहात्** बहिः माता आगता।
१०. कृते = (**षष्ठी**) **स्वसुः** कृते बन्धुः उपहारम् आनयति।
११. समीपे = (**षष्ठी**) **नगरस्य** समीपे उद्यानं वर्तते।

# (इ) धातुसाधितानि अव्ययानि।

**धातुसाधिता: नाम धातुमूलका: शब्दा:।**

| क्रियापदम् | नाम | विशेषणम् | अव्ययम् |
|---|---|---|---|
| पठ् – पठति | पठनम्, पाठ: | पठित | पठित्वा |
| पूज् – पूजयति | पूजनम्, पूजा | पूजित | सम्पूज्य |
| रम् – रमते | रमा , रमणम् | रत | रत्वा |
| वृत् – वर्तते | वर्तनम्, वृत्ति: | वृत्त | वर्तितुम् |

## अव्ययम्।

व्यय: नाम परिवर्तनम्। यस्मिन् शब्दे परिवर्तनं न भवति, नाम य: शब्द: त्रिषु लिङ्गेषु, त्रिषु वचनेषु अपि च सर्वासु विभक्तिषु समान: एव भवति, स: शब्द: 'अव्ययम्' इति उच्यते। यथा–

१. बालिका देवं **नत्वा** पठति। २. गणेशं **नत्वा** त्वं गच्छसि। ३. आचार्यं **नत्वा** छात्रा: वर्गं प्रविशन्ति।
अत्र कर्तृपदानुसारं क्रियापदं परिवर्तते। परं 'नत्वा' इत्यस्मिन् रूपे परिवर्तनं न भवति। अत: तद् अव्ययम्।

**धातुसाधितानि अव्ययानि**

- **पूर्वकालवाचकद्वयम्**
  - **त्वान्तम्** (त्वा + अन्तम्) — मूलधातु: + क्त्वा (त्वा)
  - **ल्यबन्तम्** (ल्यप् + अन्तम्) — उपसर्ग: + मूलधातु: + ल्यप् (य)
- **हेत्वर्थकम्**
  - **तुमन्तम्** (तुम्+अन्तम्) — मूलधातु: + तुमुन् (तुम्)

## पूर्वकालवाचक–अव्यय–द्वयम्।

• **त्वान्तरचना** –

१) राम: शालां गच्छति। राम: वर्गं प्रविशति।

अत्र एक: एव कर्ता। (राम:), क्रियाद्वयम् (गमनक्रिया, प्रवेशक्रिया)

पूर्वं कृता क्रिया गमनस्य। अत: गच्छति इति क्रियापदं पूर्वकालवाचकम् अस्ति। गम् धातो: अग्रे **त्वा–प्रत्ययम्** उपयुज्य अव्ययरूपं भवति – **गत्वा**।

राम: शालां **गत्वा** वर्गं प्रविशति।

२) मैथिली पुस्तिकायां लिखति। तत्पश्चात् प्रश्नं पृच्छति।
मैथिली पुस्तिकायां **लिखित्वा** प्रश्नं पृच्छति।

• **ल्यबन्तरचना** –

१) नीरज: वर्गं प्रविशति। तदनन्तरम् आसने उपविशति।
नीरज: वर्गं **प्रविश्य** आसने उपविशति।

२) भारती आसने उपविशति पुस्तिकायां लिखति च।
भारती आसने **उपविश्य** पुस्तिकायां लिखति।

**अवधेयम्** –
त्वान्त/ल्यबन्तरचनासमये 'अपि' 'तदनन्तरं', 'तत:', 'च', 'अथ', 'अनन्तरं', 'तत्पश्चात्' इत्यादय: शब्दा: निष्कासयितव्या:। द्वितीयवाक्यस्थं कर्तृपदं (नाम सर्वनाम वा) अपि निष्कासयितव्यम्।

## हेत्वर्थकम् अव्ययम्।

हेतु + अर्थकम् = हेत्वर्थकम्। हेतु: नाम उद्दिष्टम्। हेत्वर्थकम् अव्ययं क्रियाया: उद्दिष्टं कथयति।

१) राम: **पठितुं** शालां गच्छति। राम: किमर्थं शालां गच्छति? **पठितुम्।**

२) देवं **पूजयितुं** माता देवालयं गच्छति। माता किमर्थं देवालयं गच्छति ? देवं **पूजयितुम्।**

३) छात्रा: **खेलितुं** क्रीडाङ्गणं गच्छन्ति। छात्रा: किमर्थं क्रीडाङ्गणं गच्छन्ति ? **खेलितुम्।**

**पठत स्मरत।**

| धातव: | क्त्वा | ल्यप् | तुमुन् | धातव: | क्त्वा | ल्यप् | तुमुन् |
|---|---|---|---|---|---|---|---|
| दा | दत्त्वा | प्रदाय | दातुम् | वह् | ऊढ्वा | निवह्य | वोढुम् |
| पा | पीत्वा | निपीय | पातुम् | वस् | उषित्वा | निवस्य | वसितुम् |
| स्था | स्थित्वा | उत्थाय | स्थातुम् | वद् | उदित्वा | प्रोद्य/अनूद्य | वदितुम् |
| ज्ञा | ज्ञात्वा | विज्ञाय | ज्ञातुम् | कथ् | कथयित्वा | विकथ्य | कथयितुम् |
| गै | गीत्वा | प्रगाय | गातुम् | चुर् | चोरयित्वा | अभिचोर्य | चोरयितुम् |
| ध्यै | ध्यात्वा | अनुध्याय | ध्यातुम् | क्षल् | क्षालयित्वा | प्रक्षाल्य | क्षालयितुम् |
| जि | जित्वा | विजित्य | जेतुम् | रच् | रचयित्वा | विरचय्य | रचयितुम् |
| नी | नीत्वा | आनीय | नेतुम् | गण् | गणयित्वा | विगणय्य | गणयितुम् |
| श्रु | श्रुत्वा | उपश्रुत्य | श्रोतुम् | पूज् | पूजयित्वा | सम्पूज्य | पूजयितुम् |
| भू | भूत्वा | अनुभूय | भवितुम् | घुष् | घोषयित्वा | सङ्घोष्य | घोषयितम् |
| कृ | कृत्वा | उपकृत्य | कर्तुम् | नृत् | नर्तित्वा | अभिनृत्य | नर्तितुम् |
| स्मृ | स्मृत्वा | विस्मृत्य | स्मर्तुम् | क्रन्द् | क्रन्दित्वा | आक्रन्द्य | क्रन्दितुम् |
| सृ | सृत्वा | अनुसृत्य | सर्तुम् | पठ् | पठित्वा | अनुपठ्य | पठितुम् |
| दिश् | दिष्ट्वा | आदिश्य | देष्टुम् | लिख् | लिखित्वा | विलेख्य | लिखितुम् |
| दृश् | दृष्ट्वा | सन्दृश्य | द्रष्टुम् | हस् | हसित्वा | विहस्य | हसितुम् |
| प्रच्छ् | पृष्ट्वा | आपृच्छ्य | प्रष्टुम् | वन्द् | वन्दित्वा | अनुवन्द्य | वन्दितुम् |
| स्पृश् | स्पृष्ट्वा | संस्पृश्य | स्प्रष्टुम् | ग्रह् | गृहीत्वा | सङ्गृह्य | ग्रहीतुम् |
| सिच् | सिक्त्वा | अभिषिच्य | सेक्तुम् | गम् | गत्वा | आगम्य | गन्तुम् |
| मुच् | मुक्त्वा | विमुच्य | मोक्तुम् | नम् | नत्वा | प्रणम्य | नन्तुम् |
| वच् | उक्त्वा | प्रवाच्य | वक्तुम् | रम् | रत्वा | आरत्य | रन्तुम् |

**पङ्क्तिद्वयं पठत अवगच्छत !** **स्वराणां सृष्टि:।**

१. **मातेव** रक्षति **पितेव** हिते नियुङ्क्ते। मातेव = माता + इव। पितेव = पिता + इव।

२. क्रियासिद्धि: सत्त्वे वसति महतां **नोपकरणे**। नोपकरणे = न + उपकरणे।

**२. गुणसन्धि:।**

| अ) अ/आ + इ/ई = ए | आ) अ/आ + उ/ऊ = ओ | इ) अ/आ + ऋ/ॠ = अर् |
|---|---|---|
| १. देव + इन्द्र: = देवेन्द्र:। | १. गणेश + उत्सव: = गणेशोत्सव:। | १. देव + ऋषि: = देवर्षि:। |
| २. _____ + इव = चन्द्रिकेव। | २. वृक्षस्य + _____ = वृक्षस्योर्ध्वम्। | २. महा + _____ = महर्षि:। |

• **एतदपि स्मरणीयम् –** **त्वान्तं/ल्यबन्तम् अव्ययं निष्कासयत।**

१. ईशान: शालां **गत्वा** पठति।

गम् (१प.प.)+ क्त्वा | पठति: लट्लकार: प्र.पु.ए.व.

ईशान: शालां **गच्छति** पठति **च**।

गच्छति: लट्लकार: प्र.पु.ए.व. | पठति: लट्लकार: प्र.पु.ए.व.

२. महेन्द्र: **खेलित्वा** गृहम् आगच्छत्।

खेल्(१प.प.)+ क्त्वा | आगच्छत्: लङ्लकार: प्र.पु.ए.व.

महेन्द्र: **अखेलत्** गृहम् आगच्छत् **च**।

अखेलत्: लङ्लकार: प्र.पु.ए.व. | आगच्छत्: लङ्लकार: प्र.पु.ए.व.

३. आरुष: गृहम् **आगम्य** भोजनं करोति।

आ+गम् (१प.प.) +ल्यप् | करोति: लट्लकार: प्र.पु.ए.व.

आरुष: गृहम् **आगच्छति** भोजनं करोति **च**।

आगच्छति: लट्लकार: प्र.पु.ए.व. | करोति: लट्लकार: प्र.पु.ए.व.

४. अहं देवं **प्रणम्य** नृत्यामि।

खेल्(१प.प.)+ क्त्वा | नृत्यामि: लट्लकार: उ.पु.ए.व.

अहं देवं **प्रणमामि** नृत्यामि **च**।

प्रणमामि: लट्लकार: उ.पु.ए.व. | नृत्यामि: लट्लकार: उ.पु.ए.व.

## जिज्ञासापत्रम्



**१. पूर्वकालवाचक-धातुसाधित-अव्ययानि उपयुज्य वाक्यानि लिखत।**

१. स: ________ गच्छति। (खाद्)
२. आदित्य: गुरुम् ________ (अनु + सृ) देशान्तरम् अव्रजत्।
३. ब्रह्मदेव: वाल्मीकिम् ________ (उप + दिश्) अवदत्।
४. भक्त: विष्णुं ________ (स्मृ) तपश्चरणं करोति।
५. बालक: ईश्वरं ________ (ध्यै) अभ्यासं प्रारभते।
६. सिंहं ________ (दृश्) मुकुल: भीत:।
७. नौकाम् ________ (आ + नी) अजय: प्रवासम् आरभत।

**२. हेत्वर्थक-अव्ययानि प्रयुज्य वाक्यं पुनर्लिखत।**

१. भार्गव: ________ (स्ना) गङ्गानदीं गच्छति।
२. गर्दभ: ________ (गै) आरभत रात्रौ।
३. धनं ________ (लभ्) सोमदत्त: महानगरम् असरत्।
४. प्रश्नं ________ (प्रच्छ्) स: धैर्येण अग्रे आगच्छत्।

**३. त्वान्तं/ल्यबन्तम् अव्ययं निष्कासयत।**

१. दीपेश: गीतं स्मृत्वा गायति।
२. सुवर्णा प्रात: उत्थाय ग्रामम् अगच्छत्।
३. छात्रा: उत्तरं लिखित्वा स्मरन्ति।
४. राधा दुग्धं पीत्वा फलं खादतु।
५. कवि: काव्यं विरचय्य गायेत्।

## (ई) लोट्लकार: ।

१) राम: पाठं पठति। (लट्लकार:) (वर्तमानकाल:)  २) राम: पाठम् अपठत्। (लङ्लकार:) (प्रथमभूतकाल:) वाक्यद्वये कालस्य बोध: भवति। अधुना एतानि उदाहरणानि पठत।

१. प्रतीक, त्वम् उत्तिष्ठ। (आदेश:) २. काले वर्षतु पर्जन्य:। (अपेक्षा) ३. सर्वे सुखिन: भवन्तु। (शुभाशंसा) ४. अपि अहं वर्गं प्रविशानि ? (अनुमति:)

एतानि सर्वाणि वाक्यानि कालं न बोधयन्ति। परम् आदेश:, इच्छा, शुभाशंसनम्, अनुमति: इत्यादीन् भावान् कथयन्ति। अत: तानि 'अर्थ' इति प्रकारेषु गण्यन्ते। अर्थद्वयम् - आज्ञार्थ: (लोट्लकार:), विध्यर्थ: (लिङ्लकार:)।

परस्मैपदम्  **लोट्प्रत्यया:। (आज्ञार्थप्रत्यया:)**  आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| तु | ताम् | अन्तु | प्रथम: | ताम् | इताम् | अन्ताम् |
| - | तम् | त | मध्यम: | स्व | इथाम् | ध्वम् |
| आनि | आव | आम | उत्तम: | ऐ | आवहै | आमहै |

मध्यमपुरुष-एकवचनस्य प्रत्यय: 'हि' अस्ति। किन्तु गणानां प्रथमविभागे (१, ४, ६, १०) तस्य लोप: भवति।

पठ् (१ प. प.)  रम् (१ आ. प.)

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| पठतु | पठताम् | पठन्तु | प्रथम: | रमताम् | रमेताम् | रमन्ताम् |
| पठ | पठतम् | पठत | मध्यम: | रमस्व | रमेथाम् | रमध्वम् |
| पठानि | पठाव | पठाम | उत्तम: | रमै | रमावहै | रमामहै |

नृत् (४ प. प.)  मन् (४ आ. प.)

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| नृत्यतु | नृत्यताम् | नृत्यन्तु | प्रथम: | मन्यताम् | मन्येताम् | मन्यन्ताम् |
| नृत्य | नृत्यतम् | नृत्यत | मध्यम: | मन्यस्व | मन्येथाम् | मन्यध्वम् |
| नृत्यानि | नृत्याव | नृत्याम | उत्तम: | मन्यै | मन्यावहै | मन्यामहै |

लिख् (६ प. प.)  दिश् (६ आ. प.)

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| लिखतु | लिखताम् | लिखन्तु | प्रथम: | दिशताम् | दिशेताम् | दिशन्ताम् |
| लिख | लिखतम् | लिखत | मध्यम: | दिशस्व | दिशेथाम् | दिशध्वम् |
| लिखानि | लिखाव | लिखाम | उत्तम: | दिशै | दिशावहै | दिशामहै |

पूज् (१० प.प.)  मन्त्र् (१० आ. प.)

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| पूजयतु | पूजयताम् | पूजयन्तु | प्रथम: | मन्त्रयताम् | मन्त्रयेताम् | मन्त्रयन्ताम् |
| पूजय | पूजयतम् | पूजयत | मध्यम: | मन्त्रयस्व | मन्त्रयेथाम् | मन्त्रयध्वम् |
| पूजयानि | पूजयाव | पूजयाम | उत्तम: | मन्त्रयै | मन्त्रयावहै | मन्त्रयामहै |

## जिज्ञासापत्रम्



**१. तालिकां पूरयत।**

| क्रियापदम् | मूलधातुः | गणः, पदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| १. क्षमस्व | -- | -- | लोट् | -- | -- |
| २. लभताम् | -- | १ आ.प. | -- | -- | -- |
| ३. नृत्यन्तु | -- | -- | -- | -- | बहुवचनम् |
| ४. रचय | रच् | -- | -- | -- | -- |
| ५. उत्तरत | उत् + तॄ-तर् | -- | -- | -- | -- |
| ६. लिखत | -- | ६ प.प. | -- | -- | -- |
| ७. गायाम | -- | -- | लोट् | -- | -- |
| ८. भवन्तु | -- | -- | -- | प्रथमपुरुषः | -- |

**२. आज्ञार्थ-रूपाणि चिनुत लिखत च।**

१) हे राधिके, फलानि गणय।

२) अम्ब, अपि आपणात् शाकानि आनयानि ?

३) आचार्ये, अपि वयं क्रीडाङ्गणे क्रीडाम ?

४) यूयं राष्ट्रध्वजं सर्वदा वन्दध्वम्।

५) छात्रौ प्रार्थनां स्मरताम्।

### पठत अवगच्छत !

**स्वराणां सृष्टिः।**

**पङ्क्तिद्वयं पठत।**

१. सेवा न किञ्चिदस्तीति भिक्षा **नैव** च **नैव** च। नैव = न + एव

२. **रथस्यैकं** चक्रं भुजगयमिताः सप्त तुरगाः। रथस्यैकम् - रथस्य + एकम्।

**३) वृद्धिसन्धिः।**

**अ) अ/आ + ए/ऐ = ऐ**

१. न + एतद् = नैतद्।

२. मम + ______ = ममैश्वर्यम्।

**आ) अ/आ + ओ/औ = औ**

१. मम + ओजः = ममौजः।

२. तव + ______ = तवौदार्यम्।

**पङ्क्तिद्वयं पठत।**

१. योगक्षेमं **वहाम्यहम्**। वहाम्यहम् = वहामि + अहम्।

२. **अस्त्युत्तरस्यां** दिशि देवतात्मा हिमालयो नाम नगाधिराजः। अस्त्युत्तरस्यां = अस्ति + उत्तरस्याम्।

**४. यण्सन्धिः।**

**अ) इ/ई + विजातीयः स्वरः = य्।**

१. इति + अपि = इत्यपि।

२. करोमि + ______ = करोम्यहम्।

**आ) उ/ऊ + विजातीयः स्वरः = व्।**

१. खलु + एतत् = खल्वेतत्।

२. मनु + ______ = मन्वन्तरम्।

**इ) ऋ/ॠ + विजातीयः स्वरः = र्।**

१. पितृ + आज्ञा = पित्राज्ञा।

२. मातृ + ______ = मात्रिच्छा।

पञ्चोन-द्विवादनम्



दशोन-त्रिवादनम्



पञ्चाधिक-पञ्चवादनम्



दशाधिक-षड्वादनम्



विंशति-अधिक-अष्टवादनम्



पञ्चविंशति-अधिक-नववादनम्



पञ्चत्रिंशत्-अधिक-दशवादनम्



चत्वारिंशत्-अधिक-एकादशवादनम्



**उदाहरणानुसारं घटिकायन्त्रे समयनिर्देशनं कुरुत ।**

१) छात्रः प्रातःकाले पञ्चाधिकषड्वादने उत्तिष्ठति ।

२) छात्रः दशोनदशवादने पाठशालां गच्छति ।

३) विंशत्यधिक-पञ्चवादने छात्रः क्रीडाङ्गणे खेलति ।

४) दशोनसप्तवादने छात्रः सायंप्रार्थनां करोति ।

**समयम् अक्षरैः लिखत पठत च ।**

१) अर्चकः देवालयं (४.५०) वादने गच्छति ।

२) अध्यापकः कक्षां (११.०५) वादने प्रविशति ।

३) सायङ्काले (६.२०) वादने सूर्यास्तः भवति।

४) वयं सर्वे रात्रौ (८.४०) वादने भोजनं कुर्मः।

५) दूरदर्शने शनिवासरे सायङ्काले (७.००) वादने संस्कृतवार्तावली-कार्यक्रमस्य प्रसारणं भवति ।

६) वयम् आकाशवाण्यां प्रतिदिनं प्रातः (६.५५) वादने संस्कृतवार्ताः श्रोतुं शक्नुमः ।

॥श्रीः॥

**अस्माकं विद्यालयस्य वार्षिकोत्सवस्य कार्यक्रमपत्रिका ।**

७.30 - छात्राणाम् आगमनम् ।
७.४५ - सभागृहे मेलनम् ।
८.१० - अतिथीनाम् आगमनम् ।
८.१५ - दीपप्रज्वालनं शारदापूजनं च ।
८.30 - अतिथीनां स्वागतम् ।
८.४५ - सांस्कृतिककार्यक्रमाः ।
९.४५ - अतिथीनां भाषणम् ।
१०.१० - प्रधानाचार्यस्य उपदेशः ।
१०.30 - पारितोषिकवितरणम् ।
१२.०५ - कार्यक्रमसमाप्तिः ।

# किं कुर्यात्? किं भवेत्?



जनाः आर्द्रं शुष्कं च
अवकरं पृथक् क्षिपेयुः।



त्वं भ्रमणध्वनिना
अधिकसमयं न क्रीडेः।




अद्य आरभ्य वयम्
आदिनं पठेम।



श्वः अहं पुस्तकम् आनयेयम्।



एतं तालं युवां पुनःपुनः वादयेतम्।



आवां फलके सुभाषितं लिखेव।

**पञ्चदशवाक्यानि पठत।**

| | | |
|---|---|---|
| १. सः/भवान् पठेत्/रमेत। | २. तौ/भवन्तौ पठेताम्/रमेयाताम्। | ३. ते/भवन्तः पठेयुः/रमेरन्। |
| ४. सा/भवती पठेत्/रमेत। | ५. ते/भवत्यौ पठेताम्/रमेयाताम्। | ६. ताः/भवत्यः पठेयुः/रमेरन्। |
| ७. तत् पठेत्/रमेत। | ८. ते पठेताम्/रमेयाताम्। | ९. तानि पठेयुः/रमेरन्। |
| १०. त्वं पठेः/रमेथाः। | ११. युवां पठेतम्/रमेयाथाम्। | १२. यूयं पठेत/रमेध्वम्। |
| १३. अहं पठेयम्/रमेय। | १४. आवां पठेव/रमेवहि। | १५. वयं पठेम/रमेमहि। |

**पठत अवगच्छत !** **स्वराणां सृष्टिः।**

**पङ्क्तिद्वयं पठत।**

१. **द्वाविमौ** पुरुषौ लोके क्षरश्चाक्षर एव च। द्वाविमौ = द्वौ + इमौ।

२. **मातापितराविह** मम न स्तः, एकाकी खलु खिन्नोऽहम्। मातापितराविह – मातापितरौ + इह।

**५. अयादिसन्धिः।**

| अ) ए/ऐ + कोऽपि स्वरः = अय्/आय् | आ) ओ/औ + कोऽपि स्वरः = अव्/आव् |
|---|---|
| १. समीपे + एव = समीपयेव / समीप एव। | १. द्वौ + एव = द्वावेव। |
| २. कृते + ______= कृतयायाहि / कृत आयाहि। | २. तौ + ______ = तावपि। |
| ३. ______ + अपि = मत्यायपि / मत्या अपि। | ३. ______+ अपि = उभावपि। |
| ४. तस्मै + ______ = तस्मायपि / तस्मा अपि। | ४. ______+ आस्ताम् = सुहृदावास्ताम्। |

# चतुर्थः पाठः। विध्यर्थमाला। (कण्ठस्थीकरणार्थम्)

सुभाषितानि संस्कृतभाषायाः वैशिष्ट्यपूर्णानि पद्यरत्नानि। सुभाषितानि अस्माकं मनः रञ्जयन्ति, अस्माकं ज्ञानं वर्धयन्ति, कथं व्यवहारः करणीयः, किं कर्तव्यं, किं च न करणीयम् इति सम्यक् बोधयन्ति।

**सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत्सुखम्।**
**सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्।।१।।**

[ सुखार्थी चेत् विद्यां **त्यजेत्**। विद्यार्थी चेत् सुखं **त्यजेत्**। सुखार्थिनः विद्या कुतः ? विद्यार्थिनः सुखं कुतः ?]

**दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेत् जलम्।**
**सत्यपूतां वदेत् वाणीं मनःपूतं समाचरेत्।।२।।**

[ दृष्टिपूतं पादं **न्यसेत्**। वस्त्रपूतं जलं **पिबेत्**। सत्यपूतां वाणीं **वदेत्**। मनःपूतं **समाचरेत्**।]

**धनमलब्धं काङ्क्षेत, लब्धं रक्षेत् प्रयत्नतः।**
**रक्षितं वर्धयेत् सम्यक्, वृद्धं तीर्थेषु निक्षिपेत्।।३।।**

[अलब्धं धनं **काङ्क्षेत**। लब्धं (धनं) प्रयत्नतः **रक्षेत्**। रक्षितं (धनं) सम्यक् **वर्धयेत्**। वृद्धं (धनं) तीर्थेषु **निक्षिपेत्**।]

**अक्रोधेन जयेत् क्रोधम् असाधुं साधुना जयेत्।**
**जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम्।।४।।**

[अक्रोधेन क्रोधं **जयेत्**। साधुना असाधुं **जयेत्**। दानेन कदर्यं **जयेत्**। सत्येन च अनृतम् **जयेत्**।]

**दुःखे दुःखाधिकान् पश्येत् सुखे पश्येत् सुखाधिकान्।**
**आत्मानं शोकहर्षाभ्यां शत्रुभ्यामिव नार्पयेत्।।५।।**

[दुःखे दुःखाधिकान् **पश्येत्**। सुखे सुखाधिकान् **पश्येत्**। (मानवः) शत्रुभ्याम् इव शोकहर्षाभ्याम् आत्मानं न**अर्पयेत्**।]

**प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः।**
**किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति।।६।।**

[नरः आत्मनः चरितं प्रत्यहं **प्रत्यवेक्षेत** किं नु मे (चरितं) पशुभिः तुल्यम्? किं नु (मे चरितं) सत्पुरुषैः (तुल्यम्) इति।]

**बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्।**
**वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्।। ७।।**

[(नृपः) बकवत् अर्थान् **चिन्तयेत्** सिंहवत् च **पराक्रमेत्**। वृकवत् **अवलुम्पेत** शशवत् च **विनिष्पतेत्**।]

## भाषाभ्यासः



**श्लोकः १–**

**१) एकवाक्येन उत्तरत।**
(अ) विद्यार्थी किं त्यजेत् ?
(आ) सुखार्थी किं त्यजेत्?

**२. सन्धिविग्रहं कुरुत।**
१) त्यजेद्विद्याम्  २) त्यजेत्सुखम्
३) कुतो विद्या  ४) कुतो विद्यार्थिनः

**३. समानार्थकशब्दं लिखत।**
१) विद्या २) विद्यार्थी

**४. प्रश्ननिर्माणं कुरुत।**
(अ) सुखार्थी विद्यां न लभते।
(आ) विद्यार्थी सुखं न लभते।

**श्लोकः २.**

**१) एकवाक्येन उत्तरत।**

(अ) कीदृशं जलं पिबेत् ?

(आ) कीदृशीं वाणीं वदेत् ?

**२. समानार्थकशब्दं चित्वा लिखत।**

वाक्, पवित्रम्, ऋतम्, उदकम्।

**३. स्तम्भमेलनं कुरुत।**

| विशेषणम् | विशेष्यम् |
|---|---|
| दृष्टिपूतः | वाणी |
| वस्त्रपूतम् | आचरणम् |
| मनःपूतम् | पादः |
| सत्यपूता | जलम् |

**श्लोकः ३–**

**१. एकवाक्येन उत्तरत।**

(अ) मनुजः कीदृशं धनं काङ्क्षेत ?

(आ) वृद्धं धनं कुत्र निक्षिपेत्?

**२. क्रमानुसारं रचयत।**

१) धनस्य रक्षणम्। (२) तीर्थेषु दानम्।

(३) धनस्य इच्छा। (४) धनस्य वर्धनम्।

**३. पदपरिचयं लिखत।**

| | मूलधातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| काङ्क्षेत | | | | |
| रक्षेत् | | | | |
| निक्षिपेत् | | | | |

**श्लोकः ४ –**

**१. एकवाक्येन उत्तरत।**

अ) क्रोधं केन जयेत्?

आ) दानेन किं जयेत्?

इ) सत्येन किं जयेत्?

**२. विरुद्धार्थकशब्दं लिखत।**

क्रोधः, असाधुः, सत्यम्, दानम्।

**३. श्लोकात् तृतीयान्तपदानि चित्वा लिखत।**

**४. सन्धिविग्रहं कुरुत।** चानृतम्।

**श्लोकः ५ –**

**१) एकवाक्येन उत्तरत।**

अ) दुःखे कान् पश्येत्?

आ) सुखाधिकान् कदा पश्येत् ?

**२. सन्धिविग्रहं कुरुत।**

शत्रुभ्यामिव, नार्पयेत्।

**३ विरुद्धार्थकशब्दं लिखत।**

सुखम्, अधिकम्, शोकः, शत्रुः।

**४) जालरेखाचित्रं पूरयत।**

[ ] — विधिलिङ्-क्रियापदानि — [ ]

**श्लोकः ६ –**

**१) एकवाक्येन उत्तरत।**

अ) प्रत्यहं किं प्रत्यवेक्षेत ?

आ) चरितं केन तुल्यं माऽस्तु ?

इ) चरितं केन तुल्यम् अस्तु ?

**२. सन्धिं कुरुत।**

अ) पशुभिः + तुल्यम् आ) किम् + नु

इ) सत्पुरुषैः + इति ई) नरः + चरितम्

**३ समानार्थकशब्दानां युग्मं चिनुत।**

| | |
|---|---|
| अ | प्रत्यहम् , नरः, चरितम्, पशुः, तुल्यः, सत्पुरुषाः |
| आ | वर्तनम्, मृगः, प्रतिदिनम्, मनुजः, सज्जनाः, समः |

**श्लोकः ७ –**

**१. एकवाक्येन उत्तरत।**

अ) नृपः अर्थान् कथं चिन्तयेत् ?

आ) नृपः कथं पराक्रमेत् ?

इ) नृपः कथम् अवलुम्पेत ?

ई) नृपः कथं विनिष्पतेत् ?

**२. लिङ्लकारस्य क्रियापदानि चिनुत।**

**३. श्लोकात् पशुद्वयं चिनुत लिखत च।**

**४. सन्धिं कुरुत।**

अ) शशवत् + च आ) च + अवलुम्पेत

इ) चिन्तयेत् + अर्थान्।

# क्रियापदं किं कथयति?–१

**'क्रियापदम्' इति वाक्यस्य महत्त्वपूर्णम् अङ्गम्।**

**बालकः** ग्रन्थं **पठति**। इति वाक्ये '**पठति**' इति क्रियापदम्।
तेन कस्य बोधः भवति ?

| | |
|---|---|
| (१) पठनस्य क्रिया | ✓ |
| (२) परस्मैपदम् | ✓ |
| (३) प्रथमः पुरुषः | ✓ |
| (४) एकवचनम् | ✓ |
| (५) लट्लकारः | ✓ |
| (६) धातोः गणविकरणम् | ✓ |
| (७) कर्तुः पुरुषः वचनं च | ? |

**अधुना एतानि वाक्यानि पठत।**

(१) **बालकः** ग्रन्थं **पठति**।
(२) **बालकौ** ग्रन्थं **पठतः**।
(३) **बालकाः** ग्रन्थं **पठन्ति**।
(४) **अहं** ग्रन्थं **पठामि**।
(५) **त्वं** ग्रन्थं **पठसि**।


एतेषु वाक्येषु क्रियापदं कर्तृपदस्य पुरुषं वचनं च अनुसरति। यदि कर्तृपदं परिवर्तते तर्हि क्रियापदम् अपि परिवर्तते अतः कर्तृप्रधानानि वाक्यानि इमानि।

'**पठति**' इति क्रियापदस्य श्रवणेनैव कर्ता प्रथमपुरुषस्य एकवचने इति ज्ञायते। तथैव '**पठामि**' इति पदेन कर्ता उत्तमपुरुषस्य एकवचने इति स्पष्टं भवति। एवं क्रियापदेन कर्तृपदस्य पुरुषस्य वचनस्य अपि बोधः भवति।

**कर्तृवाच्यः प्रयोगः। (कर्तरि प्रयोगः)**

| कर्ता | कर्म | क्रियापदम् |
|---|---|---|
| **प्रथमा विभक्तिः** | द्वितीया विभक्तिः | **कर्तृपदस्य पुरुषवचनानुसारम्** |


(१) मधुरा सुधाखण्डान् आनयति।




**क्रियापदं कर्तृपदम् अनुसरति।**

**अतः कर्तृवाच्यं क्रियापदम् इदम्।**

२) वयं ग्रन्थं पठामः।





**क्रियापदं कर्तृपदम् अनुसरति।**

**अतः कर्तृवाच्यं क्रियापदम् इदम्।**

# पञ्चमः पाठः । किं मिथ्या ? किं वास्तवम् ?

आधुनिकं तन्त्रज्ञानं मानवस्य कृते भौतिकविकासस्य विस्तीर्णं क्षेत्रम् उद्घाटयति इति तु सत्यमेव। तथापि तन्त्रज्ञानसाधनानाम् अत्यधिकोऽपयोगः नूतनान् प्रश्नान्, विघ्नान् सामाजिकसमस्याः च निर्माति। मिथ्या तथा च वास्तवम् एतयोः मध्ये भेदः ज्ञातव्यः अस्माभिः। आधुनिककालस्य इयमेवावश्यकता। – **लेखिका – श्रीमती मुग्धा रिसबूड।**




(त्रयोदशवर्षीया तनया सुखासन्दे उपविश्य एकेन हस्तेन कुर्कुरिकां खादति। अपरेण हस्तेन चलभाषं चालयति। तदानीं द्वारघण्टिकाम् आकर्ण्य माता द्वारम् उद्घाटयति। तनयायाः सख्यौ द्वारे एव स्थित्वा ताम् आह्वयतः।)



श्रुतिः – तनये, सत्वरं क्रीडनाय आगच्छ, बहिः खेलामः।

तनया – अहं गृहे एव खेलामि।

राजसी – किं खेलसि ?

तनया – (चलभाषं दर्शयित्वा) एतस्मिन् चलभाषे यष्टिकन्दुकक्रीडा, पादकन्दुकक्रीडा, वाहनक्रीडा, पत्रक्रीडा, चतुरङ्गक्रीडा, इत्यादयः सर्वाः क्रीडाः सन्ति। क्रीडाङ्गणं गत्वा खेलनस्य आवश्यकता एव नास्ति। अहं न आगच्छामि। (सख्यौ क्रीडार्थं निर्गच्छतः। माता पाकगृहं गच्छति। तनया चलभाषे युद्धक्रीडायां मग्ना।)

तनया – (स्वगतम्) एतस्यां क्रीडायाम् एषः सैनिकः मृतः अपरः च मारणीयः। ..... सर्वे सैनिकाः मृताः। हेऽऽ .....जितं मया। खेलः समाप्तः। (तनया पाकगृहं गच्छति।) अम्ब, बुभुक्षिता अस्मि।

माता – तनये, मम चलभाषे एतानि छायाचित्राणि पश्य। (तनया खाद्यपदार्थानां छायाचित्राणि पश्यति।)

तनया – मातः, पिझ्झा, पावभाजी, सिजलर्स इत्यादीनि खाद्यानि दृष्ट्वा लालायितं मे मुखम्। कृपया किमपि यच्छतु।

माता – चलभाषे दृष्टवती खलु ? अधुना खाद्यपदार्थानाम् आवश्यकता एव नास्ति। अहं न यच्छामि।

तनया – चलभाषे भोजनं दृष्ट्वा बुभुक्षा शान्ता कथं भवेत् ?

माता – यदि एतत् सत्यं, तर्हि कथं न जानासि यत् चलभाषेण क्रीडित्वा व्यायामः न भवति ? स्वास्थ्यरक्षणं न भवति ?

तनया – परं मातः, मह्यं रोचते तत् चलभाषेण क्रीडनम्।

माता – तनये, यद् यद् रोचते तत् तत् सर्वं स्वास्थ्यकरं, हितकरम्, आरोग्यपूर्णं न भवति। सम्यक् क्रीडा, पौष्टिकम् अन्नं, रात्रौ निद्रा आरोग्याय भवति। चलभाषे आभासात्मकं विश्वं न वास्तवम्।

तनया – तर्हि किं चलभाषस्य उपयोगः एव न करणीयः।

माता – तथा न। आवश्यकतानुसारं योग्यः उपयोगः करणीयः एव। किन्तु अति सर्वत्र वर्जयेत्।

तनया – आम् मातः। इतः परं चलभाषस्य योग्यम् उपयोगं करोमि।

## भाषाभ्यासः



**१. एकवाक्येन उत्तरत।**

अ. चलभाषे काः क्रीडाः सन्ति ?

आ. चलभाषे कीदृशं विश्वम् ?

इ. किं किं दृष्ट्वा तनयायाः मुखं लालायितम् ?

ई. स्वास्थ्यरक्षणाय किं किम् आवश्यकम् ?

**२. माध्यमभाषया उत्तरत।** अ) माता तनयायाः विचारपरिवर्तनं कथं करोति ?

आ) किं मिथ्या ? किं वास्तवम् ? इति पाठस्य तात्पर्यं लिखत।

**३. प्रश्ननिर्माणं कुरुत।** क) अहं गृहे एव खेलामि। ख) व्यायामं कृत्वा आरोग्यं वर्धते।

**४. अ) सन्धिविग्रहं कुरुत।** क) तदेव = ____ + एव। ख) नास्ति = न + ____।

**आ) कालवचनपरिवर्तनं कुरुत।**

१) अहं न आगच्छामि। (लङ्लकारे परिवर्तयत।)

२) बुभुक्षिता अस्मि। (बहुवचने परिवर्तयत।)

३) सख्यौ क्रीडार्थं प्रतिगच्छतः। (एकवचने लिखत।)

४) एतानि छायाचित्राणि पश्य। (उत्तमपुरुषे परिवर्तयत।)

**इ) शब्दस्य वर्णविग्रहं कुरुत।** १) द्वारम् २) स्वास्थ्यम् ३) बुभुक्षा ४) पौष्टिकम्

**ई) मेलनं कुरुत।**

| विशेष्यम् | विशेषणम् |
|---|---|
| १. बुभुक्षा | १. पौष्टिकम् |
| २. सैनिकाः | २. शान्ता |
| ३. खेलः | ३. आभासात्मकम् |
| ४. अन्नम् | ४. समाप्तः |
| ५. विश्वम् | ५. मृताः |

**उ) पाठात् त्वान्त-ल्यबन्त-तुमन्त-अव्ययानि चिनुत लिखत च।**

**५. त्वान्तपदं निष्कास्य वाक्यं पुनर्लिखत।**

अ) रात्रौ शीघ्रं निद्रां कृत्वा प्रातःकाले शीघ्रम् उत्तिष्ठामि।

आ) द्वारघण्टिकाम् आकर्ण्य माता द्वारम् उद्घाटयति।

**६. अ) समानार्थकशब्दं चिनुत।** भटः, क्रीडा, जननी, क्षुधा, स्वापः।

**आ) विरुद्धार्थकशब्दं लिखत।** समाप्तः, स्वास्थ्यम्, आभासात्मकम्, मृतः।

**७. चलभाषद्वारा द्वयोः मित्रयोः संवादं लिखत।**

# रम्यसंस्कृतम्। क: कृतवान्? का कृतवती?


बाल: जलं पिबति।


बाल: जलं **पीतवान्**।


अनीश: गच्छति।


अनीश: **गतवान्**।


छात्रा: खेलन्ति।


छात्रा: **खेलितवन्त:**।


वयं पठाम:।


वयं **पठितवन्त:**।


महिला क्षिपति।


महिला **क्षिप्तवती**।


दीपा नृत्यति।


दीपा **नर्तितवती**।


ता: प्रक्षालयन्ति।


ता: **प्रक्षालितवत्य:**।


छात्रा: लिखन्ति।


छात्रा: **लिखितवत्य:**।

पीतवान्, गतवान्, खेलितवन्त:, पठितवन्त: इत्यादीनि भूतकालवाचकानि क्तवतु-प्रत्ययान्त-विशेषणानि।

## सम्भाषापत्रम्



### १. मेलनं कुरुत।

| | |
|---|---|
| १. शिक्षका: | सुप्तवती। |
| २. बालिका: | प्रविष्टवन्त:। |
| ३. रक्षक: | पूजितवत्य:। |
| ४. बिडाली | ताडितवान्। |

### २. शुद्धं वा अशुद्धम्?

१. सिंह: तं हतवान्।
२. ते बालका: अन्नं न त्यक्तवन्त:।
३. आपणिक: देवं नतवती।
४. एता: अद्य क्रीडितवन्त:।
५. अहं शाकानि कर्तितवान्।

३. तालिकां पूरयत।

| | सः | ते | सा | ताः |
|---|---|---|---|---|
| खादति | खादितवान् | खादितवन्तः | खादितवती | खादितवत्यः |
| करोति | कृतवान् | कृतवन्तः | कृतवती | कृतवत्यः |
| वदति | | | उक्तवती | |
| पश्यति | | दृष्टवन्तः | | |
| गायति | | | | गीतवत्यः |
| मिलति | मिलितवान् | | | |
| उपविशति | | उपविष्टवन्तः | | |
| उत्तिष्ठति | | | | उत्थितवत्यः |
| स्मरति | | | स्मृतवती | |
| नयति | नीतवान् | | | |
| यच्छति | | | | दत्तवत्यः |
| पूजयति | | पूजितवन्तः | | |
| स्नाति | | | स्नातवती | |
| प्राप्नोति | प्राप्तवान् | | | |
| लभते | | | | लब्धवत्यः |

४. परिच्छेदे क्तवतु-रूपाणि अधोरेखितानि कुरुत।

दीपावलि-उत्सवसमयः आसीत्। जनाः गृहाणि स्वच्छीकृतवन्तः। माता मिष्टान्नानि कृतवती। जनकः नूतनवस्त्राणि क्रीतवान् किन्तु स्फोटकानि न आनीतवान्। भगिनी सुन्दरीं रङ्गवल्लीम् आलिखितवती। महिलाः मृद्दीपान् प्रज्वाल्य स्थापितवत्यः। अहं मित्रैः सह भ्रमणार्थं बहिः गतवान्। सर्वत्र हर्षः प्रकाशः च।

५. लङ्लकारस्य स्थाने क्तवतु-रूपाणि योजयित्वा परिच्छेदं लिखत।

गते रविवासरे वयं सर्वे भ्रमणार्थम् अगच्छाम। मातुलः विविधफलानि आनयत्। भ्रातरः क्रीडासाहित्यं समचिन्वन्। पितृव्या कूप्यः अपूरयत। अन्ये यानेन अगच्छन्। अहं मम पित्रा सह द्विचक्रिकया अगच्छम्। तत्र वयं विविधाः क्रीडाः अक्रीडाम। मातुलानी मधुरं गीतम् अगायत्। भगिन्यः अपि बहूनि गीतानि अगायन्। मध्याह्ने माता कटम् अस्थापयत् भोजनसाहित्यं च अरचयत।


पठत अवगच्छत ! स्वराणां सृष्टिः।

सन्धिविग्रहं कृत्वा परिच्छेदं लिखत।

अहं कृषकः। नास्ति अस्माकं जीवने स्थिरता। तथापि आदिनं वयं क्षेत्रे श्राम्यामः। अधुना तु विविधानि यन्त्राण्यपि सहायकानि भवन्ति। तज्ज्ञानां कृषिविषयकं मार्गदर्शनम् अप्युपयुक्तम्। आकाशवाण्यैव वयं कृषिविषयकान् कार्यक्रमान् आकर्णयामः। एतेनैव वयं विकसिताः भवामः। इतः अप्यधिकं साहाय्यम् आवश्यकम् एव। तन्त्रज्ञानेनाहं परिपूर्णः। अहमपि देशस्य विकासायैव श्राम्यामि। यतः कृषिविकासेनैव राष्ट्रं वैभवं विन्दतीति निश्चितम्।

# षष्ठः पाठः । वीरवनिता विश्पला।

ऋग्वेदात् उद्धृता अतीव अद्भुता रोमाञ्चकारिणी च एषा कथा स्त्रीणां सामर्थ्यं दर्शयति (ऋ.१.११६.१५)। शस्त्रक्रियाविशारदौ अश्विनीकुमारौ प्रगतवैद्यकतन्त्रज्ञानस्य मूलाधारौ स्तः। विश्पलायाः चरित्रं प्रेरणादायकं खलु सर्वेषां कृते। – **सम्भाषणसन्देश–मासिकात्**।






खेलराजः नाम कश्चित् नृपः। विश्पला तस्य पत्नी। सा यथा महाविदुषी आसीत्, तथैव रणकुशला अपि आसीत्। खेलराजः अपि शूरः पराक्रमी च आसीत्। सः विश्पलया सह सुखेन जीवति स्म।

अथ कदाचित् शत्रवः खेलराजस्य राज्ये आक्रमणं **कृतवन्तः**। महत् युद्धम् आरब्धम्। सेनायाः नायकः खेलराजः रणरङ्गं **प्रविष्टवान्**। विश्पला अपि रणरङ्गं **प्रविष्टवती**। भुवम् अवतीर्णा चामुण्डेश्वरी इव सा शत्रूणां संहारं **कृतवती**। तस्याः शौर्यं पराक्रमं च दृष्ट्वा शत्रवः अपि चकिताः अभवन्।

'एषा रणरङ्गात् यावत् न निवार्यते तावत् जयः सर्वथा न प्राप्यते' इति चिन्तयित्वा शत्रुसैनिकाः युगपत् आक्रम्य ताम् **अवरुद्धवन्तः**। शत्रुसैनिकाः ते असङ्ख्याः आसन्, विश्पला तु एकाकिनी ! तथापि तस्याः मनसि न भीतिलेशः अपि आसीत्। प्रत्युत द्विगुणितेन उत्साहेन युद्धं **कृतवती**। युद्धसमये शत्रुसैनिकाः तस्याः एकं पादं **कर्तितवन्तः**। अनन्तरम् 'इतः परम् एतस्याः कारणात् पीडा न भविष्यति' इति निर्णयं कृत्वा ते शिबिरं **प्रतिगतवन्तः**।



यद्यपि विश्पलायाः पादः भग्नः तथापि सा हतोत्साहा न जाता। चैतन्यमूर्तिः सा वीराङ्गना एव आसीत्। 'श्वः मया युद्धं करणीयम् एव' इति निश्चित्य सा पादं पुनः प्राप्तुम् ऐच्छत्। अतः सा निश्चलतया उपविश्य अश्विनीकुमारयोः ध्यानं **कृतवती**। तस्याः



भक्ते : कारणात् अश्विनीकुमारौ लोहयुक्तं पादं योजयित्वा तां यथापूर्वं **कृतवन्तौ**। एतस्मात् विश्पला यथापूर्वं चलितुं युद्धं कर्तुं च समर्था जाता।

अनन्तरदिने प्रातः सा महता उत्साहेन रणरङ्गम् **आगतवती**। रणरङ्गे तां दृष्ट्वा एव शत्रुसैनिकाः चकिताः भीताः च। तस्याः दर्शनमात्रेण एव तेषां धैर्यं नष्टं जातम्। सा यदा आयुधप्रहारम् **आरब्धवती** तदा ते सर्वथा हतोत्साहाः जाताः। विश्पला शत्रून् कदलीवृक्षान् इव लीलया **कर्तितवती**। सहस्राधिकाः सैनिकाः तया संहताः।

एवं विश्पलायाः शौर्यस्य कारणतः तस्मिन् युद्धे खेलराजस्य एव जयः अभवत्।

वीरवनिता विश्पला भर्त्रा सह रणरङ्गं प्रविश्य शौर्येण युद्धं **कृतवती**। पादकर्तनानन्तरमपि अश्विनीकुमारयोः अनुग्रहेण पादं पुनः **प्राप्तवती** शत्रून् **संहतवती** च। एतेन साहसेन सा वेदवाङ्मये बहुधा प्रशंसिता।

विश्पलाया शौर्यं तथा च अश्विनीकुमारयोः शल्यक्रियाकौशलं स्मरन्तु इति अस्मान् उपदिशति इतिहासः।

**भाषाभ्यासः** 

**१. उचितं पर्यायं चित्वा रिक्तस्थानानि पूरयत।**

अ) शत्रवः ____। (कृतवान्/कृतवन्तः)
आ) खेलराजः ____। (प्रविष्टवन्तः/प्रविष्टवान्)
इ) विश्पला ____। (प्रविष्टवान्/प्रविष्टवती)
ई) सा युद्धं ____। (कृतवान्/कृतवती)
उ) शत्रुसैनिकाः ____। (अवरुद्धवन्तौ/अवरुद्धवन्तः)
ऊ) सैनिकाः शिबिरं ____। (गतवन्तः/गतवन्तौ)
ए) शत्रुसैनिकाः पादं ____। (कर्तितवन्तः/कर्तितवन्तौ)
ऐ) सा रणाङ्गणम् ____। (आगतवत्यौ/आगतवती)
ओ) विश्पला ध्यानम् ____। (आरब्धवान्/आरब्धवती)
औ) अश्विनीकुमारौ तां यथापूर्वं ____। (कृतवन्तौ/कृतवत्यौ)

**२. स्तम्भमेलनं कुरुत।**

| | | | | | |
|---|---|---|---|---|---|
| अ | १. लोहयुक्तम् | २. वीराङ्गना | ३. भीताः | ४. महत् | ५. शूरः |
| आ | १. युद्धम् | २. शत्रुसैनिकाः | ३. खेलराजः | ४. पादम् | ५. विश्पला |

**३. अधोदत्तेषु विशेषणेषु यानि विशेषणानि विश्पलां न वर्णयन्ति तानि पृथुक् कुरुत।**

चकिताः, प्रशंसिता, भीता, समर्था, निश्चला, एकाकिनी, चैतन्यमूर्तिः, अवरुद्धा, चामुण्डेश्वरी, महाविदुषी, रणकुशला, शूरः, नायिका, दुःखिता।

**४. माध्यमभाषया उत्तरं लिखत।** १. विश्पलायाः शौर्यस्य वर्णनं कुरुत ।
२. विश्पला अश्विनीकुमारयोः ध्यानं किमर्थं कृतवती ?

५. पाठात् धातुसाधित-अव्ययानि चिनुत पृथक्कुरुत च।

६. समानार्थकशब्दं पाठात् लिखत। अरिः, चरणः, वीर्यम्, सङ्गरः, रणाङ्गणम्, रक्षकाः, पण्डिता, वीक्ष्य, वेदना, अगणिताः।

७. विरुद्धार्थकशब्दं पाठात् लिखत। मित्रम्, कातरता, असमर्था, कातरः, पराजयः।

८. रिक्तस्थानं पूरयत।

| पुंलिङ्गम् | स्त्रीलिङ्गम् | पुंलिङ्गम् | स्त्रीलिङ्गम् | पुंलिङ्गम् | स्त्रीलिङ्गम् |
|---|---|---|---|---|---|
| पतिः | ____ | भीतः | ____ | ____ | नायिका |
| रणकुशलः | ____ | एकाकी | ____ | ____ | समर्था |
| ____ | शूरा | ____ | हतोत्साहा | राजा | ____ |

**मौखिककार्यम्-अधोदत्तं कार्यं केन कृतम् इति लिखत।**

(अ) सेनायाः नायकत्वस्य स्वीकरणम्। (आ) राज्ये आक्रमणम्।
(इ) खेलराजस्य पश्चात् रणरङ्गं प्रवेशः। (ई) जयं प्राप्तुं युगपत् आक्रमणम्।
(उ) द्विगुणित-उत्साहेन युद्धम्। (ऊ) एकपादकर्तनम्।
(ए) शिबिरं प्रत्यागमनम्। (ऐ) विश्पलायाः दर्शनमात्रेण धैर्यनाशनम्।
(ओ) सहस्राधिकसैनिकानाम् संहरणम्। (औ) आयुधप्रहारेण उत्साहनाशनम्।

**गायत नन्दत !**

**धीवरगानम्**

नायकः - आयाहि रेऽऽ ! आयाहि रेऽऽ ! आयाहि रेऽऽ !
विहायसि सराग-रश्मि-चन्द्रमाः
तनोति सान्द्र-रोचि-मञ्जु-चन्द्रिकाः
सिन्धुरावघोषिताः रोदसीकन्दराः
यान्तु यानपात्रचालकाः सधीवराः ।।आयाहि।।
अनुयायिनः - याहि रे ! याहि रे ! याहि रे ! याहि रे ! याऽऽहि।।
नायकः - चन्द्रहासमज्जिता तामसी प्रिया
सर्व-देह-कान्ति-पुञ्ज-मञ्जु-वल्गना
निश्चला विभासते तारलोचना
यान्तु यानपात्रचालकाः सधीवराः ।।आयाहि।।
अनुयायिनः - याहि रे ! याहि रे ! याहि रे ! याहि रे ! याऽऽहि।।
नायकः - सागरेण चुम्बिता चन्द्रिका मुदा
राजते विलास-हास-लास्य-चित्रिता
रागिणीव भासते रागरञ्जिता
यान्तु यानपात्रचालकाः सधीवराः ।।आयाहि।।
अनुयायिनः - याहि रे ! याहि रे ! याहि रे ! याहि रे ! याऽऽहि।।

**-श्री. परिक्षित् शर्मा**

**खेलत नन्दत !** **स्वराणां सृष्टिः।**

**बुद्धिजालं पूरयत।**

१. अ + इ =
२. आ + अ =
३. अ + ई =
४. इ + अ =
५. ई + अ =
६. अ + ऊ =
७. अ + अ =
८. ऊ + अ =
९. अ + ऐ =
१०. अ + उ =
११. अ + ऋ =
१२. अ + औ =
१३. उ + अ =
१४. अ + ओ =
१५. ऋ + अ =
१६. अ + ए =

# उपपदविभक्तय: (धातव:)।

१. गम् = (**द्वितीया**) पाण्डवा: **हस्तिनापुरम्** अगच्छन्।
२. कुप् = (**चतुर्थी**) माता **शिशवे** कदापि न कुप्येत्।
३. क्रुध् = (**चतुर्थी**) स्वामिनी **भृत्याय** क्रुध्यति।
४. दा-यच्छ् = (**चतुर्थी**) शिष्या: **गुरवे** दक्षिणां यच्छन्तु।
५. कथ् = (**चतुर्थी**) अप्सरसौ **देवेन्द्राय** वृत्तान्तम् अकथयताम्।
६. रक्ष् = (**पञ्चमी**) कृष्ण: **सङ्कटात्/आपद:** गोपालान् रक्षति।
७. वि + रम् = (**पञ्चमी**) त्वं **वृथाकलहात्** विरम।
८. स्निह् = (**सप्तमी**) वयं **भ्रातृषु** स्निह्येम।
९. रुच् = (**चतुर्थी**) **नरेन्द्राय** व्यायाम: रोचते।
१०. स्पृह् = (**चतुर्थी**) गौरी **कुण्डलाय** स्पृहयति।



**गणेशाय** मोदका: रोचन्ते।
गणेश: **मोदकेभ्य:** स्पृहयति।



**शिवाय** बिल्वपत्राणि रोचन्ते।
शिव: **बिल्वपत्रेभ्य:** स्पृहयति।



**महालक्ष्म्यै** कमलं रोचते।
महालक्ष्मी: **कमलाय** स्पृहयति।

एष: निखिल:। **निखिलाय** किं किं रोचते?



**निखिलाय**



लड्डुका: रोचन्ते।




शाला रोचते।



पुस्तकानि रोचन्ते।



गणितसंस्कृते रोचेते।

एषा काश्मीरा। काश्मीरा **कस्मै/कस्यै** स्पृहयति ?



काश्मीरा



**कण्ठहाराय** स्पृहयति।



**शशकाभ्यां** स्पृहयति।



**जलक्रीडायै** स्पृहयति।




**वेणवे** स्पृहयति।

# सप्तमः पाठः । योगमाला ।

योगाचरणेन मानवजीवनं निरामयं, सुन्दरं, दीर्घं स्वस्थं च भवति। शारीरिक-मानसिक-आत्मिक-बलसम्पादनार्थं योगः अतीव लाभप्रदः एव। 'संयुक्तराष्ट्रमहासभया'(UNO) जूनमासस्य एकविंशतिदिनाङ्कः (२१ जून) विश्वयोगदिवसः घोषितः।

प्रस्तुतः पद्यांशः 'हठयोगप्रदीपिका'नाम्नः ग्रन्थात् उद्धृतः अस्ति। पञ्चदशे शतके **स्वात्माराम-योगी-महोदयेन** एषः ग्रन्थः रचितः। ग्रन्थस्य भाषा अतीव सरला सुबोधा च अस्ति।

समाधानाय सौख्याय नीरोगत्वाय जीवने।
योगमेवाभ्यसेत् प्राज्ञो यथाशक्ति निरन्तरम्।।।।१।।




**हठस्य प्रथमाङ्गत्वाद आसनं पूर्वमुच्यते।**
**कुर्यात्तदासनं स्थैर्यमारोग्यं चाङ्गलाघवम्।।१।।**

[हठस्य प्रथम-अङ्गं तावत् आसनं तत् प्रथमम् उच्यते। आसनं स्थैर्यम् आरोग्यम् अङ्गलाघवं च कुर्यात्।]



**वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा**
**दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम्**
**अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकयेद्**
**एतद् व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते।।२।।**



[वाम-ऊरु-उपरि दक्षिणं चरणं संस्थाप्य, दक्ष-ऊरु-उपरि वामं चरणं संस्थाप्य पश्चिमेन विधिना कराभ्यां दृढम् अङ्गुष्ठौ धृत्वा, हृदये चिबुकं निधाय, नासाग्रम् आलोकयेत्। एतद् यमिनां व्याधिविनाशकारि **पद्मासनं** प्रोच्यते]

**पादाङ्गुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि।**
**धनुराकर्षणं कुर्याद् धनुरासनमुच्यते।।३।।**



[पाणिभ्यां पादाङ्गुष्ठौ गृहीत्वा श्रवणावधि धनुराकर्षणं कुर्यात् (तत्) **धनुरासनम्** उच्यते।]



**प्रसार्य पादौ भुवि दण्डरूपौ**
**दोर्भ्यां पदाग्रद्वितयं गृहीत्वा।**
**जानूपरिन्यस्तललाटदेशो**
**वसेदिदं पश्चिमतानमाहुः।।४।।**

[भुवि पादौ दण्डरूपौ प्रसार्य, दोर्भ्यां (हस्ताभ्याम्) पदाग्रद्वितयं गृहीत्वा जानूपरि न्यस्तललाटदेशः वसेत्। इदं **पश्चिमतानम्** आहुः।]

**वामोरुमूलार्पितदक्षपादं**
**जानोर्बहिर्वेष्टितवामपादम्।**
**प्रगृह्य तिष्ठेत् परिवर्तिताङ्गः**
**श्रीमत्स्यनाथोदितमासनं स्यात्।।५।।**



[वामोरु-मूलार्पित-दक्षपादं, जानोः बहिः वेष्टित-वामपादं-प्रगृह्य परिवर्तिताङ्गः तिष्ठेत् (तत्) श्री**मत्स्यनाथोदितमासनं** स्यात्।]

**उत्तानं शववद् भूमौ शयनं तच्छवासनम्।**
**शवासनं श्रमहरं चित्तविश्रान्तिकारकम्।।६।।**



[भूमौ उत्तानं शववत् शयनं तत् **शवासनम्**। शवासनं, श्रमहरं, चित्तविश्रान्तिकारकम् (अस्ति)।]

**अत्याहारः प्रयासश्च प्रजल्पो नियमाग्रहः।**
**जनसङ्गश्च लौल्यं च षड्भिर्योगो विनश्यति।।**

[अत्याहारः, प्रयासः, प्रजल्पः, नियमाग्रहः जनसङ्गः लौल्यं च षड्भिः योगः विनश्यति।]


## भाषाभ्यासः




### १. माध्यमभाषया उत्तरत।

अ) शवासनं कथं हितकरं भवति ?
आ) मत्स्येन्द्रासनस्य कृतिं वर्णयत।
इ) पद्मासनस्य वर्णनं कथं कृतम् ?
ई) योगासनैः के लाभाः भवन्ति ?

### २. जालचित्रं पूरयत।




### ३. चित्राणि दृष्ट्वा आसननामानि अन्विष्यत लिखत च।







**पठत बोधत !**



योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत् तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।



पादौ हस्तौ जानुनी द्वे उरश्चाथ ललाटकम्।
अष्टाङ्गेन स्पृशेद् भूमिं साष्टाङ्गप्रणतिश्च सा।।

आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने।
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते।।

# अष्टमः पाठः । पिन्कोड्-प्रवर्तकः, महान् संस्कृतज्ञः !

गौरवः – अरे अमेय, कुत्र गच्छसि ?
अमेयः – समीपे एव पत्रपेटिका वर्तते। मातुलं प्रति पत्रं प्रेषयितुं तत्र गच्छामि।
गौरवः – दर्शय पत्रम्। अपि बेङ्गलुरुनगरे निवसति तव मातुलः ? तत् तु अतीव दूरे किल ? कदा पत्रं विन्देत् सः ?
अमेयः – सामान्यतः त्रीणि दिनानि अपेक्षितानि तदर्थम्।
गौरवः – त्रीणि दिनानि एव ? एतावत् शीघ्रम् ?
अमेयः – सत्यम्।
गौरवः – किन्तु सङ्केतः तु देवनागरीलिप्यां लिखितः। कर्णाटके तु कन्नडलिपिः प्रयुज्यते नु ? तर्हि कथं पत्रवाहकः तत् पठितुं शक्नुयात् ?
अमेयः – पश्य एतत्। सङ्केतस्य अन्ते आङ्ग्लभाषया कश्चन क्रमाङ्कः लिखितः अस्ति। जानासि खलु तद्विषये ?
गौरवः – आम्, सः तु पिन्कोड्क्रमाङ्कः। अहं पत्रं न लिखामि किन्तु सद्यस्क-क्रयणसमये (Online Shopping) पिन्कोड्क्रमाङ्कः अनिवार्यः एव। इतोऽपि च अस्माकं विभागे ATM शाखाः, रुग्णालयाः, विशिष्टसेवाः वा कुत्र सन्ति इति ज्ञातुं पिन्कोड्क्रमाङ्कः आवश्यकः एव।

अयि मित्राणि, भारतसदृशे विशाले देशे सुदूरप्रान्तेभ्यः अन्यप्रान्तं प्रति प्रेषितानि पत्राणि विना विलम्बं विना प्रमादं कथं लभ्यन्ते? वयम् अस्माकं निवासविभागे पत्रपेटिकायां पत्रं क्षिपामः। ततः तत् पत्रालयं प्रति गच्छति। ततः च निर्दिष्टं स्थानं प्रति प्राप्नोति। कथं शक्या भवति एषा वितरणव्यवस्था? 'पिन्कोड्प्रणालिः' इत्येव एतस्य प्रश्नस्य उत्तरम्। पिन्कोड्क्रमाङ्कः नाम पत्रसङ्केतस्य अन्ते लिखिताः षट् सङ्ख्याः। पिन्कोड् नाम स्थानसङ्केताङ्कः। (PIN - Postal Index Number). ऑगस्ट १९७२-तमे ख्रिस्ताब्दे स्वातन्त्र्यदिनसमारोहे प्रधानमन्त्रि-इन्दिरा-गान्धी-महोदयायै उपहारीकृता एषा महत्त्वपूर्णा प्रणालिः। केन खलु प्रवर्तिता इयं सङ्केताङ्कप्रणालिः ? सः पत्रालय-अधिकारी आसीत् संस्कृतपण्डितः गणितज्ञः **श्रीराम-भिकाजी-वेलणकरमहोदयः**।




सः कोलकतानगरे डाकतारविभागस्य निर्देशकरूपेण कार्यरतः आसीत्। तस्य कार्यकाले एकस्मिन् दिने कोऽपि दुःखितः केरल-प्रदेशीयः सैनिकः महोदयं मेलितुम् आगतः। सः तस्य पित्रोः स्वास्थ्यविषये किञ्चिदपि ज्ञातुम् असमर्थः। यतः तदा पत्रस्य प्रवासकालः केरलतः अरुणाचलप्रदेशपर्यन्तं क्वचित् मासाधिकोऽपि आसीत्। तेन पं. वेलणकरमहोदयस्य चिन्तनम् आरब्धम्, 'कथं पत्रस्य प्राप्तिकालं न्यूनं कर्तुं शक्नोमि?' दुर्बोधं हस्ताक्षरं, भिन्नाः प्रान्तीयाः भाषाः, अपूर्णः पत्रसङ्केतः इति नैके प्रत्यूहाः। अतः गणितज्ञेन तेन अङ्कानाम् उपयोगः कृतः। तेन देशस्य अष्ट विभागाः कृताः। तेषां च उपविभाग-जनपदाधारेण क्रमाङ्कनं कृतम्। तेन अधुनापि वयं विनायासं शीघ्रं पत्रं लभामहे।

अनुशासनप्रियस्य वेलणकरमहोदयस्य सङ्गीतमपि प्रियः विषयः। सः व्हायोलिनवादने तथा तबलावादनेऽपि

अतीव निपुणः। अतः एव सः 'गीतगीर्वाणम्' इति सङ्गीतविषयकं शास्त्रीयग्रन्थं संस्कृतेन रचितवान्। कथाः, गीतानि, बालगीतानि, नृत्यनाट्यम् इति बहुविधाः रचनाः तेन कृताः तथापि नाट्यलेखनं तस्य अभिमतः साहित्यप्रकारः। लेखनं, दिग्दर्शनं, नाट्यनिर्मितिः, व्यवस्थापनं, सङ्गीतसंयोजनम् इति सर्वमेव कर्तुं सः समर्थः अतः ''सबकुछ श्रीभिः'' इति तस्य नाटकानां ख्यातिः आसीत्।

धन्यः सः विद्वद्वरेण्यः येन वयं पिन्कोड्प्रणाल्या उपकृताः।

## भाषाभ्यासः



### १. उचितं पर्यायं चिनुत।

अ) पत्रवाहकः किं पठित्वा पत्रं वितरति ?

(१) देवनागरीलिपीम् (२) कन्नडलिपीम् (३) आङ्ग्लभाषाम् (४) सङ्केतक्रमाङ्कम्

आ) पिन्कोड्क्रमाङ्कः अत्र न आवश्यकः।

(१) रुग्णालये (२) सद्यस्क-क्रयणे (३) ATM शाखा-अन्वेषणे (४) पुस्तकपठने

इ) पिन्कोड्-प्रणालिः केन समारब्धा ?

(१) इन्दिरामहोदयया (२) गान्धीमहोदयेन (३) प्रधानमन्त्रिणा (४) वेलणकरमहोदयेन

ई) पिन्कोड्क्रमाङ्के कति सङ्ख्याः ? (१) ६ (२) ४ (३) ३ (४) २

### २. वेलणकरमहोदयस्य कार्यवैशिष्ट्यानि माध्यमभाषया लिखत।

### ३. एकवाक्येन उत्तरत।

अ) वेलणकरमहोदयस्य कः प्रियः विषयः ? आ) वेलणकरमहोदयः के वाद्ये वादयति स्म ?

इ) वेलणकरमहोदयेन रचितः सङ्गीतविषयकः ग्रन्थः कः ?

ई) पिन्कोड्प्रणालिनिमित्तं वेलणकरमहोदयेन देशस्य कति विभागाः कृताः ?

उ) वेलणकरमहोदयः कस्य विभागस्य निर्देशकः आसीत् ?


ऊ) वेलणकरमहोदयस्य अभिमतः साहित्यप्रकारः कः ?

### ५. विशेषणानि अन्विष्य लिखत।

अ) ______ प्रणालिः। आ) ______ सैनिकः।

इ) ______ भाषाः। ई) ______ हस्ताक्षरम्।

ए) ______ विषयः। ऐ) ______ रचनाः।




**अन्विष्यत लिखत च।**

१. एताः सङ्ख्याः किं निर्दिशन्ति।

| | | | | | |
|---|---|---|---|---|---|
| 4 | 0 | 0 | 0 | 7 | 9 |
| ? | ? | ? | ? | ? | ? |

२. विविधदेशेषु अपि पत्रसङ्केताङ्कप्रणालिः वर्तते वा ?



वेलणकरमहोदयेन लिखितानि नाटकानि।
सङ्गीतसौभद्रम्।
कालिदासचरितम्। जन्म रामायणस्य।
तनयो राजा भवति कथं मे ? राज्ञी दुर्गावती।
रणश्रीरङ्गम्। (त्रीणि नाटकानि) कालिन्दी।
स्वातन्त्र्यलक्ष्मीः (नभोनाट्यम्)।
स्वातन्त्र्यचिन्तामणिः (नभोनाट्यम्)।
कौटिलीयार्थनाट्यम् (दूरदर्शनमालिका)।

संस्कृतसाहित्ये वेलणकरमहोदयरचिताः शताधिकाः संस्कृतग्रन्थाः। तेषु नाटक-काव्य-सङ्गीतिका-नृत्य-नाट्य-विलोमकाव्यानि इत्यादयः विविधाः साहित्यप्रकाराः प्रसिद्धाः।

## येवलादर्शनम्।

**महाराष्ट्रराज्यपर्यटनमहामण्डलम्** – महाराष्ट्रम् इति प्रख्यातं राज्यं भारतदेशे। भौगोलिक-सामाजिक-सांस्कृतिक-ऐतिहासिक-आदिदृष्ट्या सम्पन्नं राज्यमेतत्। अत्र बहूनि पर्यटनस्थलानि प्रसिद्धानि सन्ति। तेषु 'येवला' विषयकं विवरणम् अत्र कृतम् अस्ति।

**भौगोलिकस्थानम्** – महाराष्ट्रे नाशिकमण्डले येवला इति प्रसिद्धं नगरम् अस्ति।

**प्रकृतिः** – प्राकृतिक-सौन्दर्येण विलसति एषा नगरी। अत्र निसर्गशोभा अवर्णनीया।



**प्रख्यातानि स्थलानि** –

**तात्याटोपेजन्मस्थलम्**– वीर-स्वातन्त्र्यसेनानी-तात्याटोपे-महोदयस्य इदं जन्मस्थलम्। तात्याटोपेमहाभागस्य प्रतिमा अत्र विलसति।

**तिलकमैदानस्थलम्** – अत्र एव लोकमान्यतिलकमहाभागः भाषणम् अकरोत्।



**पैठणी-निर्मिति-केन्द्रम्** – पैठणी इति महाराष्ट्रस्य विख्यातः शाटिकाप्रकारः। येवला इति पैठणीशाटिकायाः विश्वप्रसिद्धम् उद्योगकेन्द्रम्। पैठणीशाटिकायाः ग्राहकाः देशविदेशेभ्यः अपि येवलानगरम् आगच्छन्ति।

**उत्सवाः**– येवलापत्तने रङ्गोत्सवः, विजयादशमी, मकरसङ्क्रान्तिः इत्यादयः वैशिष्ट्यपूर्णाः उत्सवाः उत्साहेन सम्पद्यन्ते।

**समीपवर्तीनि स्थलानि** –

**अनकाईदुर्गः**– येवलापत्तनस्य उत्तरस्यां दिशि नातिदूरस्थितः सुविख्यातः अनकाईदुर्गः।

**शिर्डीतीर्थक्षेत्रम्**– दक्षिणस्यां दिशि श्रीसाईबाबागुरूणां शिर्डीनगरं सुविख्यातम्।

**त्र्यम्बकेश्वरक्षेत्रम्** – पश्चिमस्यां दिशि श्रीक्षेत्रत्र्यम्बकेश्वरनगरं वर्तते।

**कोटमगावतीर्थक्षेत्रम्**– पूर्वदिशि कोटमगावस्थित-जगदम्बायाः मन्दिरं प्राचीनतमम्।

**कथं गन्तव्यम्?** – **बसमार्गेण** अथवा **स्ववाहनेन** ⇒ नाशिकतः ९५ किमी. दूरे येवलानगरम् अस्ति।

**रेलयानेन** ⇒ मध्यरेल विभागस्य येवला प्रसिद्धं रेलस्थानकम्।

**विमानयानेन** ⇒ समीपस्थं विमानपत्तनम् औरंगाबादनगरम् (१४० किमी.दूरे) अस्ति।

येवलादर्शनार्थं त्रि/पञ्च/सप्त दिनानां सम्पुटित-मूल्ययुक्ता-पर्यटनव्यवस्था अस्ति।

**इतोऽपि अधिकं विवरणार्थम् अत्र सम्पर्कः साधनीयः** –

**दूरवाणी ०२५५९-६५४३२१**

**कृतिः १.** 'येवलादर्शन'स्थाने स्वनगरवर्णनं/प्रियनगरवर्णनं लिखत।



## भाषासूत्रम् – २

### (अ) विधिलिङ्लकारः। (विध्यर्थः)

छात्राः **पठन्तु**। (अपेक्षायाः बोधः) छात्राः **पठेयुः**। (शक्यतायाः बोधः)

**विध्यर्थः (विधि + अर्थः)**
उपदेशः, आशीर्वादः, प्रार्थना, कर्तव्यम्, शक्यता, भविष्यत्कालनिर्देशः इत्यादयः।

१. **लालयेत्** पञ्चवर्षाणि दशवर्षाणि **ताडयेत्**। (कर्तव्यम्) २. **जीवेत्** शरदः शतम्। (आशीर्वादः)
३. प्राप्ते तु षोडशे वर्षे पुत्रे मित्रवद् **आचरेत्**।। (कर्तव्यम्) ४. सर्वे सुखिनः **भवेयुः**। (आशीर्वादः)
५. **लभेत** सिकतासु तैलमपि यत्नतः पीडयन्। (शक्यता) ६. मतिमान् स्वस्थानं न **परित्यजेत्**। (उपदेशः)
७. अहम् अभिनेता/अभिनेत्री **भवेयम्**। (भविष्यत्कालः) ८. छात्रः प्रत्यूषे **उत्तिष्ठेत्**। (उपदेशः)

परस्मैपदम् **विधिलिङ्प्रत्ययाः (विध्यर्थः)** आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| इत् | इताम् | इयुः | प्रथमः | ईत | ईयाताम् | ईरन् |
| इः | इतम् | इत | मध्यमः | ईथाः | ईयाथाम् | ईध्वम् |
| इयम् | इव | इम | उत्तमः | ईय | ईवहि | ईमहि |

पठ् (१ प.प.) रम् (१ आ.प.)

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| पठेत् | पठेताम् | पठेयुः | प्रथमः | रमेत | रमेयाताम् | रमेरन् |
| पठेः | पठेतम् | पठेत | मध्यमः | रमेथाः | रमेयाथाम् | रमेध्वम् |
| पठेयम् | पठेव | पठेम | उत्तमः | रमेय | रमेवहि | रमेमहि |

नृत् (४ प.प.) मन् (४ आ.प.)

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| नृत्येत् | नृत्येताम् | नृत्येयुः | प्रथमः | मन्येत | मन्येयाताम् | मन्येरन् |
| नृत्येः | नृत्येतम् | नृत्येत | मध्यमः | मन्येथाः | मन्येयाथाम् | मन्येध्वम् |
| नृत्येयम् | नृत्येव | नृत्येम | उत्तमः | मन्येय | मन्येवहि | मन्येमहि |

लिख् (६ प.प.) दिश् (६ आ.प.)

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| लिखेत् | लिखेताम् | लिखेयुः | प्रथमः | दिशेत | दिशेयाताम् | दिशेरन् |
| लिखेः | लिखेतम् | लिखेत | मध्यमः | दिशेथाः | दिशेयाथाम् | दिशेध्वम् |
| लिखेयम् | लिखेव | लिखेम | उत्तमः | दिशेय | दिशेवहि | दिशेमहि |

पूज् (१० प.प.) मन्त्र् (१० आ.प.)

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| पूजयेत् | पूजयेताम् | पूजयेयुः | प्रथमः | मन्त्रयेत | मन्त्रयेयाताम् | मन्त्रयेरन् |
| पूजयेः | पूजयेतम् | पूजयेत | मध्यमः | मन्त्रयेथाः | मन्त्रयेयाथाम् | मन्त्रयेध्वम् |
| पूजयेयम् | पूजयेव | पूजयेम | उत्तमः | मन्त्रयेय | मन्त्रयेवहि | मन्त्रयेमहि |

## जिज्ञासापत्रम्




**१) विधिलिङ्‌रूपाणि चिनुत लिखत च।**

१. बाला: सर्वदा गुरूणाम् आज्ञां पालयेयु:। २. न कश्चन मातरं वा मातृदेशं वा विस्मरेत्।
३. कदाचित् अहमपि वैद्या भवेयम्। ४. आरोग्यं भास्करात् इच्छेत्।
५. य: गणपतिस्तोत्रं जपेत् स: षड्भि: मासै: फलं लभेत। ६. ध्यायेत् आजानुबाहुं श्रीरामम्।

**२) रूपाभ्यासं कुरुत।**

१. भवेयु: २. प्रयतेरन् ३. शिक्षेत ४. रचयेम
५. संरक्षेम ६. विन्देमहि ७. रमेथा: ८. पठेत्



**मुम्बईनगरवर्णनम्।**

'मुम्बई' इति _______ राजधानी। मुम्बईनगरे _______ मन्दिरं वर्तते। विविधप्रान्तेभ्य: जना: उपजीविकां _______ मुम्बईनगरम् आगच्छन्ति। गेटवे ऑफ इंडिया, नेहरुताराङ्गणं, मत्स्यालय: एतादृशानि विविधानि _______ पर्यटनस्थलानि। _______ जीवनं मुम्बईनगर्या: वैशिष्ट्यम्। अहोरात्रम् अत्र जना: _______। नैकान् उत्सवान् सर्वधर्मीया: सोत्साहं _______। रेलयानप्रवास: _______ जीवनवाहिनी। (**मञ्जूषा**-साधयितुम्, महाराष्ट्रराज्यस्य, रम्याणि, मुम्बईजनानां, कार्यरता:, गतिशीलं, मुम्बादेव्या:, सम्पादयन्ति)

**गायत नन्दत !**

**कृत्वा नवदृढसङ्कल्पम्।**

कृत्वा नवदृढसङ्कल्पम्
वितरन्तो नवसन्देशम्
घटयामो नवसङ्घटनम्
रचयामो नवमितिहासम्।।धृ.।।

नवमन्वन्तरशिल्पिन:
राष्ट्रसमुन्नतिकाङ्क्षिण:
त्यागधना: कार्यैकरता:
कृतिनिपुणा: वयमविषण्णा: ।।१।।

भेदभावनां निरासयन्त:
दीनदरिद्रान् समुद्धरन्त:
दु:खवितप्तान् समाश्वसन्त:
कृतसङ्कल्पान् सदा स्मरन्त: ।।२।।

प्रगतिपथान्न हि विचलेम
परम्परां संरक्षेम
समोत्साहिनो निरुद्वेगिनो
नित्यनिरन्तरगतिशीला: ।।३।।

**–श्री. जनार्दन हेगडे**

**रसप्रश्ना:।**

- **वेदा: कति ? ते के ?**
  चत्वार: वेदा: - ऋग्वेद:, यजुर्वेद:, सामवेद: अथर्ववेद: च।
- **सप्तर्षय: के ?**
  कश्यप:, अत्रि:, भरद्वाज:, विश्वामित्र:, गौतम:, जमदग्नि: वसिष्ठ: च।
- **पाणिनिना विरचितस्य व्याकरणग्रन्थस्य नाम किम् ?**
  अष्टाध्यायी।
- **नव रसा: के ?**
  शृङ्गार:, वीर:, करुण:, अद्भुत:, हास्य:, भयानक:, बीभत्स:, रौद्र:, शान्त: च।
- **पञ्च भूतानि कानि ?**
  पृथिवी, आप:, तेज:, वायु:, आकाश: च।
- **पञ्च प्राणा: के ?**
  प्राण:, अपान:, व्यान:, उदान: समान: च।
- **योगस्य अष्ट अङ्गानि कानि ?**
  यम:, नियम:, आसनम्, प्राणायाम:, प्रत्याहार:, ध्यानम्, धारणा समाधि: च।

## (आ) समासाः।

### संवादम् इमं पठत।



शिक्षकः – आदित्य, यूयं सर्वे ह्यः कुत्र गतवन्तः?
आदित्यः– वयं सर्वे अरण्यं गतवन्तः।
शिक्षकः – अरण्ये किं किम् आसीत्?
आदित्यः– वने वृक्षाः आसन्।
शिक्षकः – अन्यत् किम् आसीत्?
आदित्यः– खगाः पशवः च।
शिक्षकः – अन्यत् किम्?
आदित्यः– फलानि, पुष्पाणि, पत्राणि च आसन्।
शिक्षकः – अरण्ये **वृक्षखगपशवः** आसन्।
अरण्ये **फलपुष्पपत्राणि** आसन्।

१. वृक्षाः च खगाः च पशवः च– वृक्षखगपशवः।
२. फलानि च पुष्पाणि च पत्राणि च– फलपुष्पपत्राणि।

### एतानि उदाहरणानि अपि पश्यत।

१. सूर्यस्य प्रकाशः– सूर्यप्रकाशः।
३. प्रियः देशः– प्रियदेशः।
५. कार्ये मग्नः– कार्यमग्नः।
७. रामः च लक्ष्मणः च– रामलक्ष्मणौ।
९. एकः दन्तः यस्य सः– एकदन्तः।

२. दशरथस्य पुत्रः– दशरथपुत्रः।
४. वाल्मीकिना रचितम्– वाल्मीकिरचितम्।
६. सुखं च दुःखं च– सुखदुःखे।
८. नीलः कण्ठः यस्य सः– नीलकण्ठः।
१०. दिने दिने– प्रतिदिनम्।

### संक्षेपः नाम समासः।

शब्दाः सम्यक् अस्यन्ते यत्र सः समासः। समासः भाषायाः महत्त्वपूर्णं वैशिष्ट्यम्। समासाः अर्थम् अनुसरन्ति। सन्धिसमासयोः कृते पदद्वयमेव आवश्यकं किन्तु तयोर्भेदः द्रष्टव्यः।

| सन्धिः | समासः |
|---|---|
| १. उच्चारणं प्रधानम्। | १. अर्थः प्रधानः। |
| २. विभक्तिप्रत्ययानां लोपः न भवति। | २. विभक्तिप्रत्ययानां लोपः भवति। |
| ३. सन्धौ समासः न शक्यः। | ३. समासे सन्धिः शक्यः। |
| ४. सूर्यस्य + उदयः = सूर्यस्योदयः। | ४. सूर्यस्य उदयः = सूर्य + उदयः = सूर्योदयः। |

सामासिकशब्दे पदद्वयम् १) पूर्वपदम् २) उत्तरपदम्

| सामासिकपदम् | पूर्वपदम् | उत्तरपदम् |
|---|---|---|
| सूर्योदयः | सूर्य | उदयः |
| नीलकण्ठः | नील | कण्ठः |

पदस्य प्रधानत्वं क्रियापदेन सिध्यति। प्रधानत्वेन समासानां चत्वार: प्रकारा:। यथा

| | पूर्वपदम् | उत्तरपदम् | अर्थप्रधानत्वम् | समासप्रकार: | उदाहरणम् |
|---|---|---|---|---|---|
| १. | ✓ | ✗ | पूर्वपदप्रधान: | अव्ययीभाव: | प्रतिदिनम् |
| २. | ✗ | ✓ | उत्तरपदप्रधान: | तत्पुरुष: | दशरथपुत्र: |
| ३. | ✓ | ✓ | उभयपदप्रधान: | द्वन्द्व: | रामलक्ष्मणौ |
| ४. | ✗ | ✗ | अन्यपदप्रधान: | बहुव्रीहि: | नीलकण्ठ: |

## उभयपदार्थप्रधान: द्वन्द्व: समास:।

### १. इतरेतरद्वन्द्व: समास:।



**चन्द्रसूर्यौ**
**चन्द्र: च सूर्य: च।**




**बालकबालिका:**
**बालका: च बालिका: च।**



**वृक्षलता:**
**वृक्षा: च लता: च।**

इतर + इतर- भिन्नपदानि एकत्र प्रयुज्यन्ते अत्र।

१. लघुशब्द: (न्यूनस्वरयुक्त: शब्द:) प्रथम: भवेत्।

२. समस्तपदं नित्यं द्विवचने बहुवचने वा।

३. समस्तपदस्य लिङ्गम् उत्तरपदानुसारम्।

४. विग्रहे प्रतिपदं प्रथमा विभक्ति: योजनीया।

५. विग्रहे, प्रतिपदं 'च' इति अव्ययम् उपयोक्तव्यम्।


६. समस्तपदं बहुवचने चेत् प्रतिपदम् अर्थानुसारम्।

७. समस्तपदं द्विवचने चेत् प्रतिपदम् एकवचनम्।


**कृति: १ – चित्रं दृष्ट्वा समस्तपदानि लिखत।**



**पत्रपुष्पाणि।**



________________



________________

**कृति: २ – चित्रं दृष्ट्वा समासविग्रहं लिखत।**



स्कन्द: च गणेश: च।




________________



________________

जिज्ञासापत्रम्

चित्रं दृष्ट्वा समस्तपदं समासविग्रहं च लिखत।



________________




________________



________________



________________



________________




________________

## २. समाहारः द्वन्द्वः।



मूषकमार्जारम्। (जातवैरत्वम्)

मूषकः च मार्जारः च **एतयोः** समाहारः।




हस्तपादम्। (शरीरावयवाः)

हस्तौ च पादौ च **एतेषां** समाहारः।



यूकालिक्षम्। (सूक्ष्मजीवाः)

यूकाः च लिक्षाः च **एतासां** समाहारः।




हरिद्राकुङ्कुमम्। (नित्यसाहचर्यम्)

हरिद्रा च कुङ्कुमं च **एतयोः** समाहारः।



दुग्धशर्करम्। (साहचर्यम्)

दुग्धं च शर्करा च **एतयोः** समाहारः।



तिलगुडम्। (नित्यसाहचर्यम्)

तिलाः च गुडः च **एतेषां** समाहारः।



**संवादम् इमं पठत।**

[ग्रीष्मावकाशे दौहित्रा: दौहित्र्य: च मातामह्या सह केवलं संस्कृतेन वार्तालापं कुर्वन्ति। मातामही तेभ्य: संस्कृतभाषाया: विशेषान् कथयति।]

मातामही - अस्माकं बाल्यकाले दूरदर्शने एकात्मताया: एकं गीतम् आसीत्। तद् गायाम: -

**एका चटका, अनेकाश्चटका:।**
**धान्यम् अत्तुम् आयाताश्चटका:॥**

सुधेन्दु: - मातामही गतसमये त्वया चतुरस्य काकस्य कथागीतं श्रावितम्।

**एक: काक: तृषापीडित:।**
**जलं न लभते दूरे दूरे॥**

तत्र एक: काक: इति उक्तम्। अधुना अत्र एका चटका इति वदसि।

पृथा - आम्। तथा च 'एकं गीतम्' इत्यपि उक्तम्। तर्हि किमर्थम् अत्र एक:, एकम् इति भेद: ?

वेणु: - (चिन्तयित्वा) हं.. मया ज्ञातम्। यथा एक: बाल:, एका बाला, एकं वनम्।

मातामही - बहु सम्यक् वेणो।

सुधेन्दु: - तर्हि एक: चषक:, एका लेखनी, एकं फेनकम्। अपि योग्यमेतत् ?

मातामही - बाढम्। सम्यक् अवगतं त्वया। इतोऽपि एकम् आङ्ग्ल-बालगीतं यूयं गायथ स्म। अपि स्मरथ?

**द्वौ लघू हस्तौ तालिकावादनाय। द्वौ लघू पादौ गमनागमनाय।**
**द्वे लघू नेत्रे नभोदर्शनाय।...**

पृथा - मातामहि, अवगतं मया। तथा च द्वौ-द्वे एतयो: भेदोऽपि ज्ञात:। यथा द्वौ पुरुषौ, द्वौ दीपौ।

वेणु: - द्वे फले, द्वे उद्याने।

सुधेन्दु: - महिलाद्वयं वा द्रोणीद्वयम् इति कथं वक्तव्यम् ?

मातामही - द्वे महिले द्वे द्रोण्यौ वा। इदानीमहं सङ्ख्याशृङ्खलां वदामि। कथयत किमेतत् ?
त्रय: तिस्र: त्रीणि। चत्वार: चतस्र: चत्वारि॥

सुधेन्दु: - (हसित्वा) मया अवगतम्। **त्रय:** वृक्षा:, **तिस्र:** मक्षिका:, **त्रीणि** फलानि।...

पृथा - तिष्ठ रे। अग्रे अहं वदामि। **चत्वार:** मुनय:, **चतस्र:** धेनव:, **चत्वारि** वाहनानि।

मातामही - सुशोभनम्। चाणाक्षा: यूयम्।

वेणु: - इत: परं वयं एकत: चतु:पर्यन्तं सङ्ख्यारूपाणि पठाम:।

मातामही - साधु। साधु।

## एकत: चतु:पर्यन्तं सङ्ख्यारूपाणि

| एक (नित्यम् एकवचनम्) | | | | द्वि (नित्यं द्विवचनम्) | | |
|---|---|---|---|---|---|---|
| पुं. | स्त्री. | नपुं. | विभक्ति: | पुं. | स्त्री. | नपुं. |
| एक: | एका | एकम् | प्रथमा | द्वौ | द्वे | द्वे |
| एकम् | एकाम् | एकम् | द्वितीया | द्वौ | द्वे | द्वे |
| एकेन | एकया | एकेन | तृतीया | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| एकस्मै | एकस्यै | एकस्मै | चतुर्थी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| एकस्मात् | एकस्या: | एकस्मात् | पञ्चमी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| एकस्य | एकस्या: | एकस्य | षष्ठी | द्वयो: | द्वयो: | द्वयो: |
| एकस्मिन् | एकस्याम् | एकस्मिन् | सप्तमी | द्वयो: | द्वयो: | द्वयो: |

| त्रि (नित्यं बहुवचनम्) | | | | चतुर् (नित्यं बहुवचनम्) | | |
|---|---|---|---|---|---|---|
| पुं. | स्त्री. | नपुं. | विभक्ति: | पुं. | स्त्री. | नपुं. |
| त्रय: | तिस्र: | त्रीणि | प्रथमा | चत्वार: | चतस्र: | चत्वारि |
| त्रीन् | तिस्र: | त्रीणि | द्वितीया | चतुर: | चतस्र: | चत्वारि |
| त्रिभि: | तिसृभि: | त्रिभि: | तृतीया | चतुर्भि: | चतसृभि: | चतुर्भि: |
| त्रिभ्य: | तिसृभ्य: | त्रिभ्य: | चतुर्थी | चतुर्भ्य: | चतसृभ्य: | चतुर्भ्य: |
| त्रिभ्य: | तिसृभ्य: | त्रिभ्य: | पञ्चमी | चतुर्भ्य: | चतसृभ्य: | चतुर्भ्य: |
| त्रयाणाम् | तिसृणाम् | त्रयाणाम् | षष्ठी | चतुर्णाम् | चतसृणाम् | चतुर्णाम् |
| त्रिषु | तिसृषु | त्रिषु | सप्तमी | चतुर्षु | चतसृषु | चतुर्षु |

### सङ्ख्यारूपाणि लिखित्वा वाक्यानि पूरयत।

अ) _______ (४) महिलाभ्य: तण्डुलान् आनय।
आ) तेषु _______ (३) तरुषु खगा: नीडानि अरचयन्।
इ) _______ (१) कपे: टोपिका पतिता।
ई) एतासु _______ (२) कृती लिखन्तु।
उ) _______ (३) भुवनानां समूह: नाम त्रिभुवनम्।
ऊ) _______ (१) दासी सन्देशं कथितवती।
ए) तयो: _______ (२) परस्परमेलनं न आसीत्।
ऐ) _______ (१) नगरे स: वसति स्म।
ओ) _______ (२) अपि कवी काव्यम् अपठताम्।
औ) कथामेताम् _______ (४) छात्रेभ्य: कथय।
अं) अहं _______ (३) चौरान् अपश्यम्।
क) वयं _______ (४) गीतानि गायाम:।
ख) स: _______ (४) वेदान् अधीतवान्।
ग) वयं _______ (२) नेत्राभ्यां पश्याम:।
घ) शिव: _______ (३) नेत्रै: पश्यति।

### हसत नन्दत !

१) नीता – आचार्ये सा गौरी किमपि न करोति। आदिनं उपविश्य केवलं व्यर्थं समययापनं करोति।
शिक्षिका – अस्तु। किन्तु त्वं कथम् एतत् जानासि ?
नीता – अहं तु सर्वदा, तामेव पश्यामि खलु !



२) शिक्षिका – छात्रा:, ह्य: भूतकाल: पाठित: किल? अधुना मिहिके, भूतकालस्य एकम् उदाहरणं कथय।
मिहिका – आचार्ये, अहं तु ह्य: अनुपस्थिता आसम्।
शिक्षिका – उत्तमं मिहिके ! त्वया सम्यक् भूतकाल: ज्ञात: !

# नवमः पाठः । सूक्तिसुधा । (कण्ठस्थीकरणार्थम्)

संस्कृतभाषा सुभाषितैः समलङ्कृता खलु। सुभाषितेभ्यः उद्धृताः नैकविधाः संस्कृतसूक्तयः न केवलं संस्कृते, अपि तु अन्यभाषास्वपि मार्मिकतया उत्स्फूर्ततया च उपयुक्ताः दृश्यन्ते। प्रायः जनाः सम्पूर्णं सुभाषितं न स्मरन्ति परन्तु सूक्तयः तेषां जिह्वाग्रे तिष्ठन्ति। भाषावैभवं वर्धयन्त्यः एतादृश्यः सूक्तयः छात्रैः सम्यक् पठितव्याः स्मर्तव्याः च।

**न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।**
**व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्।।१।।**

[विद्याधनं चोरहार्यं न (अस्ति), राजहार्यं न, भ्रातृभाज्यं न, भारकारि (अपि) न (अस्ति)। व्यये कृते अपि (तत्) नित्यं वर्धते एव। (सत्यमेव विद्याधनं) सर्वधनप्रधानम् (अस्ति)। ]

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।२।।**

[लघुचेतसां (कृते) अयं निजः परः वा इति गणना (अस्ति)। उदारचरितानां (कृते) तु वसुधा एव कुटुम्बकम् (अस्ति)।]

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्।।३।।**

[वृक्षाः परोपकाराय फलन्ति। नद्यः परोपकाराय वहन्ति। गावः परोपकाराय दुहन्ति। इदं शरीरं परोपकारार्थम् (एव अस्ति)।]

**जाड्यं धियो हरति सिञ्चति वाचि सत्यं**
**मानोन्नतिं दिशति पापमपाकरोति।**
**चित्तं प्रसादयति दिक्षु तनोति कीर्तिं**
**सत्सङ्गतिः कथय किं न करोति पुंसाम्।।४।।**

[सत्सङ्गतिः धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम् अपाकरोति, चित्तं प्रसादयति, दिक्षु कीर्तिं तनोति। कथय! (सा सत्सङ्गतिः) पुंसां किं (हितं) न करोति?]

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः।।५।।**

[यत्र नार्यः पूज्यन्ते तत्र देवताः रमन्ते। यत्र तु एताः न पूज्यन्ते तत्र सर्वाः क्रियाः अफलाः (भवन्ति)। ]

**चातकस्त्रिचतुरान् पयःकणान् याचते जलधरं पिपासया।**
**सोऽपि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारता।।६।।**

[(यदा) चातकः पिपासया जलधरं त्रिचतुरान् पयःकणान् याचते (तदा) सः (मेघः) अपि विश्वम् अम्भसा पूरयति। हन्त हन्त (कियती एषा) महताम् उदारता!]

**ते शतं हि वयं पञ्च स्वकीये विग्रहे सति।**
**परैस्तु विग्रहे प्राप्ते वयं पञ्चाधिकं शतम्।।७।।**

[युधिष्ठिरः वदति – स्वकीये विग्रहे सति ते शतं वयं हि पञ्च (स्मः)। परैः विग्रहे प्राप्ते तु वयं पञ्चाधिकं शतं (स्मः)।]

**पठकः पाठकश्चैव ये चान्ये शास्त्रवाचकाः।**
**सर्वे व्यसनिनो ज्ञेया यः क्रियावान्स पण्डितः।।८।।**

[पठकः पाठकः (तथा) च ये अन्ये शास्त्रवाचकाः (सन्ति, ते) सर्वे व्यसनिनः ज्ञेयाः। (यतः) यः क्रियावान् सः (एव) पण्डितः (अस्ति)।]

## भाषाभ्यास:



**श्लोक: १**

**१. एकवाक्येन उत्तरत।**

अ) कै: धनं न ह्रीयते ?

आ) केषु धनं न विभज्यते ?

इ) सर्वधनप्रधानं किम् ?

**२. माध्यमभाषया उत्तरत।**

विद्याधनं व्यये कृते कथं वर्धते ?

**३. सन्धिविग्रहं कुरुत।** वर्धत एव।

**४. समानार्थकशब्दं लिखत।**

चोर:, भार:, नित्यम्, विद्या, धनम्, प्रधानम्।

**५. विरुद्धार्थकशब्दं लिखत।**

व्यय:, नित्यम्, प्रधानम्।

**श्लोक: २**

**१. सन्धिं कुरुत।**

(अ) पर: + वा + इति  (आ) वसुधा + एव

**२. एकवाक्येन उत्तरत।**

अ) 'अयं निज:, अयं पर:' इति केषां गणना ?

आ) केषां कृते वसुधा एव कुटुम्बकम् भवति ?

**३. माध्यमभाषया उत्तरत।**

लघुचेतस: उदारचेतस: जना: कथम् अभिज्ञातव्या: ?

**४. स्तम्भमेलनं कुरुत**

| | | | | |
|---|---|---|---|---|
| अ | स्वीयम् | चिन्तनम् | अन्य: | पृथिवी |
| आ | गणना | वसुधा | निज: | पर: |

**श्लोक: ३**

**१. एकवाक्येन उत्तरत।**

अ) परोपकाराय वृक्षा: किं कुर्वन्ति ?

आ) परोपकाराय नद्य: किं कुर्वन्ति ?

इ) का: परोपकाराय दुहन्ति ?

ई) शरीरं किमर्थम् ?

**२. माध्यमभाषया उत्तरत।**

परोपकार: नाम किम् ? के परोपकारमग्ना: ?

**३. एकवचने परिवर्तयत।**

अ) वृक्षा: फलन्ति।  आ) नद्य: वहन्ति।

**४. समानार्थकशब्दं लिखत।**

वृक्षा:, नद्य:, शरीरम्।

**५. विरुद्धार्थकशब्दं लिखत।**  उपकार:, पर:।

**श्लोक: ४**

**१. रिक्तस्थानं पूरयत।**

अ) सत्सङ्गति: धिय: जाड्यं ______।

आ) सत्सङ्गति: वाचि ______ सिञ्चति।

इ) सत्सङ्गति: ______ दिशति।

ई) सत्सङ्गति: पापम् ______।

उ) सत्सङ्गति: चित्तं ______।

ऊ) सत्सङ्गति: दिक्षु ______ तनोति।

**२. माध्यमभाषया उत्तरत।**

सत्सङ्गति: जीवने किं किं करोति ?

**श्लोक: ५**

**१. सन्धिविग्रहं कुरुत।**

नार्यस्तु, यत्रैता:, एतास्तु, तत्राफला:, सर्वास्तत्र।

**२. एकवाक्येन उत्तरत।**

अ) देवता: कुत्र रमन्ते ?

आ) क्रिया: कुत्र अफला: भवन्ति ?

**३. माध्यमभाषया उत्तरत।**

'यत्र नार्य: पूज्यन्ते'। इति सूक्तिं श्लोकस्य आधारेण स्पष्टीकुरुत।

**४. एकवचने परिवर्तयत।**

अ) नार्य: पूज्यन्ते। आ) देवता: रमन्ते।

इ) एता: न पूज्यन्ते। ई) सर्वा: क्रिया: अफला:।

**५. 'नारी' इत्यर्थम् अमरकोषपङ्क्तिं लिखत।**

**श्लोक: ६**

**१. सन्धिविग्रहं कुरुत।**

अ) चातक: + ______= चातकस्त्रिचतुरान्।

आ) सोऽपि = ______ + अपि।

इ) विश्वम् + अम्भसा = ______।

ई) महताम् + ______ = महतामुदारता।

**२. एकवाक्येन उत्तरत।**

अ) चातकः पयःकणान् कं याचते ?

आ) जलधरः केवलं चातकस्य तृष्णां शाम्यति उत सम्पूर्णविश्वस्य?

इ) महताम् उदारता कस्य दृष्टान्तेन ज्ञायते ?

**३. माध्यमभाषया उत्तरत।**

महताम् उदारता श्लोके कथं वर्णिता ?

**४. रूपपरिचयं कुरुत।**

अम्भसा, महताम्, पिपासया, पयः

**५. समानार्थकशब्दं योजयित्वा वाक्यं पुनर्लिखत।**

चातकः पयसः कणान् जलधरं याचते।

**६. अमरकोषपङ्क्तिं लिखत।** जलधरः, अम्भः

**श्लोकः ७**

**१. माध्यमभाषया उत्तरत।**

'वयं पञ्चाधिकं शतम्' इति सूक्तिं स्पष्टीकुरुत।

**२. श्लोकात् सप्तम्यन्तपदानि चिनुत लिखत च।**

**३. श्लोकात् सङ्ख्यावाचकानि चिनुत लिखत च।**

**श्लोकः ८**

**१. सन्धिविग्रहं कुरुत।**

अ) पाठकश्चैव = _____ + च + _____।

आ) चान्ये = _____ + अन्ये।

इ) व्यसनिनो ज्ञेयाः = _____ + ज्ञेयाः।

ई) क्रियावान्स पण्डितः = क्रियावान् + _____ + पण्डितः।

**२. एकवाक्येन उत्तरत।**

अ) के व्यसनिनः उक्ताः ?

आ) कः पण्डितः उच्यते ?

**३. माध्यमभाषया उत्तरत।**


पाण्डित्यं कस्मिन् वर्तते ? यथार्थः पण्डितः कः ?

**४. सुभाषितात् समानार्थकशब्दं लिखत।**

वाचकः, अध्यापकः, शास्त्रविदः, कार्यकर्ता, विद्वान्, बोद्धव्याः।

**पठत अवगच्छत !** **विसर्गसन्धिः**

विश्वं विसर्गस्य।



# रम्यसंस्कृतम्। सङ्ख्याविशेषणानि – २।

## संवादम् इमं पठत।



मातामही – एकतः चतुःपर्यन्तं सङ्ख्यारूपाणि अधीतानि खलु ?
पञ्चतः तु सङ्ख्यारूपेषु न लिङ्गभेदः। ताः यथावत् प्रयोक्तव्याः।

वेणुः – ज्ञातम्। तर्हि पञ्च आसन्दाः, पञ्च अङ्कन्यः पञ्च भवनानि वा।

सुधेन्दुः – तथा च सप्त बटवः, सप्त रज्जवः, सप्तैव च दिनानि।

पृथा – इतोऽपि अष्ट तारकाः, अष्ट मुनयः, अष्ट वसूनि।

मातामही – उत्तमम्। काश्चन सङ्ख्याः प्रसिद्धाः। यथा नव रात्रयः ...

वेणुः च पृथा च – सप्त ऋषयः, दश आननानि, अष्ट लक्ष्म्यः... त्रीणि भुवनानि, नव रत्नानि वा।

मातामही – पर्याप्तम्। अहम् अधुना कूटप्रश्नं वदामि। **भिः – भ्यः – भ्यः – आनाम् – सु।** किम् एतद् ?

सुधेन्दुः– (उच्चैः हसित्वा) न एषः कूटप्रश्नः। एते तु विभक्तिप्रत्ययाः। गतवर्षे अहं पठितवान् सम्यक् स्मरामि अधुना अपि।

वेणुः – ओहो सुधेन्दो ! सत्यमेव तीक्ष्णा जाता तव बुद्धिः। तर्हि एते सङ्ख्याप्रत्ययाः तृतीयातः सप्तमीपर्यन्तम्।

पृथा– यथा – **पञ्च, पञ्च, पञ्चभिः, पञ्चभ्यः, पञ्चभ्यः, पञ्चानाम्, पञ्चसु**। पञ्चतः नवदशपर्यन्तं रूपाणि पञ्च सङ्ख्या इव भवन्ति। सत्यं खलु ?


मातामही – आम्, अतीव मुदिताऽस्मि। यूयं सर्वे संस्कृतपटवः। इतःपरं संस्कृतभाषया खेलितुं समर्थाः।

सुधेन्दुः– तत्तु त्वया सह सम्भाषणेन किञ्चिद् व्याकरणाभ्यासेन च।

वेणुः – सङ्ख्यारूपाणि सम्यगधीत्य सम्भाषणे सङ्ख्यानाम् अधिकं प्रयोगं कुर्मः।

पृथा – अग्रिमे अवकाशे अन्यान् सङ्ख्याविशेषान् ज्ञातुम् आगच्छामः।

### जिज्ञासापत्रम्



### सङ्ख्यारूपाणि लिखित्वा वाक्यानि पूरयत।


१. तत्र ______ (५) बालकेषु कलहः उद्भूतः।
२. ______ (६) बिडालैः एकः एव मूषकः दृष्टः।
३. ______ (७) दीपानाम् एका आवलिः गृहे दृश्यते।
४. ______ (९) रात्रीणां समूहः नाम नवरात्रम्।
५. अपि जानासि ______ (७) ऋषीणां नामानि ?
६. कार्तिकेयः ______ (६) मुखैः वदति किम् ?
७. रावणस्य ______(१०)मस्तकेभ्यः किरीटाः पतिताः।
८. ______ (८) लक्ष्मीषु कति नामानि जानासि ?
९. राजा ______ (९) ऋषिभ्यः दानं दत्तवान्।
१०. ______ (६) वस्तुभ्यः ______ (३) वस्तूनि आवश्यकानि।
११. अस्माभिः ______ (८) भूपतीनां चरित्राणि पठितानि।

### सङ्ख्यारूपाणि

| (नित्यं बहुवचनम्) | | | |
|---|---|---|---|
| **षष्** | **अष्टन्** | **नवन्** | **विभक्तिः** |
| षट्/षड् | अष्ट / अष्टौ | नव | प्रथमा |
| षट्/षड् | अष्ट / अष्टौ | नव | द्वितीया |
| षड्भिः | अष्टभिः/ अष्टाभिः | नवभिः | तृतीया |
| षड्भ्यः | अष्टभ्यः/ अष्टाभ्यः | नवभ्यः | चतुर्थी |
| षड्भ्यः | अष्टभ्यः/ अष्टाभ्यः | नवभ्यः | पञ्चमी |
| षण्णाम् | अष्टानाम् | नवानाम् | षष्ठी |
| षट्सु/ षट्त्सु | अष्टसु/ अष्टासु | नवसु | सप्तमी |

# दशमः पाठः । पितृभक्तः नचिकेताः।

वेदाः, ब्राह्मणाः, आरण्यकाः उपनिषदः इति वेदवाङ्मयपरम्परा वर्तते। एतस्यां परम्परायां प्रमुखाः दश उपनिषदः ख्याताः। उपनिषत्सु तत्त्वज्ञानचर्चा-निरूपणं वर्तते। उपनिषत्सु अन्यतमा 'कठोपनिषद्'। कठोपनिषदः उद्धृता यम-नचिकेतसोः कथा।






**वाजश्रवाः** नाम दानपरः ब्राह्मणः आसीत्। एकदा सः विश्वजित्-यज्ञम् अकरोत्। समाप्ते यज्ञे सः ब्राह्मणेभ्यः दक्षिणाम् अयच्छत्। दक्षिणायां सर्वदा प्रियं वस्तु यच्छेत् इति नियमः। किन्तु पिता **वाजश्रवाः** तु दक्षिणारूपेण दुग्धदाने असमर्थाः दुर्बलाः वृद्धाः च धेनूः अयच्छत्। तस्य पुत्रः **नचिकेताः** तद् अपश्यत्। असमीचीनदानेन पिता मे नरकं गमिष्यति इति भीत्या सः पितरम् अपृच्छत्, ''पितः, किं तव अतीव प्रियम् ?'' झटिति पिता अवदत्, ''वत्स, त्वमेव मम प्रियतमः।'' **नचिकेताः** पुनः अपृच्छत्, ''तर्हि मां कस्मै दास्यति भवान् ?'' **वाजश्रवसा** किमपि उत्तरं न दत्तम्। द्विवारं त्रिवारं **नचिकेतसा** तदेव पृष्टम्। तदा क्रुद्धः भूत्वा पिता **नचिकेतसम्** ''अहं त्वां मृत्यवे ददामि'' इति अवदत्।

पिता क्रोधावेशे एवम् उक्तवान् इति **नचिकेताः** अजानत्। तथापि पितुः आदेशपालनार्थं सः यमपुरम् अगच्छत्। यमपुरे यमः अनुपस्थितः। बालः **नचिकेताः** तत्रैव त्रीणि दिनानि यावत्, किमपि अभुक्त्वा अपीत्वा यमस्य प्रतीक्षाम् अकरोत्।

चतुर्थे दिवसे यमः यमपुरं प्राप्तः। क्षुधार्तं पिपासार्तं बालातिथिं दृष्ट्वा तस्य हृदयं करुणया अद्रवत्। यमः **नचिकेतसे** 'त्रीन् वरान् याचस्व' इति अवदत्। ततः बालकः प्रथमं वरम् अयाचत, ''मम जनकस्य **वाजश्रवसः** मां प्रति क्रोधः शान्तः भवतु।'' ''स्वर्गसाधिकाम् अग्निविद्यां दत्त्वा माम् अनुगृह्णातु'' इति द्वितीयं वरं सः

अयाचत। यमः आनन्देन वरौ प्रायच्छत्। ततः तृतीयवररूपेण **नचिकेताः** आत्मज्ञानम् अयाचत। तस्य प्रार्थनां श्रुत्वा यमः चकितः। न कोऽपि मर्त्यः अद्यपर्यन्तं तद् ज्ञातुकामः। **अल्पवयसः** बालस्य कथमिव प्रगल्भा ज्ञानतृष्णा ? यमः विविधप्रलोभनैः **नचिकेतसं** तृतीयवरात् निवारयितुं प्रायतत। किन्तु निश्चलः **नचिकेतसः** निर्णयः। अन्ते वरं दातुं वचनबद्धः यमः तस्मै ज्ञानिनामपि दुर्लभम् आत्मज्ञानम् उपादिशत्।

## भाषाभ्यासः



### १. एकवाक्येन उत्तरत।

अ) वाजश्रवाः कः ?

आ) दक्षिणायां किं यच्छेत् इति नियमः ?

इ) वाजश्रवसः पुत्रः कः ?

ई) तृतीयवररूपेण नचिकेताः किम् अयाचत ?

उ) बालः नचिकेताः कति दिनानि यावत् यमस्य प्रतीक्षाम् अकरोत् ?

### २. माध्यमभाषया उत्तरत।

अ) नचिकेताः यमपुरं किमर्थम् अगच्छत् ? आ) के त्रयः वराः नचिकेतसा याचिताः ?

### मौखिककार्यम्

**१) यथाक्रमं वदत।**

अ) चतुर्थे दिवसे यमस्य यमपुरम्-आगमनम्।

आ) बालनचिकेतसः अभुक्त्वा अपीत्वा यमस्य प्रतीक्षा।

इ) क्षुधार्तस्य बालातिथेः दर्शनम्।

ई) नचिकेतसः त्रीणि दिनानि यावत् तितीक्षा।

उ) यमेन वरत्रयं दत्तम्।

### पठत अवगच्छत !          विश्वं विसर्गस्य।

• अम्भोधिर्जलधिर्पयोधिरुदधिर्वारांन्निधिर्वारिधिः।

अम्भोधिः + जलधिः
+ पयोधिः + उदधिः
+ वारांनिधिः + वारिधिः। } **र्रूपः विसर्गः**

परोपकारः कर्तव्यः प्राणैरपि धनैरपि।

प्राणैरपि = प्राणैः + अपि।
धनैरपि = धनैः + अपि। } **र्रूपः विसर्गः**

• उत्तमा मध्यमा नीचास्तिस्रो वै प्राणिनां विधाः।
परार्थस्वार्थविध्वंसा लक्षणानि यथाक्रमम्॥

उत्तमाः + मध्यमाः
परार्थस्वार्थविध्वंसाः + लक्षणानि } **लोपी विसर्गः**

• मा मनो मधुपो मेघो मद्यपो मर्कटो मरुत्।
मक्षिका मत्कुणो मत्स्यो मकारा दश चञ्चलाः॥

मनः + मधुपः + मेघः + मद्यपः + मर्कटः + मरुत्।
मत्कुणः + मत्स्यः + मकाराः। **ओकाररूपः विसर्गः**
मकाराः + दश। **लोपी विसर्गः**

• स हि भवति दरिद्रो यस्य तृष्णा विशाला।
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥

दरिद्रः + यस्य
कः + दरिद्रः } **ओकाररूपः विसर्गः**

**(विसर्गस्य परिवर्तनं निरीक्षध्वम्।)**

# क्रियापदं किं कथयति ? – २

अत्र भिन्नं पदं किम् ?

| | | |
|---|---|---|
| गणयति | सूचयते | कथयति |
| धारयति | पूज्यते | ताडयते |
| घोषयते | चोरयति | क्षालयति |

उत्तरम् – ____

क्रियापदानि वाक्ये अन्विष्यत।
१. सुवर्णं सर्वश्रेष्ठं गण्यते। २. सौजन्यं श्रेष्ठम् उच्यते। ३. चित्रे नदी दृश्यते।
एतेषां समानता का ?
१. प्रत्ययः – ☐ २. मूलधातुः + ☐

**एतानि वाक्यानि पठत।**


१. रामेण **ग्रन्थः पठ्यते**।
२. रामेण **ग्रन्थौ पठ्येते**।
३. रामेण **ग्रन्थाः पठ्यन्ते**।
४. रामेण **अहं दृश्ये**।
५. रामेण **आवां दृश्यावहे**।
६. रामेण **वयं दृश्यामहे**।

एतेषु वाक्येषु क्रियापदं कर्मपदस्य पुरुषं वचनं च अनुसरति। यदि कर्मपदं परिवर्तते तर्हि क्रियापदम् अपि परिवर्तते अतः कर्मप्रधानानि वाक्यानि इमानि।

**कर्मवाच्यः प्रयोगः। (कर्मणि प्रयोगः)**

| कर्ता | कर्म | क्रियापदम् |
|---|---|---|
| तृतीया विभक्तिः | **प्रथमा विभक्तिः** | **कर्मपदस्य पुरुषवचनानुसारम्** |


१) मधुरया सुधाखण्डाः आनीयन्ते।




**क्रियापदं कर्मपदम् अनुसरति।**

**अतः कर्मवाच्यं क्रियापदम् इदम्।**

२) अस्माभिः ग्रन्थः पठ्यते।




**क्रियापदं कर्मपदम् अनुसरति।**

**अतः कर्मवाच्यं क्रियापदम् इदम्।**

**पठत बोधत !!**


## व्यासगणेशकथा।

भगवता व्यासमुनिना महाभारतं नाम महाकाव्यं **विरच्यते**। एतस्मात् सन्तुष्टः ब्रह्मदेवः तस्य पुरतः आविर्भवति। तदा व्यासेन नम्रेण **प्रणम्यते**। ब्रह्मदेवेन **कथ्यते**, ''हे मुने, त्वया यत् काव्यं विरचितं तस्य लेखनं कर्तव्यम्'' इति। व्यासमुनिना **उच्यते**, ''देव, मम काव्यस्य लेखनार्थं नास्ति योग्यः लेखकः।'' ब्रह्मदेवेन **कथ्यते**, ''श्रीगणेशः तव काव्यं लिखेत्। त्वया सः प्रार्थनीयः।'' ततः ब्रह्मदेवेन **निर्गम्यते**।


व्यासमुनिना श्रीगणेशः **आहूयते**। श्रीगणेशेन प्रणम्य **कथ्यते**, ''मुनिवर, मया किं करणीयं तत् आदिशतु।'' व्यासमुनिना **कथ्यते**, ''गणेश, त्वया मम काव्यं लेखितव्यम्।'' गणेशेन **उच्यते**, ''अवश्यं लिखामि। किन्तु भवता सर्वे श्लोकाः अविरतं कथयितव्याः।'' व्यासमुनिना **उच्यते**, 'तथास्तु। किन्तु त्वया अपि एकस्य अपि अक्षरस्य अर्थम् अज्ञात्वा न लेखितव्यम्।'' श्रीगणेशेन **कथ्यते**, ''आम्, तथा करोमि'' इति। तदनन्तरं व्यासमुनिना श्लोकाः **कथ्यन्ते** गणेशेन ते **लिख्यन्ते**। व्यासमुनिना कठिनाः श्लोकाः **कथ्यन्ते** तदा गणेशेन चिन्तनं **क्रियते** अर्थः **ज्ञायते** **लिख्यते** च।

# एकादश: पाठ: । मनस: स्वच्छता ।

'श्यामची आई' इति पांडुरंग सदाशिव साने (साने गुरुजी) महोदयेन मराठीभाषया विरचितं पुस्तकम्। अस्मिन् पुस्तके तस्य आत्मकथनपरा: कथा: सन्ति। एता: स्मरणकथा: बालकानां कृते बोधपरा: संस्कारक्षमा: मातृस्नेहवर्धका: च। श्याम: प्रतिरात्रं स्वमित्रेभ्य: स्वजीवनाधारिता: स्मृतिकथा: कथयति। संस्कृतानुवादद्वारा अस्य आदर्शभूतस्य पुस्तकस्य परिचय: कारित: **डॉ. मञ्जूषा कुलकर्णी** महाभागया। तस्मात् पुस्तकात् अयं प्रसङ्ग:।




''बाल्यादेव द्विवारं स्नानं करोमि स्म अहम्।'' श्यामेन कथा आरब्धा। ''द्विवारं स्नानस्य अभ्यास: उत्तम: एव। रात्रौ निद्राया: पूर्वं स्नानं कुर्म: चेत् शरीरं स्वच्छं, सतेज:, लघुभारमिव च भासते। निद्राया: पूर्वं वयं प्रार्थनां कुर्म:, एतत् भवति मनस: स्नानम्। शरीरं मन: च स्वच्छे तर्हि निद्रा उत्तमा भवति।



एकदा प्रतिदिनमिव खेलित्वा अहं गृहम् आगत्य स्नानार्थं गतवान्। सायङ्कालस्य स्नानार्थम् अधिकस्य जलस्य आवश्यकता न भवति। स्नानं समाप्य मया उक्तम्, ''अम्ब, शुष्कय मे अङ्गम्। जलं समाप्तं, सत्वरं शुष्कय मे अङ्गम्'' इति उच्चै: अवदम् अहम्। सायङ्काले मे माता स्वशाटिकया एव मम शरीरं मार्जयति स्म।

माता आगता, मम अङ्गं मार्जितवती आज्ञां च दत्तवती ''देवपूजार्थं पुष्पाणि आनय, श्याम'' इति। ''मम पादतलौ आर्द्रौ स्त:। मृत्तिकया मलिनौ भविष्यत:। अत: मम पादतलौ अपि स्वच्छीकुरु।'' इति ''पादतलौ आर्द्रौ स्त: तर्हि किं जातं रे श्याम ? अधुना केन वस्त्रेण मार्जयामि ?'' ''अम्ब, तव शाटिकाञ्चलं पाषाणे विस्तारय।'' ''श्याम, अतीव हठस्वभाव: असि।'' इति उक्त्वा मात्रा शाटिकाञ्चलं विस्तारितम्। अहं चरणौ तदुपरि स्थापयित्वा शुष्कौ कारयित्वा निर्गतवान्। मातु: वस्त्रम् आर्द्रम् अभवत्।

तस्मिन् समये तया शाटिकापरिवर्तनं कर्तुं न शक्यते इत्यपि मया न चिन्तितम्। परन्तु पुत्रचरणौ मलिनौ न भवेताम्, पुत्रेच्छा पूर्णा भवेत् एतदर्थं तया स्वशाटिका आर्द्रा कृता। माता पुत्रार्थं किं किं न करोति, किं किं न सहते, किं किं न समर्पयति? अहं गृहस्य अन्तर्भागं गतवान्, पूजार्थं पुष्पाणि स्थापितवान्। माता दीपं गृहीत्वा आगतवती उक्तवती च, ''श्याम, चरणौ मलिनौ न भवत: अत: यथा प्रयतसे तथैव मन: मलिनं न भवतु एतदर्थम् अपि प्रयतस्व। प्रार्थय देवं शुद्धबुद्ध्यर्थम्।''

भो मित्राणि, कियन्त: मधुरा: शब्दा:! पावित्र्यार्थं स्वच्छतायै वयं प्रतिदिनं प्रयतामहे। वस्त्रस्वच्छतार्थं क्षालनचूर्णम् अस्ति, शरीरार्थं चन्दनफेनकानि सन्ति। शरीरं वस्त्राणि च मलिनानि न भवन्तु अत: सर्वे प्रयत्नं कुर्वन्ति। अपि वयं मनस: स्वच्छतायै प्रयतामहे ?''

## भाषाभ्यासः



**१. एकवाक्येन उत्तरत।**

१) निद्रा कदा उत्तमा भवति?  २) स्नानेन किं भवति?  ३) कदा प्रार्थनां वदामः?

४) माता श्यामस्य चरणौ केन मार्जयति?  ५) वयं प्रतिदिनं किमर्थं प्रयतामहे ?

**२. माध्यमभाषया लिखत।** मनसः स्वच्छताविषये माता श्यामं कथं बोधितवती?

**३. अ) सन्धिविग्रहं कुरुत ।** १. लघुभारमिव २. इत्यपि ३. इतोऽपि ४. तथैव ५. कदापि

**आ) वर्णविग्रहं कुरुत।** १. पादतलौ  २. स्नानस्य

**इ) विशेषण–विशेष्य–सम्बन्धः।**

| | | | | |
|---|---|---|---|---|
| विशेष्यम् | पादतलौ | अभ्यासः | मनः | शरीरम् |
| विशेषणम् | सतेजः | मलिनम् | आर्द्रौ | उत्तमः |

**४. सूचनानुसारं परिवर्तनं कुरुत।**

१. अहं द्विवारं स्नानं करोमि स्म। ('स्म' निष्कासयत)

२. वयं प्रतिदिनं प्रयतामहे। (एकवचनं कुरुत)

**५. समानार्थकशब्दयुग्मं चिनुत।** शरीरम्, मृत्तिका, चरणौ, मित्रम्, मनः, मृद्, सुहृद्, चित्तम्, पादौ, देहः

**६. विरुद्धार्थकं शब्दं लिखत।** पवित्रम्, शुष्कम्, नीचैः, स्वच्छम्, अधिकम्, सत्वरम्।

**७. उपपदविभक्तिं योजयत।**

१. --------पूर्वं वयं प्रार्थनां वदामः। (निद्रायाः/निद्रायै)

२. एकदा नित्यमिव खेलित्वा अहं ------ आगतः। (गृहे/गृहम्)

**८. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१. मात्रा स्वशाटिका आर्द्रा कृता यतः .....।

अ) सा वर्षायां क्लिन्ना।

आ) तेन पुत्रेच्छा पूर्णा भवेत्।

**पठत अवगच्छत !**  **विश्वं विसर्गस्य।**


● हंसश्श्वेतः बकश्श्वेतः को भेदो बकहंसयोः।
नीरक्षीरविवेके तु हंसो हंसो बको बकः।।

| | | |
|---|---|---|
| हंसः | हंसश् | शरूपः विसर्गः |
| बकः | बकश् | शरूपः विसर्गः |
| कः | को | ओकाररूपः विसर्गः |
| भेदः | भेदो | ओकाररूपः विसर्गः |
| हंसः | हंसो | ओकाररूपः विसर्गः |
| बकः | बको | ओकाररूपः विसर्गः |

● त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वम् इन्द्रस्त्वम् अग्निस्त्वं
वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवस्स्वरोम्।।

| | | |
|---|---|---|
| विष्णुः | विष्णुस् | सरूपः विसर्गः |
| रुद्रः | रुद्रस् | सरूपः विसर्गः |
| अग्निः | अग्निस् | सरूपः विसर्गः |
| वायुः | वायुस् | सरूपः विसर्गः |
| सूर्यः | सूर्यस् | सरूपः विसर्गः |
| चन्द्रमाः | चन्द्रमास् | सरूपः विसर्गः |

# द्वादशः पाठः। अमरकोषः।




संस्कृतभाषा अतीव समृद्धा भाषा। एकस्य शब्दस्य भवन्ति नैके समानार्थकशब्दाः। क्वचित् एकस्य शब्दस्य विविधाः अर्थाः अपि भवन्ति। अध्येतॄणां सुखबोधाय समानार्थकशब्दानां पद्यमयीं रचनां कृत्वा पण्डित-अमरसिंहेन अमरकोषः ग्रथितः। अमरकोषपठनेन कण्ठस्थीकरणेन च शब्दज्ञानं भवति। विविधशब्दानां वाक्ये प्रयोगेण शब्दप्रभुत्वं सिध्यति। यथेष्टं गृह्णन्तु शब्दरत्नानि अस्मात् शब्दरत्नाकरात्। अमरकोषप्रशंसा -

कवेरमरसिंहस्य कृतिरेषा सुनिर्मला।
आचन्द्रतारकं स्थेयात् नामलिङ्गानुशासनम्॥




(छात्राः ग्रन्थालये विविधानि पुस्तकानि पश्यन्ति अध्यापिकां प्रश्नान् च पृच्छन्ति।)

नयनः - आचार्ये, का एषा भिन्ना विशाला कपाटिका ? अहो ! कियन्तः विविधाः कोषाः एतस्यां वर्तन्ते !

अध्यापिका - आम्, सर्वेषां शास्त्राणाम् अध्ययनार्थम् एते कोषाः आवश्यकाः।

सुमेधा - कोषः नाम किम् ?

अध्यापिका - कोषः नाम सङ्ग्रहः। यथा वयं वित्तकोषे धनस्य सङ्ग्रहणं कुर्मः तथैव भाषाकोषे शब्दानां सङ्ग्रहः भवति।

श्रेया - कः तस्य उपयोगः ?

अध्यापिका - सुयोग्यः प्रश्नः। सम्भाषणे लेखने च भाषाप्रभुत्व-प्राप्त्यर्थं तथैव नैकेषां विषयाणां ज्ञानप्राप्त्यर्थं शब्दसम्पत्तेः सङ्ग्रहणम् अतीव आवश्यकम्। अस्माकं ग्रन्थालये संस्कृतिकोषाः, चरित्रकोषाः, विश्वकोषाः सुभाषितकोषाः च इत्यादयः बहवः कोषाः वर्तन्ते। तेषु 'अमरकोषः' नाम कश्चन विशेषः कोषः।

स्वप्नीलः - अमरकोषः ? 'अमरकोषः' इति नाम किमर्थम् ? किं विद्यते अस्मिन् कोषे ?

अध्यापिका- एषः संस्कृतशब्दानां सङ्ग्रहग्रन्थः। अमरसिंहः नाम पण्डितः एतस्य रचयिता। अतः कोषस्य नाम 'अमरकोषः' इति। पुरातनकाले यदा छात्राः अध्ययनार्थं गुरुकुलं प्रविशन्ति स्म तदा अध्ययनारम्भे ते अमरकोषं कण्ठस्थं कुर्वन्ति स्म। अधुना अपि तथैव प्रवर्तते।

आर्या - (साश्चर्यम्) किं कोषः कण्ठस्थीकर्तुं शक्यः ? तेन कः लाभः भवति ?

अध्यापिका - अथ किम्! पद्यमयः एषः ग्रन्थः गेयः। अतः श्लोकानां, सुभाषितानां पठनम् इव तस्य कण्ठस्थीकरणम् अतीव सुलभम्। तत्र एकस्य शब्दस्य कृते नैके समानार्थकशब्दाः वर्तन्ते। क्वचित् एकस्य शब्दस्य नैके भिन्नाः अर्थाः अपि वर्तन्ते। अतः तस्य पठनेन अस्माकं शब्दसम्पत्तिः वृद्धिं गच्छति। अस्माकं स्मरणशक्तिः धारणाशक्तिः च वर्धेते, उच्चारणमपि शुद्धं भवति।

नयनः - वयमपि अमरकोषं कण्ठस्थं कुर्याम। तस्मिन् कति श्लोकाः सन्ति ?

अध्यापिका – उपसार्धसहस्रं (१५००) श्लोका: सन्ति। तत्र त्रीणि काण्डानि सन्ति। अत: 'त्रिकाण्डकोष:' इति एतस्य अपरं नाम। तथा 'नामलिङ्गानुशासनम्' इति नाम्ना अपि विख्यात: एष: कोष:।

सुमेधा – 'नामलिङ्गानुशासनम्' इति शब्दस्य क: अर्थ: ?

अध्यापिका– तदपि अस्य ग्रन्थस्य अपरं वैशिष्ट्यम्। अत्र न केवलं समानार्थकशब्दा: अपि तु तेषां लिङ्गनिर्देश: कृत:। तेन भाषाया: आकलनं प्रयोग: च सुकर: भवति।

स्वप्नील: – आचार्ये, तेन वयं संस्कृतकाव्यानि नाटकानि च विनायासं पठितुं शक्नुम: खलु।

अध्यापिका – निश्चयेन ! तर्हि इत:परं सर्वै: अमरकोषस्य पठनम् अवश्यं कर्तव्यमेव।

## भाषाभ्यास:



### १. एकवाक्येन उत्तरत।

अ) कोषा: किमर्थम् आवश्यका: ?

आ) कोष: नाम किम् ?

इ) क: अमरकोषस्य रचयिता ?

ई) अमरकोषस्य कण्ठस्थीकरणं कस्मात् सुलभम् ?

उ) अमरकोषे कति श्लोका: सन्ति ?

ऊ) अमरकोषस्य किम् अन्यत् नामद्वयम् ?

### २. माध्यमभाषया लिखत।

१. 'अमरकोष'– कण्ठस्थीकरणेन के लाभा: भवन्ति ?

### ३. प्रश्ननिर्माणं कुरुत।

१. वयं वित्तकोषे <u>धनस्य</u> सङ्ग्रहं कुर्म:। २. अमरकोष: <u>संस्कृतशब्दानां</u> सङ्ग्रहग्रन्थ:।

### ४. अ) शब्दस्य वर्णविग्रहं कुरुत। (१) सङ्ग्रहं (२) प्रयोग: (३) वर्तन्ते (४) क्वचित्

### आ) मेलनं कुरुत।

| विशेष्यम् | विशेषणम् |
|---|---|
| १. कपाटिका | १. सुलभम् |
| २. कोषग्रन्थ: | २. विशाला |
| ३. कण्ठस्थीकरणम् | ३. भिन्ना: |
| ४. अर्था: | ४. पद्यमय: |

### ५. सूचनानुसारं वाक्यपरिवर्तनं कुरुत।

१. छात्रा: अमरकोषं कण्ठस्थं कुर्वन्ति स्म। ('स्म' निष्कासयत)

२. तेन क: लाभ: भवति ? (बहुवचने लिखत।)

३. वयमपि अमरकोषं कण्ठस्थं कुर्याम। (एकवचनं कुरुत।)

### ६. समानार्थकशब्दं लिखत। कोष:, अमरकोष:, विख्यात:, सुलभम्।

### ७. वाक्यं शुद्धं कुरुत।

१. ग्रन्थालये कोषाय कृते एका विशाला कपाटिका विद्यते।

२. छात्रा: ग्रन्थालये विविधं पुस्तकानि पश्यन्ति।

३. अमरकोषे तिस्र: काण्डानि सन्ति।

# त्रयोदशः पाठः । सरमायाः शीलम् ।



वेदवाङ्मये आगता कथा एषा। पुरा पणयः नाम असुराः देवानां सर्वाः धेनूः स्वदेशमपाहरन्। धेनूनाम् अन्वेषणार्थं सुपर्णः इति देवानां सेवकः गरुडः पणीनां देशं गतः। तत्र पणीनाम् उपहारैः वशः गरुडः धेनूनां विषये न किमपि अकथयत्। तेन स्वामिद्रोहः कृतः। अतः देवैः पुनः सरमा नाम शुनी प्रेषिता। निर्भयतया सुदूरं मार्गम् अतिक्रम्य, रसानदीम् उत्तीर्य सा पणीनां देशं प्राप्ता। पणिभिः कृतम् आतिथ्यं तया न स्वीकृतम्। प्रतिनिवृत्त्य देवेभ्यः सर्वं वृत्तान्तम् अकथयत्। तस्याः स्वामिभक्त्या प्रसन्नेन इन्द्रेण, तस्यै वरः प्रदत्तः गरुडाय च शापः। स्वामिभक्तेः कर्तव्यपालनस्य गौरवकथा नाम इदं पोवाडागीतम्।

पोवाडा इति प्रसिद्धः महाराष्ट्रीयः लोककलाप्रकारः। वीररसप्रधानम् इदं पोवाडागीतं रचितम् अस्ति **पण्डित-प्रभाकर-भातखंडे** इति आधुनिक-संस्कृतलेखकवर्येण।



- प्राणिनां चातुर्यकथाः काः ?
- कस्मिन् चित्रपटे कस्यां कथायां वा प्राणिना कृतं साहाय्यं वर्णितम् अस्ति ?


शाहिरः – सभायां देवराज इन्द्रः
चिन्तयति कः प्रेषितव्यः।
किङ्करो नैकोऽपि दृष्टः
यो भवेत् सदा स्वामिनिष्ठः।।

गायकवृन्दः – तदा?

शाहिरः – सेवायां तत्परा, देवगणप्रिया,
नियुक्ता गोधनप्राप्त्यर्थम्।
मघवता आज्ञप्ता सरमा,
प्रस्थिता देवशुनी सरमा हे जी जी जी जी ।।

गायकवृन्दः – प्रस्थिता देवशुनी सरमा हे जी जी जी जी जी

शाहिरः – तदा मार्गे दृष्टा, तटरुहतरूत्पाटिनी रसा
जलौघसमृद्ध्या पृथुलरभसा याति सरसा।।
रसां दृष्ट्वा सरमया चिन्तितम् –
''अवश्यं गच्छेयं नदी यदि भवेत् अद्य सुसहा।
अतस्तां याचेऽहं विनयवचसा नम्रशिरसा।।
रसे, कुरु कृपाम्।
जलं तवेदम्। महागभीरम्।
कुरुष्व गाधम्। येन तरेयम्।
परं च तीरम्। अहं व्रजेयम्।''






स्वामिन: शोभनकार्यार्थम्,
आर्यगणमङ्गलकार्यार्थम्।



गायकवृन्द: – आर्यगणमङ्गलकार्यार्थम्। हे जी जी जी जी।।
रसा उवाच – ''अहं च श्रेष्ठा, त्वं तु क्षुद्रा
न हि त्वदर्थं, जलप्रवाहम्।
करोमि अल्पम्, अपसर अपसर।।''
श्रुत्वा तद् वाक्यं सरमया गर्जितम्।''
''पश्य मे सामर्थ्यं, कार्यनिष्ठासामर्थ्यम्
इति उक्त्वा सा जले अपतत् –
शाहिर: – सा गता परं तीरम्। रसा सा अधोमुखी भूता। लज्जया
म्लानमुखी जाता। क्षुद्रया कथं पराभूता। पश्यति क्षुद्रशुनीं सरमाम्।



गायकवृन्द:– पश्यति क्षुद्रशुनीं सरमाम्। हे जी जी जी जी जी।।
गद्यम् – एवं सरमा परतीरं प्राप्ता।
इत: पश्यति, तत: पश्यति
वलं पृच्छति, पणीन् पृच्छति।।
वनं गच्छति, गुहां प्रविशति।
गुहायां पणिभिर्यद् रुद्धं प्रभो: गोधनसर्वस्वम्।
समाप्तमन्वेषणकार्यं, समाप्तमन्वेषणकार्यम्।।
गायकवृन्द: – प्रमुदिता इन्द्रशुनी सरमा हे जी जी जी जी जी।।
गद्यम् – सरमया धेनव: अन्विष्टा:। एतां वार्ताम् इन्द्रं वक्तुं प्रस्थिता सा। परं वलै: सा अवरोधिता।



गायकवृन्द:– हे सरमे, हे सरमे, दुग्धं पिबतु, दधि खादतु।
घृतं पिबतु, अत्र तिष्ठतु
गोधनस्य भागं तुभ्यं दद्म:।।
सरमा – सेविका नाहं लोभस्य, सेविका नाहं मोहस्य।
गायकवृन्द: – सेविका स्वामिन: इन्द्रस्य। हे जी जी जी जी जी।
सेविका स्वामिन: इन्द्रस्य। हे जी जी जी जी जी।
गद्यम् – अन्ते पणिभि: सरमा निन्दिता।
''एषा सरमा जारु खादति।
एषा सरमा जारु खादति।'' सरमया किञ्चित् तन्न श्रुतम्।
अपिहितं दीर्घं कर्णद्वयम्। ''वृत्तान्तं वक्तुं गमनमारभे।''
प्रस्थिता सत्यप्रिया सरमा।
गायकवृन्द: – प्रस्थिता देवशुनी सरमा। हे जी जी जी जी जी।।

(शब्दार्था: – गाधम् = अगभीरम्, पृथुलरभसा = अतीव वेगेन, वलम् = पणीनाम् अपरं नाम, जारु = क्षुद्रान्नम्, मघवान् = इन्द्र:)

**भाषाभ्यास:**




**माध्यमभाषया उत्तरत।**

(१) सरमाया: कर्तव्यपालने के विघ्ना: अभवन्? (२) सरमा कर्तव्यपालने विघ्नान् कथं तरति?
(३) पणय: सरमाया: निन्दां कदा अकुर्वन्? (४) पणय: सरमां किमर्थं निन्दन्ति?



## लेखनकौशलम्–३

**मञ्जूषातः शब्दान् योजयित्वा संवादं पूरयत।**



संवादिनी–तालवाद्यसंवादः।

संवादिनी – ______, अपि अद्य ग्लानः असि ?

तालवाद्यम् – अयि, अद्य ______ संस्कृतदिनस्य कार्यक्रमः अभवत्। तत्र ______ गीतगायनसमये बहु ताडितः वादितः च अस्मि।

संवादिनी – आम्। अहमपि तत्र ______ । बालैः सह स्वरतालयुक्ता अहमपि अगायम्।

तालवाद्यम् – परन्तु त्वं न ग्लाना असि। ______ तव वदनम् उल्लसति।

संवादिनी – मित्र, त्वां ______ ताडयन्ति अतः त्वं ग्लानः भवसि मां तु अतीव ______ वादयन्ति अतः अहं मधुरं गायामि। इदं मम ______ रहस्यम्।

मञ्जूषा – (हास्ययुक्तं, हास्यस्य, सुहृद्, वादकाः, अभवम् , कोमलतया, बालानां, शालायां)

**मञ्जूषातः शब्दान् योजयित्वा निबन्धं पूरयत।**

सङ्गणकः – इदानींतने काले सङ्गणकः भोजनम् इव ______। सङ्गणकस्य साहाय्येन बहूनि ______ सुकराणि जातानि। गणनकार्यं भवतु वा ______ अन्वेषणं, सः तूर्णमेव कार्यं करोति। अधुना तस्य भ्रमणभाषः, टॅबयन्त्रम्, अङ्कसङ्गणकः ______रूपाणि प्रचलितानि। यदि आन्तर्जालसुविधा विद्युदुपलब्धिः वा न स्तः तर्हि ______ कार्यं न भवति। तदा ______ असहायः भवति। तस्य अत्यधिकोपयोगेन आरोग्यविषयकाः ______प्रादुर्भवन्ति। किन्तु तस्य ______ साहाय्येन अस्माकं प्रगतिः एव। (आन्तर्जाले, मनुष्यः, आवश्यकः, कार्याणि, एतानि, सुयोग्येन, समस्याः, सङ्गणकस्य )

**पठत अवगच्छत !** **विश्वं विसर्गस्य।**

• शिवोऽहं शिवोऽहं शिवस्वरूपोऽहम्।
कोऽहं कोऽहं कोऽहं सोऽहं सोऽहं सोऽहम्।

शिवः अहम्
शिवस्वरूपः अहम्।
कः अहम् सः अहम्
} अवग्रहसहितः ओकाररूपः विसर्गः

• एरण्डोऽपि तरुस्तावत् मशकोऽपि विहंगमः।
खद्योतोऽपि किल ज्योतिः वयं न कवयः कथम्।।

एरण्डः अपि।
मशकः अपि।
खद्योतः अपि।
} अवग्रहसहितः ओकाररूपः विसर्गः।

कवयः कथम्। } अविकारी विसर्गः

तरुः + तावत्। } स्वरूपः विसर्गः

## भाषासूत्रम् – ३



### (अ) व्यञ्जनान्तनामानि

अस्माभिः स्वरान्तनामानि पठितानि। अधुना व्यञ्जनान्तनामानि द्रष्टव्यानि। अत्र अन्तिमं व्यञ्जनं किम्?

१. सुमनस् – स्  २. अप्सरस् – स्  ३. विद्वस् – स्  ४. दिश् – श्  ५. प्रावृष् – ष्  ६. वणिज् – ज्
७. वाच् – च्  ८. भूभृत् – त्  ९. राजन् – न्  १०. गिर् – र्  ११. वीरुध् – ध्  १२. सुहृद् – द्

| व्यञ्जनान्तम् | पुं. | स्त्री. | नपुं. | व्यञ्जनान्तम् | पुं. | स्त्री. | नपुं. |
|---|---|---|---|---|---|---|---|
| तकारान्तम् | मरुत् | सरित् | जगत् | सकारान्तम् | चन्द्रमस् | अप्सरस् | पयस् |

**मरुत् 'त'कारान्तं पुंलिङ्गं नाम।** **सरित् 'त'कारान्तं स्त्रीलिङ्गं नाम।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| मरुत् | मरुतौ | मरुतः | प्रथमा | सरित् | सरितौ | सरितः |
| मरुतम् | मरुतौ | मरुतः | द्वितीया | सरितम् | सरितौ | सरितः |
| मरुता | मरुद्भ्याम् | मरुद्भिः | तृतीया | सरिता | सरिद्भ्याम् | सरिद्भिः |
| मरुते | मरुद्भ्याम् | मरुद्भ्यः | चतुर्थी | सरिते | सरिद्भ्याम् | सरिद्भ्यः |
| मरुतः | मरुद्भ्याम् | मरुद्भ्यः | पञ्चमी | सरितः | सरिद्भ्याम् | सरिद्भ्यः |
| मरुतः | मरुतोः | मरुताम् | षष्ठी | सरितः | सरितोः | सरिताम् |
| मरुति | मरुतोः | मरुत्सु | सप्तमी | सरिति | सरितोः | सरित्सु |
| हे मरुत्/द् | हे मरुतौ | हे मरुतः | सम्बोधनम् | हे सरित्–द् | हे सरितौ | हे सरितः |
| मरुत् इव अन्ये शब्दाः – भूभृत्, महीभृत्, क्ष्माभृत्, दिनकृत्, विश्वजित्, इन्द्रजित् इ.। | | | | सरित् इव अन्ये शब्दाः – तडित्, योषित्, विद्युत् इत्यादयः। | | |

**सुहृद् (पुं) सम्पद् (स्त्री) वीरुध् (स्त्री) इत्यादीनि द/ध कारान्तशब्दरूपाणि अपि मरुत्/सरित् इव।**

**जगत् 'त'कारान्तं नपुंसकलिङ्गं नाम।** **चन्द्रमस् 'स'कारान्तं पुंलिङ्गं नाम।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| जगत् | जगती | जगन्ति | प्रथमा | चन्द्रमाः | चन्द्रमसौ | चन्द्रमसः |
| जगत् | जगती | जगन्ति | द्वितीया | चन्द्रमसम् | चन्द्रमसौ | चन्द्रमसः |
| जगता | जगद्भ्याम् | जगद्भिः | तृतीया | चन्द्रमसा | चन्द्रमोभ्याम् | चन्द्रमोभिः |
| जगते | जगद्भ्याम् | जगद्भ्यः | चतुर्थी | चन्द्रमसे | चन्द्रमोभ्याम् | चन्द्रमोभ्यः |
| जगतः | जगद्भ्याम् | जगद्भ्यः | पञ्चमी | चन्द्रमसः | चन्द्रमोभ्याम् | चन्द्रमोभ्यः |
| जगतः | जगतोः | जगताम् | षष्ठी | चन्द्रमसः | चन्द्रमसोः | चन्द्रमसाम् |
| जगति | जगतोः | जगत्सु | सप्तमी | चन्द्रमसि | चन्द्रमसोः | चन्द्रमःसु, चन्द्रमस्सु |
| हे जगत् | हे जगती | हे जगन्ति | सम्बोधनम् | हे चन्द्रमः | हे चन्द्रमसौ | हे चन्द्रमसः |
| जगत् इव अन्यः शब्दः – वियत् | | | | चन्द्रमस् इव अन्ये शब्दाः – दुर्वासस्, वेधस्, वनौकस्, दिवौकस्, नचिकेतस्, वाजश्रवस्, रजस् इत्यादयः। | | |

**अप्सरस् 'स'कारान्तं स्त्रीलिङ्गं नाम।** **पयस् 'स'कारान्तं नपुंसकलिङ्गं नाम।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| अप्सरा: | अप्सरसौ | अप्सरस: | प्रथमा | पय: | पयसी | पयांसि |
| अप्सरसम् | अप्सरसौ | अप्सरस: | द्वितीया | पय: | पयसी | पयांसि |
| अप्सरसा | अप्सरोभ्याम् | अप्सरोभि: | तृतीया | पयसा | पयोभ्याम् | पयोभि: |
| अप्सरसे | अप्सरोभ्याम् | अप्सरोभ्य: | चतुर्थी | पयसे | पयोभ्याम् | पयोभ्य: |
| अप्सरस: | अप्सरोभ्याम् | अप्सरोभ्य: | पञ्चमी | पयस: | पयोभ्याम् | पयोभ्य: |
| अप्सरस: | अप्सरसो: | अप्सरसाम् | षष्ठी | पयस: | पयसो: | पयसाम् |
| अप्सरसि | अप्सरसो: | अप्सरस्सु | सप्तमी | पयसि | पयसो: | पय:सु,पयस्सु |
| हे अप्सर: | हे अप्सरसौ | हे अप्सरस: | सम्बोधनम् | हे पय: | हे पयसी | हे पयांसि |
| अप्सरस् इव अन्य: शब्द: – उषस्। | | | | पयस् इव अन्ये शब्दा: – तपस्, अम्भस्, तेजस्, ओजस्, नभस्, यशस्, स्रोतस्, तमस्, मनस्, वयस्, वासस्, सरस्, नमस्, चेतस्। | | |

## जिज्ञासापत्रम्



**१. उचितलिङ्गानुसारं पृथक्कुरुत।**

| पुं. | स्त्री. | नपुं. |
|---|---|---|
| --- | --- | --- |

(योषित्, भूभृत्, दिनकृत्, विद्युत्, वियत्, क्ष्माभृत्, तडित्)

**३. योग्यं रूपं लिखत।**

१. राजा नाम ----- (क्ष्माभृत्)।

२. ----- (सरित्) जलं शीतलम्।

३. आयुर्वेद: ----- (जगत्) विख्यात:।

४. वर्षाकाले ------ (वियत्) तडित् प्रकाशते।

५.--- (मरुत्) साहाय्येन --- (विद्युत्) निर्मीयते।

**२. तालिकां पूरयत।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| -- | -- | जगन्ति | प्रथमा |
| अप्सरसा | -- | -- | तृतीया |
| -- | -- | मरुत्सु | सप्तमी |
| -- | भूभृतो: | -- | षष्ठी |
| सरित: | -- | -- | पञ्चमी |
| -- | तेजसी | -- | द्वितीया |
| -- | -- | उषस्सु | सप्तमी |

**४. महत् इति तकारान्तं विशेषणं पठित्वा तालिकां पूरयत।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| महान् नृप: | महान्तौ नृपौ | महान्त: नृपा: | महान् गुरु: | महान्तौ --- | महान्त: --- |
| महान् कवि: | महान्तौ कवी | महान्त: कवय: | महान् --- | महान्तौ ऋषी | महान्त: --- |
| महती शिला | महत्यौ शिले | महत्य: शिला: | महती --- | महत्यौ --- | महत्य: नार्य: |
| महती नदी | महत्यौ नद्यौ | महत्य: नद्य: | महती धेनु: | महत्यौ --- | महत्य: --- |
| महत् नगरम् | महती नगरे | महान्ति नगराणि | महत् --- | महती विश्वे | महान्ति --- |
| महत् वस्तु | महती वस्तुनी | महान्ति वस्तूनि | महत् सर: | महती --- | महान्ति --- |

### ५. उचितलिङ्गानुसारं पृथक्कुरुत।

| पुं. | स्त्री. | नपुं. |
|---|---|---|
| | | |

दुर्वासस्, उषस्, तपस्, अम्भस्, तेजस्, ओजस्, नभस्, यशस्, स्रोतस्, वेधस्, वयस्, वासस्, पयस्, चेतस्, मनस्।

### ६. योग्यं रूपं लिखत।

ऋषीणां ----- (तेजस्) दिव्यम्। ----- (तपस्) ते सामर्थ्यं प्राप्नुवन्ति। ----- (नभस्) इव अमर्यादिता तेषां दृष्टि:। केचन ऋषय: ----- (वयस्) वृद्धा:, अपि च केचन ----- (तपस्) वृद्धा:। तेषां ----- (चेतस्) कुसुमात् अपि मृदूनि। तेषां सामर्थ्यस्य ----- (स्रोतस्) अस्ति तेषां तपश्चर्या। ते विमलानि ----- (वासस्) परिधारयन्ति। ----- (प्रत्युषस्) सत्वरम् उत्थाय ते ----- (तपस्) आचरन्ति। धन्यास्ते ऋषय:।

## (आ) सर्वनामानि।

**'सर्व' पुंलिङ्गं सर्वनाम।** **'सर्व' स्त्रीलिङ्गं सर्वनाम।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| सर्व: | सर्वौ | सर्वे | प्रथमा | सर्वा | सर्वे | सर्वा: |
| सर्वम् | सर्वौ | सर्वान् | द्वितीया | सर्वाम् | सर्वे | सर्वा: |
| सर्वेण | सर्वाभ्याम् | सर्वै: | तृतीया | सर्वया | सर्वाभ्याम् | सर्वाभि: |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्य: | चतुर्थी | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्य: |
| सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्य: | पञ्चमी | सर्वस्या: | सर्वाभ्याम् | सर्वाभ्य: |
| सर्वस्य | सर्वयो: | सर्वेषाम् | षष्ठी | सर्वस्या: | सर्वयो: | सर्वासाम् |
| सर्वस्मिन् | सर्वयो: | सर्वेषु | सप्तमी | सर्वस्याम् | सर्वयो: | सर्वासु |
| हे सर्व | हे सर्वौ | हे सर्वे | सम्बोधनम् | हे सर्वे | हे सर्वे | हे सर्वा: |

**'सर्व' नपुंसकलिङ्गं सर्वनाम।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| सर्वम् | सर्वे | सर्वाणि | प्रथमा |
| सर्वम् | सर्वे | सर्वाणि | द्वितीया |
| सर्वेण | सर्वाभ्याम् | सर्वै: | तृतीया |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्य: | चतुर्थी |
| सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्य: | पञ्चमी |
| सर्वस्य | सर्वयो: | सर्वेषाम् | षष्ठी |
| सर्वस्मिन् | सर्वयो: | सर्वेषु | सप्तमी |
| हे सर्व | हे सर्वे | हे सर्वाणि | सम्बोधनम् |

'अन्यत्' 'पर' च इति सर्वनामद्वयं 'सर्व'शब्द: इव भवति। 'अन्यत्' सर्वनामपदस्य नपुंसकलिङ्गे तु प्रथमायां द्वितीयायां सम्बोधने च अन्यत्/अन्यद् अन्ये अन्यानि एवं रूपाणि भवन्ति।

## (इ) धातूनां द्वितीयः समूहः ।

**एतानि उदाहरणानि पठत।**



बालकः संस्कृतं पठति / **अधीते**।



सौरभः आम्रं खादति / **अश्नाति**।



सरस्वती मां रक्षतु/**पातु**।



माता जलं यच्छति / **ददाति**।



श्यामः वयस्यं वदति / **ब्रूते**।



वृद्धः गीतम् आकर्णयति/**शृणोति।**

अत्र वाक्येषु क्रियापदद्वयं पश्यत। तयोः अर्थः समानः किन्तु गणौ भिन्नौ। तस्मात् विकरणे अपि भिन्ने।

खादति = खाद् + अ + ति (खाद् १ प. प.)

अश्नाति = अश् + ना + ति (अश् ९ प. प.)

| | | | |
|---|---|---|---|
| पठति | पठ् (१ प. प.) | अधीते | अधि + इ (२ आ. प. ) |
| रक्षतु | रक्ष् (१ प. प.) | पातु | पा (२ प. प.) |
| यच्छति | दा-यच्छ् (१ प. प.) | ददाति | दा (३ उ. प.) |
| वदति | वद् (१ प. प.) | ब्रूते | ब्रू (२ उ. प.) |
| आकर्णयति | आ + कर्ण् (१० उ. प.) | शृणोति | श्रु-शृ (५ प. प.) |

अष्टमीकक्षायाम् अस्माभिः १, ४, ६, १० इत्येषां गणानां रूपपरिचयः दृष्टः। तेषां विकरणानि अ, य, अ, अय इति एतानि अकारान्तानि। धातूनां द्वितीयसमूहे २, ३, ५, ७, ८, ९ गणाः सन्ति। तेषु केषाञ्चित् नित्य-प्रयुक्तानां धातुरूपाणाम् अध्ययनम् अत्र करणीयम् अस्ति।

| **धातूनां प्रथमः समूहः** | | | | **धातूनां द्वितीयः समूहः** | | | |
|---|---|---|---|---|---|---|---|
| धातुः | गणः | विकरणम् | उदाहरणम् | धातुः | गणः | विकरणम् | उदाहरणम् |
| पठ् | १ | अ | पठति | अस् | २ | - | अस्ति |
| नृत् | ४ | य | नृत्यति | दा | ३ | द्वित्वरूपम् | ददाति |
| लिख् | ६ | अ | लिखति | शक् | ५ | नु | शक्नोति |
| कथ् | १० | अय | कथयति | भुज् | ७ | न | भुनक्ति |
| | | | | कृ | ८ | उ | करोति |
| | | | | ज्ञा | ९ | ना | जानाति |

## प्रत्ययाः

### लट्लकारः

| परस्मैपदम् | | | | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| ति | तः | अन्ति | प्रथमः | ते | आते | अते |
| सि | थः | थ | मध्यमः | से | आथे | ध्वे |
| मि | वः | मः | उत्तमः | ए | वहे | महे |

### लङ्लकारः

| परस्मैपदम् | | | | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| त् | ताम् | अन् | प्रथमः | त | आताम् | अत |
| : | तम् | त | मध्यमः | थाः | आथाम् | ध्वम् |
| अम् | व | म | उत्तमः | इ | वहि | महि |

### लोट्लकारः

| परस्मैपदम् | | | | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| तु | ताम् | अन्तु | प्रथमः | ताम् | आताम् | अताम् |
| हि | तम् | त | मध्यमः | स्व | आथाम् | ध्वम् |
| आनि | आव | आम | उत्तमः | ऐ | आवहै | आमहै |

### विधिलिङ्लकारः

| परस्मैपदम् | | | | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| यात् | याताम् | युः | प्रथमः | ईत | ईयाताम् | ईरन् |
| याः | यातम् | यात | मध्यमः | ईथाः | ईयाथाम् | ईध्वम् |
| याम् | याव | याम | उत्तमः | ईय | ईवहि | ईवहि |

## अस् (२ प.प.)

| लट्लकारः | | | | लङ्लकारः | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| अस्ति | स्तः | सन्ति | प्रथमः | आसीत् | आस्ताम् | आसन् |
| असि | स्थः | स्थ | मध्यमः | आसीः | आस्तम् | आस्त |
| अस्मि | स्वः | स्मः | उत्तमः | आसम् | आस्व | आस्म |

| लोट्लकारः | | | | विधिलिङ्लकारः | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| अस्तु | स्ताम् | सन्तु | प्रथमः | स्यात् | स्याताम् | स्युः |
| एधि | स्तम् | स्त | मध्यमः | स्याः | स्यातम् | स्यात |
| असानि | असाव | असाम | उत्तमः | स्याम् | स्याव | स्याम |

## कृ (८ उ.प.)

परस्मैपदम् — **लट्लकार:** — आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| करोति | कुरुत: | कुर्वन्ति | प्रथम: | कुरुते | कुर्वाते | कुर्वते |
| करोषि | कुरुथ: | कुरुथ | मध्यम: | कुरुषे | कुर्वाथे | कुरुध्वे |
| करोमि | कुर्व: | कुर्म: | उत्तम: | कुर्वे | कुर्वहे | कुर्महे |

परस्मैपदम् — **लङ्लकार:** — आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| अकरोत् | अकुरुताम् | अकुर्वन् | प्रथम: | अकुरुत | अकुर्वाताम् | अकुर्वत |
| अकरो: | अकुरुतम् | अकुरुत | मध्यम: | अकुरुथा: | अकुर्वाथाम् | अकुरुध्वम् |
| अकरवम् | अकुर्व | अकुर्म | उत्तम: | अकुर्वि | अकुर्वहि | अकुर्महि |

परस्मैपदम् — **लोट्लकार:** — आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| करोतु | कुरुताम् | कुर्वन्तु | प्रथम: | कुरुताम् | कुर्वाताम् | कुर्वताम् |
| कुरु | कुरुतम् | कुरुत | मध्यम: | कुरुष्व | कुर्वाथाम् | कुरुध्वम् |
| करवाणि | करवाव | करवाम | उत्तम: | करवै | करवावहै | करवामहै |

परस्मैपदम् — **विधिलिङ्लकार:** — आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| कुर्यात् | कुर्याताम् | कुर्यु: | प्रथम: | कुर्वीत | कुर्वीयाताम् | कुर्वीरन् |
| कुर्या: | कुर्यातम् | कुर्यात | मध्यम: | कुर्वीथा: | कुर्वीयाथाम् | कुर्वीध्वम् |
| कुर्याम् | कुर्याव | कुर्याम | उत्तम: | कुर्वीय | कुर्वीवहि | कुर्वीमहि |

## शक् (५ प.प.)

**लट्लकार:** — **लङ्लकार:**

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| शक्नोति | शक्नुत: | शक्नुवन्ति | प्रथम: | अशक्नोत् | अशक्नुताम् | अशक्नुवन् |
| शक्नोषि | शक्नुथ: | शक्नुथ | मध्यम: | अशक्नो: | अशक्नुतम् | अशक्नुत |
| शक्नोमि | शक्नुव: | शक्नुम: | उत्तम: | अशक्नवम् | अशक्नुव | अशक्नुम |

**लोट्लकार:** — **विधिलिङ्लकार:**

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| शक्नोतु | शक्नुताम् | शक्नुवन्तु | प्रथम: | शक्नुयात् | शक्नुयाताम् | शक्नुयु: |
| शक्नुहि | शक्नुतम् | शक्नुत | मध्यम: | शक्नुया: | शक्नुयातम् | शक्नुयात |
| शक्नवानि | शक्नवाव | शक्नवाम | उत्तम: | शक्नुयाम् | शक्नुयाव | शक्नुयाम |

**लट्लकारः** — **श्रु (शृ) (५ प.प.)** — **लङ्लकारः**

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| शृणोति | शृणुतः | शृण्वन्ति | प्रथमः | अशृणोत् | अशृणुताम् | अशृण्वन् |
| शृणोषि | शृणुथः | शृणुथ | मध्यमः | अशृणोः | अशृणुतम् | अशृणुत |
| शृणोमि | शृणुवः/शृण्वः | शृणुमः/शृण्मः | उत्तमः | अशृणवम् | अशृणुव/अशृण्व | अशृणुम/अशृण्म |

**लोट्लकारः** — **विधिलिङ्लकारः**

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| शृणोतु | शृणुताम् | शृण्वन्तु | प्रथमः | शृणुयात् | शृणुयाताम् | शृणुयुः |
| शृणु | शृणुतम् | शृणुत | मध्यमः | शृणुयाः | शृणुयातम् | शृणुयात |
| शृणवानि | शृणवाव | शृणवाम | उत्तमः | शृणुयाम् | शृणुयाव | शृणुयाम |

**जिज्ञासापत्रम्**



**योग्यं पर्यायं चित्वा लिखत।**

१. छात्राः यशः ________। (प्राप्नोतु, प्राप्नुवन्तु)
२. अहं बालः ________। (अस्मि, स्मः)
३. सा पाकं ________। (कुरुते, कुर्वते)
४. सः गातुं ________। (शक्नोमि, शक्नोति)
५. आचार्यः पाठशालाम् _______।(अयात्, अयुः)
६. त्वं संस्कृतेन सम्भाषणं _______। (कुरु, करोतु)
७. अपि अहं प्रवेशं _______ ? (करवावहै, करवै)
८. मालाकारः पुष्पाणि _______। (चिनोति, चिन्वन्ति)
९. शूरः पराक्रमेण विजयं प्राप्तुं ________। (शक्नोति, शक्नुवन्ति)

## (ई) कर्तृवाच्यं कर्मवाच्यं च।

क्रियापदद्वयम्

| कर्तृवाच्यम् (कर्तरि) | कर्मवाच्यम् (कर्मणि) |
|---|---|
| (**कर्ता** प्रधानः) | (**कर्म** प्रधानम्) |
| प्रधानत्वात् कर्तृपदस्य **प्रथमा** | प्रधानत्वात् कर्मपदस्य **प्रथमा** |
| यथा – **बालकः** ग्रन्थं पठति। | बालकेन **ग्रन्थः** पठ्यते। |
| कः पठति ? बालकः। | कः पठ्यते ? ग्रन्थः। |

| प्रयोगः | कर्ता | कर्म | क्रियापदम् |
|---|---|---|---|
| कर्तृवाच्यः | प्रथमा विभक्तिः | द्वितीया विभक्तिः | कर्तृपदस्य पुरुषवचनानुसारम् |
| कर्मवाच्यः | तृतीया विभक्तिः | प्रथमा विभक्तिः | कर्मपदस्य पुरुषवचनानुसारम् |

**कर्मवाच्यानि क्रियापदानि –**

१) पा – पायते। (२ प.प.)
ज्ञा – ज्ञायते।
• ध्यै – ध्यायते।
• त्रै – त्रायते।

२) पा – पीयते। (१ प.प.)
मा – मीयते।
दा – दीयते।

३) जि – जीयते।
चि – चीयते।

नी – नीयते।
प्री – प्रीयते।
• गै – गीयते।

४) श्रु – श्रूयते।
स्तु – स्तूयते।

५) कृ – क्रियते।
हृ – ह्रियते।

६) तॄ – तीर्यते।
स्मृ – स्मर्यते।

७) नम् – नम्यते।

यम् – यम्यते।
गम् – गम्यते।
८) लिख् – लिख्यते।
दृश् – दृश्यते।
खाद् – खाद्यते।
पठ् – पठ्यते।
मुच् – मुच्यते।

९) पूज् – पूज्यते।
गण् – गण्यते।
कथ् – कथ्यते।
रच् – रच्यते।
तड् – ताड्यते।
चुर् – चोर्यते।
वृ – वार्यते।

धृ – धार्यते।
घुष् – घोष्यते।
क्षाल् – क्षाल्यते।
मन्त्र् – मन्त्र्यते।
१०) दंश् – दश्यते।
ग्रन्थ् – ग्रथ्यते।
११) वद् – उद्यते।

वह् – उह्यते।
वप् – उप्यते।
वच् – उच्यते।
ह्वे – हूयते।
१२) प्रच्छ् – पृच्छ्यते।
ग्रह् – गृह्यते।
ब्रू – उच्यते।

**कर्मवाच्यक्रियापदसूत्रम् = मूलधातुः + य + आत्मनेपदीयकालार्थप्रत्ययः।**

## दृश् – पश्य् (१ प.प.) कर्मवाच्यः लट्लकारः (वर्तमानकालः)

| ए. व. | द्विव. | ब. व | पुरुषः | ए. व. | द्विव. | ब. व. |
|---|---|---|---|---|---|---|
| सः/सा/तद् | तौ/ते/ते | ते/ताः/तानि | **प्रथमः** | दृश्यते | दृश्येते | दृश्यन्ते |
| त्वम् | युवाम् | यूयम् | **मध्यमः** | दृश्यसे | दृश्येथे | दृश्यध्वे |
| अहम् | आवाम् | वयम् | **उत्तमः** | दृश्ये | दृश्यावहे | दृश्यामहे |

**पञ्चदश वाक्यानि।**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| १. रामेण सः दृश्यते। | २. रामेण तौ दृश्येते। | ३. रामेण ते दृश्यन्ते। |
| ४. रामेण सा दृश्यते। | ५. रामेण ते दृश्येते। | ६. रामेण ताः दृश्यन्ते। |
| ७. रामेण तत् दृश्यते। | ८. रामेण ते दृश्येते। | ९. रामेण तानि दृश्यन्ते। |
| १०. रामेण त्वं दृश्यसे। | ११. रामेण युवां दृश्येथे। | १२. रामेण यूयं दृश्यध्वे। |
| १३. रामेण अहं दृश्ये। | १४. रामेण आवां दृश्यावहे। | १५. रामेण वयं दृश्यामहे। |

'सः दृश्यते' इति वाक्यस्य अर्थः 'सः पश्यति' इति **न**। अपि तु अन्यः कोऽपि तं पश्यति। (रामेण) सः दृश्यते इति अर्थः। अत्र **सः** इति कर्मपदं, न तु कर्तृपदम्।

**कर्मवाच्य–रूपाणि अन्यलकारेषु अपि भवन्ति।**

### जिज्ञासापत्रम्



**रिक्तस्थानं पूरयत। प्रयोगपरिचयं च लिखत।**

१. _____ नृत्यं क्रियते। (अप्सरस्)
२. सुवर्णा _____ गणयति। (पुष्प)
३. भक्ताः ईश्वरं _____। (पूजयति/पूजयन्ति)
४. _____ चित्रपटः दृश्यते। (अस्मद्)
५. बालकाः फलानि _____। (लभे/लभन्ते)
६. _____ वन्दे मातरम्। (अस्मद्)
७. राधिकया त्वं _____। (आहूयते/आहूयसे)
८. _____ रामायणं रच्यते। (वाल्मीकि)
९. _____ जलं पिबसि। (युष्मद्)
१०. शिक्षकेण वयम् _____। (उपदिश्यन्ते/उपदिश्यामहे)

## (उ) तत्पुरुषः



### १. विभक्तितत्पुरुषः।



१) खगाः वनं गताः।
२) तृणैः रचितानि तेषां नीडानि।
३) वृक्षेषु खगानां निवासाय नीडानि सन्ति।
४) पर्जन्यात् रक्षिताः खगाः आनन्दन्ति।
५) खगानां जीवनं श्रमैः परिपूर्णम्।
६) स्वकार्ये निरताः खगाः ध्येयशीलाः।

१. **वनं** गताः = वनगताः। (द्वितीया विभक्तिः) २. **तृणैः** रचितानि = तृणरचितानि। (तृतीया विभक्तिः) ३. **निवासाय** नीडानि = निवासनीडानि। (चतुर्थी विभक्तिः) ४. **पर्जन्यात्** रक्षिताः = पर्जन्यरक्षिताः। (पञ्चमी विभक्तिः) ५. **खगानां** जीवनम् = खगजीवनम्। (षष्ठी विभक्तिः)६. **स्वकार्ये** निरताः = स्वकार्यनिरताः। (सप्तमी विभक्तिः)

अत्र प्रथमपदं द्वितीयपदेन कयाचित् विभक्त्या संयुज्यते। अतः एषः समासः 'विभक्तितत्पुरुषः' इति उच्यते।

| समास–प्रकारः | समस्तपदम् | उत्तरपदानाम् आवलिः | उदाहरणानि | समासविग्रहः |
|---|---|---|---|---|
| द्वितीया तत्पुरुषः | वृक्षाश्रितः।  वृक्षम् आश्रितः (मर्कटः)। | श्रित, आश्रित, गत, आपन्न, अतीत, प्राप्त | शालागमनम्, क्रमप्राप्तः, भूगतः, भूमिगतः, कृष्णाश्रितः, गुणातीतः, सुखापन्नः। | शालां गमनम्, क्रमं प्राप्तः, भुवं गतः, भूमिं गतः, कृष्णम् आश्रितः, गुणान् अतीतः, सुखम् आपन्नः। |
| तृतीया तत्पुरुषः | केशविहीनः  केशैः विहीनः/रहितः। | सम्पन्न, रहित, हीन, विकल, वर्जित, युक्त, सदृश, आढ्य | धनसम्पन्नः, बुद्धिहीनः, चरणविकलः, शर्करामिश्रितः, चिन्तासमा, बदरसदृशः, वर्णमिश्रितः, धनाढ्यः। | धनेन सम्पन्नः, बुद्ध्या हीनः, चरणेन विकलः, शर्करया मिश्रितः, चिन्तया समा, बदरेण सदृशः, वर्णैः मिश्रितः, धनेन आढ्यः। |
| चतुर्थी तत्पुरुषः | दानपेटिका   दानाय पेटिका। | अर्थम् | देशार्थम्, कन्यार्थम्, विहारार्थम्, रक्षणार्थम्, शिल्पालयः, तपोवनम्, ग्रन्थालयः, कार्यशक्तिः कुण्डलहिरण्यम्, घटमृत्तिका। | देशाय इति, कन्यायै इति, विहाराय इति, रक्षणाय इति, शिल्पेभ्यः आलयः, तपसे वनम्, ग्रन्थेभ्यः आलयः, कार्याय शक्तिः, कुण्डलाभ्याम् हिरण्यम्, घटाय मृत्तिका। |

| | | | | |
|---|---|---|---|---|
| **पञ्चमी तत्पुरुष:** | हस्तपतितम्।  हस्तात् पतितम्।<br>(करवस्त्रम्) | मुक्त, भीत, त्रात, पतित, रक्षित | प्रदूषणमुक्त:, दानवत्रात:, असुरभीता, वृक्षपतितम्, सर्परक्षित:। | प्रदूषणात् मुक्त:, दानवात् त्रात:, असुरात् भीता, वृक्षात् पतितम्, सर्पात् रक्षित:। |
| **षष्ठी तत्पुरुष:** | वृक्षशाखा।  वृक्षस्य शाखा। | प्रिय, कृते | छात्रप्रिय: मत्कृते, समुद्रशक्ति:, रामायणम्, विद्युत्प्रवाह:, सूर्योदय:, दशरथपुत्र:, पित्राज्ञा। | छात्राणां प्रिय:, मम कृते, समुद्रस्य शक्ति:, रामस्य अयनम्, विद्युत: प्रवाह:, सूर्यस्य उदय:, दशरथस्य पुत्र:, पितु: आज्ञा। |
| **सप्तमी तत्पुरुष:** | नृत्यनिपुणा।  नृत्ये निपुणा। | कुशल, रत, प्रवीण, मग्न, व्यग्र, ख्यात, विदित, शौण्ड | कलाकुशल:, क्रीडापटु:, कार्यरत:, प्रजावत्सल:, गणिततज्ज्ञ:, भुवनविदित:, जगत्प्रसिद्ध:। | कलायां कुशल:, क्रीडायां पटु:, कार्ये रत:, प्रजासु वत्सल:, गणिते तज्ज्ञ:, भुवने विदित:, जगति प्रसिद्ध:। |

## जिज्ञासापत्रम्



**१. समस्तपदं लिखत।** १. कल्पनाम् अतीत:। २. ग्रामं गत:। ३. हस्तेन लिखितम्। ४. सम्भाषणे चतुर:। ५. जलस्य बिन्दु:। ६. ज्ञानस्य लालसा। ७. काकाय बलि:। ८. चोरात् भयम्। ९. भाषाया: अभ्यास:।

**२. अधोदत्तान् शब्दान् पठत। एते शब्दा: समासे कां विभक्तिम् अपेक्षन्ते इति लिखत।**

१. आढ्य, २. गत, ३. त्रात, ४. शौण्ड, ५. अर्थम्, ६. मुक्त, ७. सदृश, ८. विकल, ९. प्रिय, १०. विदित

**३. रिक्तस्थानानि पूरयत।**

| समस्तपदम् | समासविग्रह: | समासप्रकार: |
|---|---|---|
| **तपोवनम्** | ----- | चतुर्थी तत्पुरुष: |
| ----- | चिन्ताया: मुक्त: | पञ्चमी तत्पुरुष: |
| **नेत्रहीन:** | नेत्राभ्यां हीन: | ----- |
| **नृपकन्या** | नृपस्य कन्या | ----- |

माता प्रभाते कार्यालयं गच्छति। गमनात् पूर्वं सा मन्दाराय करणीयानि कार्याणि कथयति। कार्याणाम् आवलिः तु प्रदीर्घा आसीत्। अधुना सायङ्काल समयः। मातुः प्रत्यागमनसमयः। मन्दारः किञ्चित् भीतः यतः सर्वाणि कार्याणि न समाप्तानि। (माता प्रविशति)

माता – ''रे मन्दार, कार्याणाम् आवलिं दर्शय सत्वरम्।''

| आवलिः | | कृतम्/न कृतम् |
|---|---|---|
| शयनगृहस्य स्वच्छता | ✓ | शयनगृहं स्वच्छीकृतम्। |
| गृहे जलपूरणम् | ✓ | जलं पूरितम्। |
| अवकरक्षेपणम् | ✓ | अवकरः क्षिप्तः। |
| प्रातराशभक्षणम् | ✓ | प्रातराशः भक्षितः। |
| गृहमार्जनम् | × | गृहं न मार्जितम्। |
| वृक्षेषु जलसिञ्चनम् | × | वृक्षेषु जलं न सिक्तम्। |
| दुग्धालयात् दुग्धक्रयणम् | ✓ | दुग्धालयात् दुग्धं क्रीतम्। |
| वायुचुल्लेः स्वच्छता | × | वायुचुल्लिः न स्वच्छीकृता। |
| वित्तकोषात् धन-आहरणम् | × | वित्तकोषात् धनं न आहृतम्। |
| स्वाध्यायः | ✓ | स्वाध्यायः कृतः। |

एतत् सर्वं केन **कृतम्** /न **कृतम्** ?

**मन्दारेण।**

मन्दारेण कार्यं **कृतम्**।
मात्रा कार्यं **दत्तम्**।
बालेन जलं **पीतम्**।
अस्माभिः पुस्तकानि **पठितानि**।
महिलया अवकरः **क्षिप्तः**।
ताभिः वस्त्राणि **प्रक्षालितानि**।
छात्राभिः पुस्तिकाः **लिखिताः**।

**सम्भाषापत्रम्**



**रिक्तस्थानं पूरयत।**

१. माधवेन पत्रम् ________। (आनीतः/आनीतम्)
२. मर्कटेन टोपिकाः ________। (गृहीतम्/गृहीताः)
३. वृद्धया देवाः ________। (प्रार्थिताः/प्रार्थितः)
४. युष्माभिः नाटकं ________। (दृष्टः/दृष्टम्)
५. उत्तमैः कार्यम् ________। (आरब्धा/आरब्धम्
६. धेनुभिः तृणानि ________। (भुक्तम्/भुक्तानि)
७. गुरुणा दक्षिणा ________। (याचितौ/याचिता)

**पठत बोधत।**


रात्रिर्गमिष्यति भविष्यति सुप्रभातम्
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ।।

कश्चन भ्रमरः मधुपाने मग्नः सायङ्कालं यावत् कमलकोषे एव तिष्ठति। यदा रात्रिः जाता तदा कमलदलानि निमीलितानि। कोषबद्धेन भ्रमरेण चिन्तितम्, रात्रिः तु **गमिष्यति**। अचिरादेव सुप्रभातं **भविष्यति**। सूर्यदेवः **उदेष्यति**। पुनश्च कमलिनी प्रफुल्लिता **भविष्यति**। अहं च कमलकोषात् मुक्तः **भविष्यामि**। पुनः स्वातन्त्र्यं **लप्स्ये**। किन्तु हा हन्त ! कोषगतः भ्रमरः यावत् इत्थं चिन्तयति तावदेव कश्चन गजयूथः तत्र आयातः। तेषु एकेन गजेन नलिनी उत्पाटिता। भ्रमरः तु कमलकोषे एव निबद्धः।

अहो दैवी विचित्रा गतिः।

# चतुर्दशः पाठः । काव्यशास्त्रविनोदः । (कण्ठस्थीकरणार्थम्)

संस्कृतभाषायां सुभाषितानां महाभाण्डारं विद्यते। कानिचन सुभाषितानि चमत्कृतिपूर्णानि। तेषाम् अर्थावबोधः न सरलः। प्रहेलिकाः, कूटप्रश्नाः समस्यापूर्तिः च एते प्रकाराः अस्माकं कृते मस्तिष्कखाद्यम् एव। सुभाषितानां रचना हास्यरसपूर्णा हृद्या च। अतः एव एते काव्यप्रकाराः वाचकानां मनः विनोदयन्ति।




**साक्षरा विपरीताश्चेद् राक्षसा एव केवलम्।**
**सरसो विपरीतोऽपि सरसत्वं न मुञ्चति ॥१॥**

**वृक्षाग्रवासी न च पक्षिराजः**
**त्रिनेत्रधारी न च शूलपाणिः।**
**त्वग्वस्त्रधारी न च सिद्धयोगी**
**जलं च बिभ्रन्न घटो न मेघः ॥२॥**

**तातेन कथितं पुत्र पत्रं लिख ममाज्ञया।**
**न तेन लिखितं पत्रं पितुराज्ञा न लङ्घिता ॥३॥**

**न तस्यादिर्न तस्यान्तः यो मध्ये तस्य तिष्ठति।**
**तवाप्यस्ति ममाप्यस्ति यो जानाति स पण्डितः ॥४॥**



**मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम्।**
**लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥५॥**

**गङ्गायाश्चञ्चलतरे वारिणि प्रतिबिम्बितम्।**
**शोभते तारकायुक्तं शतचन्द्रं नभस्तलम् ॥६॥**

**यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून् मृषा**
**नैषां गर्ववचः शृणोषि न च तान् प्रत्याशया धावसि।**
**काले बालतृणानि खादसि परं निद्रासि निद्रागमे**
**तन्मे ब्रूहि कुरङ्ग कुत्र भवता किं नाम तप्तं तपः ॥७॥**

## स्पष्टीकरणम्

**श्लोकः १** – साक्षराः इति पदं विपरीतक्रमेण पठितं चेत् 'राक्षसाः' इति भवति। परं 'सरसः' इति पदम् यथानुक्रमं वा विपरीतक्रमेण पठितं चेत् 'सरसः' इत्येव भवति। अत्र कविकल्पना एवं कविकौशलं विभाति।

**श्लोकः २** – सः वृक्षस्य अग्रे वसति किन्तु पक्षिराजः गरुडः न। तस्य त्रीणि नेत्राणि सन्ति किन्तु सः शूलपाणिः शङ्करः न। सः वल्कलसदृशं वस्त्रं धारयति किन्तु सः सिद्धयोगी न। सः जलं धारयति किन्तु सः न घटः न च मेघः। अस्य उत्तरं वर्तते नारिकेलफलम्।

**श्लोकः ३** – तातेन कथितं, "हे पुत्र, मम आज्ञया पत्रं लिख।" तेन पुत्रेण पत्रं न लिखितम्। तथापि पितुः आज्ञा न लङ्घिता। अर्थसङ्गतिः न दृश्यते। यदि 'न तेन' इति एकपदं क्रियते चेत् 'नतेन' इति पदेन अर्थबोधः भवति। नतेन नाम नम्रस्वभावेन पुत्रेण पत्रं लिखितम्। अपि च पितुः आज्ञा न लङ्घिता।

**श्लोकः ४** – कूटप्रश्नः अयम्। अस्य उत्तरम् – तस्य आदिः न, तस्य अन्तः न, तस्य मध्ये यः तिष्ठति ( तत् ) तव अपि अस्ति, मम अपि अस्ति।

**श्लोकः ५** – मृगाः तृणानि खादन्ति। मत्स्याः जले विहरन्ति। साधवः सन्तोषं यच्छन्ति। परम् अस्मिन् जगति लुब्धकाः मृगान्, धीवराः मत्स्यान् तथा दुष्टाः साधून् निष्कारणमेव पीडयन्ति। अत्र यथासङ्ख्य-अलङ्कारः विद्यते।

**श्लोकः ६** – शतचन्द्रं नभस्तलम्। इति काचन समस्या वर्तते। आकाशे चन्द्राणां शतं कथं शक्यते? इत्येषा समस्या। समस्यापूर्तिः – गङ्गानद्याः जलं कल्लोलयुक्तं विद्यते। यदा गगने तारकाः चन्द्रमाः च विलसन्ति तदा चन्द्रमसः शतं प्रतिबिम्बानि गङ्गानद्याः जले दृश्यन्ते। तदा कविः कल्पनां करोति, 'नभः शतचन्द्रम्' इव दृश्यते।

**श्लोकः ७** – हे कुरङ्ग, यत् त्वं धनिकानां वक्त्रं मुहुः न ईक्षसे, मृषा चाटून् न ब्रूषे, एषां गर्ववचः न शृणोषि, प्रत्याशया च तान् प्रति न धावसि। काले बालतृणानि खादसि परं निद्रागमे निद्रासि। तत् मे ब्रूहि, भवता किं नाम तपः तप्तम्? एषा कुरङ्गान्योक्तिः वर्तते। सज्जनान् उद्दिश्य एषा अन्योक्तिः।

## भाषाभ्यासः



### श्लोकः १

**१. एकवाक्येन उत्तरत।**

अ) विपर्ययः कस्मिन् शब्दे दृश्यते ?
आ) विपर्ययः कस्मिन् शब्दे न दृश्यते ?
इ) मानवाः कीदृशाः भवेयुः ?
ई) मानवाः कीदृशाः न भवेयुः?

**२. कोष्टकं पूरयत।**

| साक्षरः मनुजः | सरसः मनुजः |
|---|---|
| --- | --- |

(सरसत्वम्, राक्षसत्वम्, विपरीतत्वम्)

**३. समानार्थकशब्दं लिखत।** राक्षसः, सरसः

**४. सन्धिविग्रहं कुरुत।**

अ) विपरीतोऽपि = आ) विपरीताश्चेत् =

### श्लोकः २.

**१. एकवाक्येन उत्तरत।**

अ) वृक्षाग्रवासी कः ? आ) कः पक्षिराजः ?
इ) कः त्रिनेत्रधारी ? ई) कः शूलपाणिः ?
उ) कः जलं बिभर्ति ? ऊ) कः त्वग्वस्त्रं धारयति ?

**२. शब्दसमूहस्य कृते एकं संक्षेपशब्दं लिखत।**

अ) यः वृक्षस्य अग्रभागे निवसति –
आ) पक्षिणां राजा –
इ) यस्य त्रीणि नेत्राणि –
ई) शूलं पाणौ यस्य सः –
उ) यः त्वग्वस्त्रं धारयति –

**३. योग्यं पर्यायं चिनुत –**

अ) पक्षिराजः वृक्षाग्रे (वसति/न वसति)।
आ) घटः त्रीणि नेत्राणि (धारयति/न धारयति)।
इ) शूलपाणिः जलं (बिभर्ति / न बिभर्ति)।
ई) नारिकेलं त्वग्वस्त्रं (धारयति/न धारयति)।

**४. समानार्थकशब्दयुग्मं चिनुत लिखत च।**

पक्षिराजः, शूलपाणिः, जलम्, मेघः, शङ्करः, वृक्षः, सिद्धयोगी, गरुडः, तरुः, तोयम्, जलदः, तपस्वी।

### श्लोकः ३.

**१. कः कं वदति?** 'पत्रं लिख।'

**२. एकवाक्येन उत्तरत।**

अ) केन आज्ञा दत्ता? आ) केन आज्ञा न लङ्घिता।
इ) पत्रं केन लिखितम् ?

**३. विशेषण-विशेष्य-अन्विर्ति पूरयत।**

| विशेषणम् | विशेष्यम् |
|---|---|
| ________ | पुत्रः |
| लिखितम् | ________ |

**४. सन्धिविग्रहं कुरुत।** ममाज्ञया, पितुराज्ञा

**५. श्लोकात् 'क्त' प्रत्ययान्तरूपाणि (क.भू.धा.वि.) चिनुत लिखत च।**

### श्लोकः ४.

**१. क्रमानुसारं रचयत।**

अ) त्रि-अक्षरयुक्ते शब्दे 'य' मध्ये तिष्ठति।

आ) शब्दस्य आरम्भे 'न' विद्यते।
इ) शब्दस्य अन्ते अपि 'न' विद्यते।

**२. प्राप्तम् उत्तरम् –**

**३. सन्धिं कुरुत।**

अ) तस्य + आदि: (अ + आ) ________
आ) तस्य + अन्त: (अ + अ) ________
इ) तव + अपि (अ + अ) ________
ई) अपि + अस्ति (इ + अ) ________

**४. श्लोकात् षष्ठ्यन्तपदानि चिनुत लिखत च।**

**श्लोक: ५.**

**१. तालिकापूर्तिं कुरुत।**

| | | | | |
|---|---|---|---|---|
| | तृणवृत्ते: | | वैरी | भवति |
| | जलवृत्ते: | | वैरी | भवति |
| | सन्तोषवृत्ते: | | वैरी | भवति |

मञ्जूषा–(सज्जनस्य,धीवर:,लुब्धक:,मृगस्य,मीनस्य, पिशुन:)

**२. अधोदत्तवाक्यानि श्लोकस्थ–समानार्थक–शब्दै: पुन: लिखत।**


अ) हरिण: शष्पाणि भक्षयति तथापि व्याध: तस्य शत्रु: भवति।
आ) मत्स्य: जलं पिबति तथापि धीवर: तस्य रिपु: भवति।
इ) सत्पुरुष: नि:स्पृह: वर्तते तथापि दुर्जन: तस्य अरि: भवति।

**श्लोक: ६.**

**१. एकवाक्येन उत्तरत।**

अ) कस्या: नद्या: वर्णनं सुभाषिते वर्तते?
आ) शतचन्द्रं नभस्तलं कुत्र शोभते ?

**२. विशेषणै: जालरेखाचित्रं पूरयत।**




**३. विशेषणं लिखत।**

१) ______ वारिणि।
२) ______ नभस्तलम्।

**४. गङ्गा इति शब्दस्य अमरपङ्क्तिं लिखत।**

**श्लोक: ७.**

**१. रिक्तस्थानं पूरयत।**

अ) त्वं धनिनां ________ मुहु: न ईक्षसे।
आ) त्वं मृषा चाटून् न ________।
इ) त्वं एषां ________ न शृणोषि।
ई) त्वं तान् प्रति ________ न धावसि।
उ) त्वं काले बालतृणानि ________।
ऊ) त्वं ________ निद्रासि।
ऋ) हे कुरङ्ग, तद् ________ ब्रूहि।
ॠ) भवता किं नाम तप: ________।

**२. प्रश्ननिर्माणं कुरुत।**

अ) त्वं धनिनां वक्त्रं मुहु: न ईक्षसे।
आ) त्वं निद्रागमे निद्रासि।

**३. समानार्थकशब्दं चिनुत लिखत च।**

वदनम्, असत्यम्, शष्पम्, स्वाप:, मृग:, पश्यसि

**४. श्लोकात् षष्ठ्यन्तपदे चिनुत लिखत च।**

**यदि –– तर्हि क्रीडा –** (गणकार्यं करणीयम्।)


एकेन गणेन 'यदि' उपयुज्य एकैकं वाक्यं लेखनीयम्। अन्येन गणेन 'तर्हि' इति पदं योजयित्वा एकैकं वाक्यं लेखनीयम्। 'यदि' चिटिका: पृथक् स्थापयितव्या:। 'तर्हि' चिटिका: पृथक् स्थापयितव्या:। शिक्षकेण काऽपि एका 'यदि' चिटिका पठितव्या। अनन्तरं 'तर्हि' चिटिका पठितव्या। यद् वाक्यं तस्मात् प्राप्यते तद् अर्थपूर्णं भवेत् वा न इति न द्रष्टव्यं केवलं हसितव्यम्।
यथा – यदि अहं भिषग्वरा भविष्यामि तर्हि पशव: नर्तिष्यन्ति। ☺ ☺ ☺

# पञ्चदश: पाठ:। मनोराज्यस्य फलम्।

पुरा अमरशक्ति: नाम राजा आसीत्। तस्य पुत्रा: विवेकरहिता: शास्त्रविमुखाश्च। मनोरञ्जक-कथामाध्यमेन विष्णुशर्मा नाम पण्डित: तान् नीतिशास्त्रपारङ्गतान् अकरोत्। तदर्थं रचितानां कथानां सङ्ग्रह: एव 'पञ्चतन्त्रम्' इति नाम्ना विख्यात:। (१) मित्रभेद: (२) मित्रसम्प्राप्ति: (३) काकोलुकीयम् (४) लब्धप्रणाश: (५) अपरीक्षितकारकम् इति तानि पञ्च तन्त्राणि। अपरीक्षितकारकात् स्वीकृता प्रस्तुतकथा।

अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च।<br>
न पराभवमाप्नोति शक्रादपि कदाचन।।

- दिवास्वप्न: नाम किम्?
- 'यथा चिन्तितं तथैव अभवत्' इति कदाचित् अनुभूतं वा ?





कस्मिंश्चित् नगरे कश्चित् स्वभावकृपणो नाम कोऽपि भिक्षुक: प्रतिवसति स्म। तेन भिक्षया प्राप्तेन सक्तुपिष्टेन कलश: सम्पूरित:। तं च घटं नागदन्ते रज्वा बद्ध्वा तस्याधस्तात् कटं प्रसार्य सततं तद्विषये चिन्तयन् स: सुप्त:। स: अचिन्तयत् - "यत्परिपूर्णोऽयं घटस्तावत् सक्तुपिष्टेन वर्तते। यदि दुर्भिक्षं भवति तर्हि अस्य विक्रयणेन रूप्यकाणां शतं **प्राप्स्यामि**। ततस्तेन अहम् अजाद्वयं **क्रेष्यामि**। तत: षाण्मासिक-प्रसववशात् ताभ्यां यूथ: **भविष्यति**। ततोऽजाभि: प्रभूता: धेनू: **ग्रहीष्यामि**, धेनुभि: महिषी:, महिषीभि: वडवा:, वडवाप्रसवत: प्रभूता: अश्वा: **भविष्यन्ति**। तेषां विक्रयणात्प्रभूतं सुवर्णं **प्राप्स्यामि**। सुवर्णेन चतु:शालं गृहं **सम्पत्स्यते**। तत: कश्चित् धनिक: प्राप्तवयस्कां रूपाढ्यां कन्यां मह्यं **दास्यति**। आवयो: पुत्र: **भविष्यति**। तस्याहं सोमशर्मेति नाम **करिष्यामि**। तत: स: जानुचलनयोग्य: **भविष्यति**। एकदा सोमशर्मा मां दृष्ट्वा मत्समीपम् **आगमिष्यति**। ततोऽहं कोपाविष्ट: **अभिधास्यामि** भार्याम्, "गृहाण बालकम्" इति। साऽपि मम वचनं न **श्रोष्यति**। तावत्काले कश्चन कुक्कुर: तत्र **आगमिष्यति**। सोमशर्मा तस्मात् भीत: **भविष्यति**। ततोऽहं समुत्थाय लगुडेन तं कुक्कुरं **ताडयिष्यामि**।" एवं स्वप्नमग्न: ध्यानस्थित: स: तथैव लगुडप्रहारम् अकरोत्। तेन लगुडप्रहारेण सक्तुपिष्टेन पूर्ण: स: घट: भग्न: अभवत्। स्वभावकृपण: स: पाण्डुरताम् अगच्छत्। अत: ब्रवीमि -

अनागतवतीं चिन्तामसम्भाव्यां करोति य:।<br>
स एव पाण्डुर: शेते सोमशर्मपिता यथा।।

## भाषाभ्यास:

### १. एकवाक्येन उत्तरत।

१. भिक्षुकस्य नाम किम् ?
२. स्वभावकृपणेन घट: कुत्र बद्ध: ?
३. सोमशर्मा कस्मात् भीत: भविष्यति ?
४. सक्तुपिष्टेन पूर्ण: घट: कस्मात् कारणात् भग्न: ?
५. सोमशर्मपितु: नाम किम् ?
६. स्वभावकृपणेन कट: कुत्र प्रसारित: ?

**२. माध्यमभाषया उत्तरत।**

१. स्वभावकृपणः किमर्थं पाण्डुरताम् अगच्छत्?

२. 'अपि दिवास्वप्नदर्शनं योग्यम्?' इति कथायाः आधारेण लिखत।

**३. प्रश्ननिर्माणं कुरुत।**

१. स्वभावकृपणः अजाद्वयं क्रेष्यति। २. अयं घटः सक्तुपिष्टेन पूर्णः।

**४. (अ) सन्धिविग्रहं कुरुत।** १) तस्याधस्तात् (२) सोमशर्मेति (३) ततोऽहम्।

**(आ) वर्णविग्रहं कुरुत।** (१) दुर्भिक्षम् (२) रूपाढ्याम् (३) ध्यानस्थितः (४) स्वभावकृपणः

**(इ) सूचनानुसारं वाक्यपरिवर्तनं कुरुत।**

१. कश्चित् धनिकः स्वकन्यां मह्यं दास्यति। (लट्लकारे परिवर्तयत।)

२. बालकस्य सोमशर्मा इति नाम करिष्यामि। (कर्तृपदस्थाने 'सः' योजयत।)

३. सोमशर्मा मम समीपम् आगमिष्यति। ('मम' स्थाने 'पितृ'शब्दस्य योग्य रूपं लिखत।)

४. एकः मनुष्यः प्रतिवसति स्म। (स्म निष्कासयत)

५. अहं लगुडेन कुक्कुरं ताडयिष्यामि। (लृट्स्थाने लिङ्प्रयोगं कुरुत)

**५. समानार्थकशब्दं लिखत।** कृपणः, दुर्भिक्षम्, अश्वः, धेनुः, सुवर्णम्, कुक्कुरः।

**६. समस्तपदं कुरुत।** स्वभावेन कृपणः, कोपेन आविष्टः, लगुडस्य प्रहारः।

**पठत अवगच्छत !**

**व्यञ्जनानां विस्तारः।**

१) भयात् + मुक्तः - भयान्मुक्तः।
मृत् + मयूरः - मृन्मयूरः।

वर्गीयव्यञ्जनम् + अनुनासिकम् = वर्गीय-अनुनासिकम्

षट् + मासः = षण्मासः।
वाक् + मयम् - वाङ्मयम्।

२) तस्मात् + च = तस्माच्च।
विद्वत् + जनः =विद्वज्जनः।

तु + चु = चु

(चु = च वर्गः) (तु = त वर्गः)

अवकारात् + च = अवकराच्च।
एतत् + जयः = एतज्जयः।

३) मत् + शरः = मच्छरः।
श्रीमत् + शङ्करः = श्रीमच्छङ्करः।

त् + श् =
↓ ↓
च् छ्

तत् + श्रोतुम् = तच्छ्रोतुम्।
गच्छेत् + शिवः = गच्छेच्छिवः।

४) तस्मिन् + एव = तस्मिन्नेव।
इन् + अन्त = इन्नन्त।

ह्रस्वः स्वरः (पूर्वम्) न् कोऽपि स्वरः (पश्चात्) = न्न

तस्मिन् + उत्सवे = तस्मिन्नुत्सवे।
कुर्वन् + आसीत् = कुर्वन्नासीत्।

५) सत् + आचारः = सदाचारः।
शरात् + अपि = शरादपि।

वर्गीयव्यञ्जनम् + स्वरः/मृदुव्यञ्जनम्=तृतीयव्यञ्जनम्

षट् + विकाराः = षड्विकाराः।
तस्मात् + एव = तस्मादेव।

६) तद् + कृते = तत्कृते। क्षुध् + पीडा = क्षुत्पीडा

वर्गीयव्यञ्जनम् + कठोरव्यञ्जनम् = प्रथमव्यञ्जनम्

षड् + कारः = षट्कारः।
मृद् + साधितम् = मृत्साधितम्।

# रम्यसंस्कृतम्। विशेषण–विस्तार:।

**धवल: चन्द्र:** आकाशे वर्तते। अहं प्रतिदिनं **धवलं चन्द्रं** पश्यामि, तुष्यामि च। **धवलेन चन्द्रेण** नभ: विभाति। चकोरा: **धवलाय चन्द्राय** स्पृहयन्ति। **धवलात् चन्द्रात्** किरणा: स्रवन्ति। पूर्णिमायां **धवलस्य चन्द्रस्य** सौन्दर्यम् अपूर्वं खलु। हे **धवल चन्द्र**, शीतलतां प्रयच्छ सर्वेभ्य:।

**यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।**
**तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि।।**

संस्कृतभाषायां यथा विशेष्यस्य लिङ्गं, वचनं विभक्तय: च परिवर्तन्ते तथैव विशेषणे अपि परिवर्तनं भवति।

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् | विभक्ति: |
|---|---|---|---|
| निपुण: बालक: | निपुणा बालिका | निबिडम् अरण्यम् | प्रथमा |
| निपुणं बालकम् | निपुणां बालिकाम् | निबिडम् अरण्यम् | द्वितीया |
| निपुणेन बालकेन | निपुणया बालिकया | निबिडेन अरण्येन | तृतीया |
| निपुणाय बालकाय | निपुणायै बालिकायै | निबिडाय अरण्याय | चतुर्थी |
| निपुणात् बालकात् | निपुणाया: बालिकाया: | निबिडात् अरण्यात् | पञ्चमी |
| निपुणस्य बालकस्य | निपुणाया: बालिकाया: | निबिडस्य अरण्यस्य | षष्ठी |
| निपुणे बालके | निपुणायां बालिकायाम् | निबिडे अरण्ये | सप्तमी |
| हे निपुण बालक | हे निपुणे बालिके | हे निबिड अरण्य | सम्बोधनम् |

एवमेव द्विवचनस्य तथा बहुवचनस्य रूपाणि भवन्ति।

**कुशल: वैमानिक:।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| कुशल: वैमानिक: | कुशलौ ________ | ________ वैमानिका: | प्रथमा |
| ________ वैमानिकम् | ________ वैमानिकौ | कुशलान् ________ | द्वितीया |
| कुशलेन ________ | कुशलाभ्यां ________ | ________वैमानिकै: | तृतीया |
| ________ वैमानिकाय | ________ वैमानिकाभ्यां | कुशलेभ्य: ________ | चतुर्थी |
| कुशलात् ________ | कुशलाभ्यां ________ | ________ वैमानिकेभ्य: | पञ्चमी |
| ________ वैमानिकस्य | ________ वैमानिकयो: | कुशलानां ________ | षष्ठी |
| कुशले ________ | ________ वैमानिकयो: | ________ वैमानिकेषु | सप्तमी |
| कुशल ________ | ________ वैमानिकौ | कुशला: ________ | सम्बोधनम् |

एवमेव 'चतुर: बालक:', 'उत्तम: कवि:', 'निबिडं वनम्', 'दीर्घा नदी', 'मेधाविनी बालिका', 'पुरातनी कथा', 'प्रिय: सुहृद्', 'स्नेहालु: पिता', 'रम्या उषा:' इत्येषां विशेषण–विशेष्य–युग्मानां रूपाणि वदन्तु।

## जिज्ञासापत्रम्



**विशेषण-विशेष्ययो: युग्मं पूरयत।**

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् | विभक्ति: |
|---|---|---|---|
| पवित्र: जलाशय: | (पवित्र) नदी | (पवित्र) गङ्गाजलम् | प्रथमा |
| (नूतन) मण्डपम् | नूतनां भाषाम् | (नूतन) मन्दिरम् | द्वितीया |
| समृद्धेन (कोष) | (समृद्ध) परम्परया | समृद्धेन (नगर) | तृतीया |
| (कोमल) स्वभावाय | कोमलायै (लता) | (कोमल) पुष्पाय | चतुर्थी |
| पराधीनात् (उपाय) | (पराधीना) बुद्ध्या: | (पराधीन) जीवनात् | पञ्चमी |
| (उत्तम) पुरुषस्य | उत्तमाया: (पत्रिका) | उत्तमस्य (वृत्तपत्र) | षष्ठी |
| (स्थूल) पुत्रे | स्थूलायाम् (कन्या) | (स्थूल) पात्रे | सप्तमी |
| हे (श्रेष्ठ) ऋषे | हे श्रेष्ठे (तपस्विनी) | हे (श्रेष्ठ) औषधम् | सम्बोधनम् |

**वाक्यानि पूरयत।**

१. (विशाल) वृक्षस्य अध: पक्वानि (फलम्) अपतन्। २. (वृद्ध) पितामह्यै (सरसा) कथा: रोचन्ते।
३. निपुणया (गायिका) सह अहं (श्रवणीय) गीतं गायामि। ४. मृण्मये (पात्रम्) (शीतल) जलं विद्यते।

### पठत बोधत।

- चित्, चन युतानि विशेषणानि =

चित्, चन एतद् प्रत्ययद्वयम् अनिश्चिततां दर्शयति। 'किम्' इत्यनेन सह तयो: उपयोग: भवति।
(क: + चित्) कश्चित् नृप:, (किम् + चन) किञ्चन नगरम्।
(केन + चित्) केनचित् मुनिना। (कस्य + चित्) कस्यचित् मनुजस्य।

अस्ति **कश्चित्** नृप:। स: **कस्मिंश्चित्** नगरे अटति स्म। **केनचित्** मुनिना स: आहूत:। मुनि: अपृच्छत्, ''किम् अन्विष्यसि महाराज?'' नृप: **कश्चित्** कालं विचिन्त्य अवदत्, ''न किमपि। मम कङ्कणं हस्तात् परिभ्रष्टम्। तद् एव अन्विष्यामि।'' ऋषि: उक्तवान्, ''हे राजन्, भवान् तु नृप:। अन्यत् किमपि कङ्कणं धारयितुं शक्नोषि। तथापि कङ्कणविषये किमर्थम् एतावत् चिन्तनम्? प्रत्युत भवत: राज्ये कियन्त: जना: बुभुक्षिता:, **केचन** दरिद्रा: **केचित्** रोगपीडिता: च। **काश्चन** महिला: उद्योगेन विना निराधारा:। **कैश्चिद्** बालकै: शिक्षणं त्यक्तम्। **केषाञ्चन** शिशूनाम् अन्नादिविषये महती दुरवस्था। **केषुचन** विभागेषु जलव्यवस्था न समीचीना। एतेषां कृते **किमपि** कुरु। कङ्कणविषये चिन्तां मा कुरु। राज्यस्य व्यवस्था नृपस्य परं कर्तव्यम्।''

### पठत अवगच्छत !

**व्यञ्जनानां विस्तार:।**

७) निसर्गात् + लभ्यते = निसर्गाल्लभ्यते।
एतद् + लवणम् = एतल्लवणम्।

त्/द् + ल् → ल्

उत् + लसति = उल्लसति।
कदाचित् + लब्धम् = कदाचिल्लब्धम्।

८) अस्मिन् + लोके = अस्मिँल्लोके।
ग्रन्थान् + लिखति = ग्रन्थाँल्लिखति।

न् + ल् → ँल्

तान् + लोकान् = ताँल्लोकान्।
देवान् + लसति = देवाँल्लसति।

# षोडशः पाठः। स्वागतं तपोधनायाः।

राज्याभिषेकादनन्तरं श्रीरामचन्द्रचरितं यस्मिन् नाटके वर्तते तद् नाट्यम् उत्तररामचरितम्। भवभूतिः नाम महाकविः अस्य नाटकस्य रचयिता। अस्य नाटकस्य द्वितीये अङ्के वर्तते अयं वनदेवता-आत्रेयी संवादः।

- के अध्ययनप्रत्यूहाः?
- युष्माकम् अध्ययने यदि विघ्नाः आपतन्ति तर्हि यूयं कथं तान् निराकुरुथ?



(नेपथ्ये) स्वागतं तपोधनायाः।

(ततः प्रविशति अध्वगवेषा तापसी)

वनदेवता – आर्ये, का पुनः अत्रभवती? किं प्रयोजनं दण्डकारण्यप्रवेशस्य?

आत्रेयी – अस्मिन् प्रदेशे बहवः अगस्त्यादयः मुनयः निवसन्ति। तेभ्यः वेदान्तविद्याम् अधिगन्तुम् अत्र आगता। वाल्मीकिमहर्षेः आश्रमात् इह आगतास्मि।

वनदेवता – अहो आश्चर्यम्! अन्ये मुनयः वेदान्तज्ञानार्थं वाल्मीकिम् ऋषिम् उपगच्छन्ति। कथम् अत्रभवती तस्य आश्रमात् अत्र अटति?

आत्रेयी – तत्र अध्ययने महान् अध्ययनप्रत्यूहः उत्पन्नः। भगवति, केनापि देवताविशेषेण दारकद्वयमुपनीतम्। कुशलवौ इति तयोः नामनी। एकादशवर्षाणि यावत् भगवता वाल्मीकिना धात्री इव पोषितौ रक्षितौ च। उपनयनं कृत्वा त्रयीविद्यामपि अध्यापितौ। अतिप्रदीप्तप्रज्ञामेधे तयोः। न अस्मादृशाः सामान्याः छात्राः ताभ्यां सह अध्येतुं शक्नुवन्ति। यतः,

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदां चयः ।।

वनदेवता – अयमध्ययनप्रत्यूहः ?

आत्रेयी– अन्यश्च।

वनदेवता– अथ अपरः कः ?

आत्रेयी– अथैकदा सः महर्षिः माध्यन्दिनसवनाय तमसानदीतीरम् अगच्छत्। तत्र वृक्षे एकं क्रौञ्चयुग्मम् आसीत्। सहसा व्याधेन तयोः एकः बाणेन विद्धः। भूमौ पतितं निश्चेष्टं सहचरं दृष्ट्वा क्रौञ्ची व्यलपत्। तस्याः करुणं विलापं श्रुत्वा अकस्मात् महर्षेः मुखात् अनुष्टुप्छन्दसा अश्रुतपूर्वा दैवी वाणी स्फुरिता 'मा निषाद, प्रतिष्ठां त्वमगमः शाश्वतीः समाः......'

वनदेवता – चित्रम्। आम्नायात् अनन्तरम् नूतनः छन्दसाम् अवतारः।

आत्रेयी– तेन हि पुनः समयेन भगवान् ब्रह्मदेवः तत्र आविर्भूतः 'महर्षे, प्रबुद्धः असि। रचय रामचरितम्'। इति आदेशबद्धः सः वाल्मीकिः रामायणरचनायां मग्नः अस्ति। तस्मात् ब्रवीमि, इदानीं तत्र अध्ययनमसम्भवम्।

वनदेवता – युज्यते।

आत्रेयी – विश्रान्तास्मि भद्रे। सम्प्रति अगस्त्याश्रमस्य मार्गं कथय।

## भाषाभ्यासः 

**१. एकवाक्येन उत्तरत।**

(१) आत्रेयी वाल्मीकिमहर्षेः आश्रमात् दण्डकारण्यं किमर्थम् आगता ?

(२) दारकद्वयस्य नामनी के ?

(३) वाल्मीकिः माध्यन्दिनसवनाय कुत्र अगच्छत् ?

(४) क्रौञ्च्याः विलापं श्रुत्वा महर्षेः मुखात् कीदृशी वाणी प्रसृता ?

(५) ब्रह्मदेवः वाल्मीकिं किम् आदिशत् ?

**२. माध्यमभाषया लिखत।**

(१) आत्रेय्याः प्रथमः अध्ययनप्रत्यूहः कः ?

(२) ब्रह्मदेवेन "रचय रामचरितम्" इति वाल्मीकिः किमर्थम् आदिष्टः ?

**३. प्रश्ननिर्माणं कुरुत।**

(१) आत्रेयी वाल्मीकिमहर्षेः आश्रमात् दण्डकारण्यम् आगता।

(२) व्याधेन क्रौञ्चः बाणेन विद्धः।

(३) अन्ये मुनयः वेदान्तज्ञानार्थं वाल्मीकिऋषिम् उपगच्छन्ति।

**४. अ) शब्दस्य वर्णविग्रहं कुरुत।**

(१) अगस्त्यः (२) वाल्मीकिः

(३) अनुष्टुभ् (४) वेदान्तम्

**आ) कालवचनपरिवर्तनं कुरुत।**

(१) मुनयः वनप्रदेशे निवसन्ति। (एकवचने परिवर्तयत।)

(२) रचय रामचरितम्। (लिङ्लकारे परिवर्तयत।)

**इ) विशेषण–विशेष्य–मेलनं कुरुत।**

| विशेष्यम् | विशेषणम् |
|---|---|
| १) सहचरः | १) पोषितौ |
| २) विलापः | २) अश्रुतपूर्वा |
| ३) कुशलवौ | ३) करुणः |
| ४) वाणी | ४) निश्चेष्टः |

## भाषासूत्रम् – ४



### (अ) लृट्लकार: (द्वितीय: भविष्यत्काल:)।

| ह्य: –भूतकाल: | अद्य – वर्तमानकाल: | श्व: – भविष्यत्काल: |
|---|---|---|
| अहम् अपठम्। | अहं पठामि। | अहं **पठिष्यामि**। |
| बालका: अखेलन्। | बालका: खेलन्ति। | बालका: **खेलिष्यन्ति**। |
| माता अयच्छत्। | माता यच्छति। | माता **दास्यति**। |
| त्वम् अनम:। | त्वं नमसि। | त्वं **नंस्यसि**। |
| राम: अमुञ्चत्। | राम: मुञ्चति। | राम: **मोक्ष्यति**। |

**मेलनं कुरुत।**

| रूपाणि | पठिष्यामि | खेलिष्यन्ति | दास्यति | नंस्यति | मोक्ष्यति | गमिष्यति | वक्ष्यति | प्रक्ष्यामि | प्राप्स्यति |
|---|---|---|---|---|---|---|---|---|---|
| धातव: | प्र+आप् | मुच् | गम् | वच् | दा | प्रच्छ् | नम् | खेल् | पठ् |

### लृट्प्रत्यया:। (भविष्यत्कालप्रत्यया:)

| परस्मैपदम् | | | | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| स्यति | स्यत: | स्यन्ति | उत्तम: | स्यते | स्येते | स्यन्ते |
| स्यसि | स्यथ: | स्यथ | मध्यम: | स्यसे | स्येथे | स्यध्वे |
| स्यामि | स्याव: | स्याम: | प्रथम: | स्ये | स्यावहे | स्यामहे |

| गम् (१ प.प.) | | | | लभ् (१ आ.प.) | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| गमिष्यति | गमिष्यत: | गमिष्यन्ति | उत्तम: | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| गमिष्यसि | गमिष्यथ: | गमिष्यथ | मध्यम: | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| गमिष्यामि | गमिष्याव: | गमिष्याम: | प्रथम: | लप्स्ये | लप्स्यावहे | लप्स्यामहे |

| नृत् (४ प. प.) | | | | मन् (४ आ. प.) | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| नर्तिष्यति | नर्तिष्यत: | नर्तिष्यन्ति | उत्तम: | मंस्यते | मंस्येते | मंस्यन्ते |
| नर्तिष्यसि | नर्तिष्यथ: | नर्तिष्यथ | मध्यम: | मंस्यसे | मंस्येथे | मंस्यध्वे |
| नर्तिष्यामि | नर्तिष्याव: | नर्तिष्याम: | प्रथम: | मंस्ये | मंस्यावहे | मंस्यामहे |

| प्रच्छ् (६ प. प.) | | | | मुच् (६ आ. प.) | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| प्रक्ष्यति | प्रक्ष्यत: | प्रक्ष्यन्ति | उत्तम: | मोक्ष्यते | मोक्ष्येते | मोक्ष्यन्ते |
| प्रक्ष्यसि | प्रक्ष्यथ: | प्रक्ष्यथ | मध्यम: | मोक्ष्यसे | मोक्ष्येथे | मोक्ष्यध्वे |
| प्रक्ष्यामि | प्रक्ष्याव: | प्रक्ष्याम: | प्रथम: | मोक्ष्ये | मोक्ष्यावहे | मोक्ष्यामहे |


**चिन्त् (१० प. प.)**      **गण् (१० आ. प.)**

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| चिन्तयिष्यति | चिन्तयिष्यत: | चिन्तयिष्यन्ति | उत्तम: | गणयिष्यति | गणयिष्यत: | गणयिष्यन्ति |
| चिन्तयिष्यसि | चिन्तयिष्यथ: | चिन्तयिष्यथ | मध्यम: | गणयिष्यसि | गणयिष्यथ: | गणयिष्यथ |
| चिन्तयिष्यामि | चिन्तयिष्याव: | चिन्तयिष्याम: | प्रथम: | गणयिष्यामि | गणयिष्याव: | गणयिष्याम: |

**वाक्यानि पठत।**

१. वयं सायंकाले उद्यानं **गमिष्याम:**।
२. मम पुस्तकं मह्यं कदा **दास्यसि** ?
३. बालका: ज्येष्ठान् **नंस्यन्ति**।
४. छात्रा: उत्तमान् अङ्कान् **प्राप्स्यन्ति**।
५. 'सिंह, जृम्भस्व ! दन्तान् ते **गणयिष्यामि**।
६. परश्व: मम मातामही मम गृहम् **आगमिष्यति**।
७. प्रपरश्व: मातुल: द्विचक्रिकां **प्रदास्यति**।
८. आगामिनि वर्षे अस्माकं शालायां सुवर्णमहोत्सव: **सम्पत्स्यते**।
९. अग्रिमे मासे परीक्षा **भविष्यति**।
१०. आगामिनि वर्षे अहं चन्द्रयाने **उपवेक्ष्यामि**।
११. अग्रिमं युगं तन्त्रज्ञानेन एव पूर्णं **भविष्यति**।

**जिज्ञासापत्रम्**



● अस्माकं मित्रम् अग्रिमे मासे कन्याकुमारीं गमिष्यति। स: तत्र किं किं करिष्यति इति चिन्तयित्वा वाक्यानि पूरयत।

१. अद्वैत: अग्रिमे शनिवासरे यात्रारम्भं ____________। (कृ)
२. विमानयानेन स तत्र अन्येद्यु: ____________। (प्र + आप्)
३. प्रथमं कन्याकुमारीस्थितं देवालयं स: ____________। (दृश्-पश्य्)
४. तस्मात् समुद्रतीरं ____________। (या)
५. तत्रस्थं सूर्यास्तम् ____________। (अव + लोक्)

**पठत अवगच्छत !**      **व्यञ्जनानां विस्तार:।**

९) तान् + चोरान् = तांश्चोरान् ।
विघ्नान् + च = विघ्नांश्च।

न्+ च्/छ्/ट्/ठ्/त्/थ् → ं (अनुस्वार:), : (विसर्ग:)

बहून् + तस्करान् = बहूंस्तस्करान्।
एतान् + छात्रान् = एतांश्छात्रान्।

१०) परि + छेद: - परिच्छेद:।
तरु + छाया = तरुच्छाया।

ह्रस्व: स्वर: + छ = च्छ

मातृ + छाया = मातृच्छाया।
वि + छेद: = विच्छेद:।


# क्रियापदरूपाणि ।

| धातु:(गण:, पदम्) | लट् | लङ् | लोट् | विधिलिङ् | लृट् | कर्मणि |
|---|---|---|---|---|---|---|
| पठ् (१ प.प.) | पठति | अपठत् | पठतु | पठेत् | पठिष्यति | पठ्यते |
| दा (१ प.प.) | यच्छति | अयच्छत् | यच्छतु | यच्छेत् | दास्यति | दीयते |
| पा (१ प.प.) | पिबति | अपिबत् | पिबतु | पिबेत् | पास्यति | पीयते |
| गै (१ प.प.) | गायति | अगायत् | गायतु | गायेत् | गास्यति | गीयते |
| ध्यै (१ प.प.) | ध्यायति | अध्यायत् | ध्यायतु | ध्यायेत् | ध्यास्यति | ध्यायते |
| नी (१ उ.प.) प.प. | नयति | अनयत् | नयतु | नयेत् | नेष्यति | नीयते |
| नी (१ उ.प.) आ.प. | नयते | अनयत | नयताम् | नयेत | नेष्यते | नीयते |
| स्मृ (१ प.प.) | स्मरति | अस्मरत् | स्मरतु | स्मरेत् | स्मरिष्यति | स्मर्यते |
| हृ (१ उ.प.) प.प. | हरति | अहरत् | हरतु | हरेत् | हरिष्यति | ह्रियते |
| हृ (१ उ.प.) आ. प. | हरते | अहरत | हरताम् | हरेत | हरिष्यते | ह्रियते |
| रभ् (१ आ.प.) | रभते | अरभत | रभताम् | रभेत | रप्स्यते | रभ्यते |
| नृत् (४ प.प.) | नृत्यति | अनृत्यत् | नृत्यतु | नृत्येत् | नर्तिष्यति | नृत्यते |
| क्रुध् (४ प.प.) | क्रुध्यति | अक्रुध्यत् | क्रुध्यतु | क्रुध्येत् | क्रोत्स्यति | क्रुध्यते |
| मन् (४ आ.प.) | मन्यते | अमन्यत | मन्यताम् | मन्येत | मंस्यते | मन्यते |
| लिख् (६ प.प.) | लिखति | अलिखत् | लिखतु | लिखेत् | लेखिष्यति | लिख्यते |
| प्रच्छ् (६ प.प.) | पृच्छति | अपृच्छत् | पृच्छतु | पृच्छेत् | प्रक्ष्यति | पृच्छ्यते |
| दिश् (६ उ.प.) प.प. | दिशति | अदिशत् | दिशतु | दिशेत् | देक्ष्यति | दिश्यते |
| दिश् (६ उ.प.) आ.प. | दिशते | अदिशत | दिशताम् | दिशेत | देक्ष्यते | दिश्यते |
| मुच् (६ उ.प.) प.प. | मुञ्चति | अमुञ्चत् | मुञ्चतु | मुञ्चेत् | मोक्ष्यति | मुच्यते |
| मुच् (६ उ.प.)आ.प. | मुञ्चते | अमुञ्चत | मुञ्चताम् | मुञ्चेत | मोक्ष्यते | मुच्यते |
| पूज् (१० उ.प.)प.प. | पूजयति | अपूजयत् | पूजयतु | पूजयेत् | पूजयिष्यति | पूज्यते |
| पूज् (१०उ.प.)आ.प. | पूजयते | अपूजयत | पूजयताम् | पूजयेत | पूजयिष्यते | पूज्यते |
| स्पृह्(१० उ.प.)प.प. | स्पृहयति | अस्पृहयत् | स्पृहयतु | स्पृहयेत् | स्पृहयिष्यति | स्पृह्यते |
| स्पृह्(१०उ.प.)आ.प. | स्पृहयते | अस्पृहयत | स्पृहयताम् | स्पृहयेत | स्पृहयिष्यते | स्पृह्यते |
| चुर् (१० उ.प.) प.प. | चोरयति | अचोरयत् | चोरयतु | चोरयेत् | चोरयिष्यति | चोर्यते |
| चुर् (१०उ.प.)आ.प. | चोरयते | अचोरयत | चोरयताम् | चोरयेत | चोरयिष्यते | चोर्यते |
| | | | | | | |
| अस् (२ प.प.) | अस्ति | आसीत् | अस्तु | स्यात् | भविष्यति | भूयते |
| शक् (५ प.प.) | शक्नोति | अशक्नोत् | शक्नोतु | शक्नुयात् | शक्ष्यति | शक्यते |
| श्रु (५ प.प.) | शृणोति | अशृणोत् | शृणोतु | शृणुयात् | श्रोष्यति | श्रूयते |
| कृ (८ उ.प.) प.प. | करोति | अकरोत् | करोतु | कुर्यात् | करिष्यति | क्रियते |
| कृ (८ उ.प.) आ.प. | कुरुते | अकुर्वत | कुरुताम् | कुर्वीत | करिष्यते | क्रियते |
| ज्ञा (९ उ.प.) प.प. | जानाति | अजानात् | जानातु | जानीयात् | ज्ञास्यति | ज्ञायते |
| ज्ञा (९ उ.प.) आ.प. | जानीते | अजानीत | जानीताम् | जानीत | ज्ञास्यते | ज्ञायते |

## इ) भूतकालवाचक–धातुसाधित–विशेषणानि।

अयं 'कृ' धातोः जलाशयः।
अत्र कति मत्स्याः परिचिताः युष्माकम्?







क्त–भाण्डम्

रामेण पाठः पठितः।
रामेण कविता पठिता।
रामेण काव्यं पठितम्।
रामेण पाठाः पठिताः।
सीतया कविते पठिते।
अस्माभिः काव्यानि पठितानि।

यथा कर्मपदं परिवर्तते,
तथा क्रियासूचकं विशेषणम् अपि परिवर्तते।

एतद् क्रियापदात् भिन्नम्।

क्तवतु भाण्डम्

रामः पाठं पठितवान्।
सीता पाठं पठितवती।
छात्राः पाठं पठितवन्तः।
महिलाः पाठं पठितवत्यः।
अहं पाठं पठितवान्।
त्वं पाठं पठितवती।

यथा कर्तृपदं परिवर्तते,
तथा क्रियासूचकं विशेषणम् अपि परिवर्तते।

'पठित' इति 'क्त' प्रत्ययान्तरूपम् (कर्मवाच्यं भूत. धातु. विशेषणम् = मूलधातुः + त) तथा च 'पठितवत्' इति 'क्तवतु' प्रत्ययान्तरूपम् (कर्तृवाच्यं भूत. धातु. विशेषणम् = मूलधातुः + तवत्)।

| धातुः | क्त रूपम् | क्तवतु रूपम् | धातुः | क्त रूपम् | क्तवतु रूपम् | धातुः | क्त रूपम् | क्तवतु रूपम् |
|---|---|---|---|---|---|---|---|---|
| क्षिप् | क्षिप्त | क्षिप्तवत् | पा | पीत | पीतवत् | पूज् | पूजित | पूजितवत् |
| आप् | आप्त | आप्तवत् | पा | पात | पातवत् | भक्ष् | भक्षित | भक्षितवत् |
| जि | जित | जितवत् | धा | हित | हितवत् | भूष् | भूषित | भूषितवत् |
| नी | नीत | नीतवत् | गै | गीत | गीतवत् | अर्थ् | अर्थित | अर्थितवत् |
| श्रु | श्रुत | श्रुतवत् | ध्यै | ध्यात | ध्यातवत् | क्षल् | क्षालित | क्षालितवत् |
| कृ | कृत | कृतवत् | कथ् | कथित | कथितवत् | तड् | ताडित | ताडितवत् |
| स्मृ | स्मृत | स्मृतवत् | दण्ड् | दण्डित | दण्डितवत् | घुष् | घोषित | घोषितवत् |
| हृ | हृत | हृतवत् | गण् | गणित | गणितवत् | चुर् | चोरित | चोरितवत् |

| धातुः | क्त रूपम् | क्तवतु रूपम् | धातुः | क्त रूपम् | क्तवतु रूपम् | धातुः | क्त रूपम् | क्तवतु रूपम् |
|---|---|---|---|---|---|---|---|---|
| दृश् | दृष्ट | दृष्टवत् | पठ् | पठित | पठितवत् | मन् | मत | मतवत् |
| दिश् | दिष्ट | दिष्टवत् | लिख् | लिखित | लिखितवत् | तन् | तत | ततवत् |
| स्पृश् | स्पृष्ट | स्पृष्टवत् | वन्द् | वन्दित | वन्दितवत् | हन् | हत | हतवत् |
| सृज् | सृष्ट | सृष्टवत् | मुच् | मुक्त | मुक्तवत् | रम् | रत | रतवत् |
| दंश् | दष्ट | दष्टवत् | त्यज् | त्यक्त | त्यक्तवत् | गम् | गत | गतवत् |
| इष् | इष्ट | इष्टवत् | भुज् | भुक्त | भुक्तवत् | वच् | उक्त | उक्तवत् |
| प्रच्छ् | पृष्ट | पृष्टवत् | बुध् | बुद्ध | बुद्धवत् | वद् | उदित | उदितवत् |
| नश् | नष्ट | नष्टवत् | रभ् | रब्ध | रब्धवत् | वह् | ऊढ | ऊढवत् |
| ग्रन्थ् | ग्रथित | ग्रथितवत् | लभ् | लब्ध | लब्धवत् | ग्रह् | गृहीत | गृहीतवत् |
| मन्थ् | मथित | मथितवत् | लुभ् | लुब्ध | लुब्धवत् | यज् | इष्ट | इष्टवत् |

**रूपाणि अवलोकयत।**

| कर्मवाच्यं भूत. धातु. विशेषणम् | | | | कर्तृवाच्यं भूत. धातु. विशेषणम् | | | |
|---|---|---|---|---|---|---|---|
| पठितः | पठितौ | पठिताः | (पुं.) | पठितवान् | पठितवन्तौ | पठितवन्तः | (पुं.) |
| पठिता | पठिते | पठिताः | (स्त्री.) | पठितवती | पठितवत्यौ | पठितवत्यः | (स्त्री) |
| पठितम् | पठिते | पठितानि | (नपुं.) | पठितवत् | पठितवती | पठितवन्ति | (नपुं.) |
| एतानि रूपाणि देव, माला, वन इव। | | | | एतानि रूपाणि भवत्, नदी, जगत् इव। | | | |

**अधोदत्तानि वाक्यानि पठत, भेदम् अवगच्छत।**

| केन/कया कृतम्। | कः कृतवान् / का कृतवती ? |
|---|---|
| १. अर्चकेण देवः पूजितः। | १. अर्चकः देवं पूजितवान्। |
| २. अर्चकेण देवी पूजिता। | २. अर्चकः देवीं पूजितवान्। |
| ३. अर्चकेण दैवतं पूजितम्। | ३. अर्चकः दैवतं पूजितवान्। |
| ४. पितामह्या कथा कथिता। | ४. पितामही कथां कथितवती। |
| ५. चालकेन रूप्यकाणि गणितानि। | ५. चालकः रूप्यकाणि गणितवान्। |
| ६. कृषीवलेन सस्यानि उप्तानि। | ६. कृषीवलः सस्यानि उप्तवान्। |

**जिज्ञासापत्रम्**



**१. 'क्त' प्रत्ययान्तरूपैः रिक्तस्थानानि पूरयत।**

१. जनैः पूजा ________। (कृ)
२.शिक्षकेण पाठः उच्चैः ________। (पठ्)
३. शिष्येण दक्षिणा ________। (दा)
४. अनया कथा ________। (रच्)
५. बिडालेन क्षीरं ________। (पा)
६. मया चित्रं ________। (दृश्)

**२. 'क्तवतु' प्रत्ययान्तरूपैः रिक्तस्थानानि पूरयत।**

१. पुरुषः कार्यं ________। (कृ)
२.महिला शाटिकां ________। (धृ)
३. देवाः भक्तान् ________। (रक्ष्)
४. अहं चित्राणि ________। (दृश्)
५. कविः कवितां ________। (लिख्)

## ।। अमरकोषः ।।

| कण्ठस्थीकरणार्थम् । | विग्रहः । |
|---|---|
| राजा – राजा राट् पार्थिवः क्ष्माभृन्नृपभूपमहीक्षितः । | राजा, राट्, पार्थिवः, क्ष्माभृत्, नृपः, भूपः, महीक्षित् । |
| गुरुः – उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः । | उपाध्यायः, अध्यापकः, निषेकादिकृत्, गुरुः । |
| नासिका – क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका । | घ्राणम्, गन्धवहा, घोणा, नासा, नासिका। |
| नेत्रम् – लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी । | लोचनम्, नयनम्, नेत्रम्, ईक्षणम्, चक्षुः, अक्षिः । |
| कर्णः – कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः । | कर्णः, शब्दग्रहः, श्रोत्रम्, श्रुतिः, श्रवणम्, श्रवः । |
| षट्पदः–द्विरेफपुष्पलिड्भृङ्गषटपदभ्रमरालयः । | द्विरेफः, पुष्पलिट्, भृङ्गः, षट्पदः, भ्रमरः, अलिः । |
| मानवाः – मनुष्या मानुषा मर्त्या मनुजा मानवा नराः । | मनुष्याः, मानुषाः, मर्त्याः, मनुजाः, मानवाः, नराः । |
| दैवम् – दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः । | दैवम्, दिष्टम्, भागधेयम्, भाग्यम्, नियतिः, विधिः । |
| निपुणः – प्रवीणो निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः । | प्रवीणः, निपुणः, अभिज्ञः, विज्ञः, निष्णातः, शिक्षितः । |
| यज्ञः – यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः । | यज्ञः, सवः, अध्वरः, यागः, सप्ततन्तुः, मखः, क्रतुः । |
| कुबेरः – कुबेरस्त्र्यम्बकसखो राजराजो धनाधिपः । | कुबेरः, त्र्यम्बकसखः, राजराजः, धनाधिपः । |
| याचकः – वनीयको याचनको मार्गणो याचकार्थिनौ । | वनीयकः, याचनकः, मार्गणः, याचकः, अर्थी । |
| मार्गः – अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः । | अयनम्, वर्त्म, मार्गः, अध्वा, पन्थाः, पदवी सृतिः । |
| सैनिकः – भटा योधाश्च योद्धारः सेनारक्षास्तु सैनिकाः । | भटाः, योधाः, योद्धारः, सेनारक्षाः, सैनिकाः । |
| निद्रा – स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि । | निद्रा, शयनम्, स्वापः, स्वप्नः, संवेशः । |
| बुद्धिः – बुद्धिर्मनीषा धीषणाधीः प्रज्ञा शेमुषी मतिः । | बुद्धिः, मनीषा, धीषणा, धीः, प्रज्ञा, शेमुषी, मतिः । |
| हर्षः – मुद् प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः । | मुद्, प्रीतिः, प्रमदः, हर्षः, प्रमोदः, आमोदः, सम्मदः । |
| वचः – व्याहार उक्तिर्लपितं भाषितं वचनं वचः । | व्याहारः, उक्तिः, लपितम्, भाषितम्, वचनम्, वचः । |
| शत्रुः – रिपौ वैरिसप्नारिद्विषद्द्वेषणदुर्हृदः । | रिपुः, वैरी, सपत्नः, अरिः, द्विषद्, द्वेषणः, दुर्हृद् । |
| कुक्कुरः – कौलेयकः सारमेयः कुक्कुरो मृगदंशकः । | कौलेयकः, सारमेयः, कुक्कुरः, मृगदंशकः । |
| कृपणः – कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः । | कदर्यः, कृपणः, क्षुद्रः, किंपचानः, मितंपचः । |
| शोभनम् – सुन्दरं रूचिरं चारु सुषमं साधु शोभनम् । | सुन्दरम्, रूचिरम्, चारु, सुषमम्, साधु, शोभनम् । |
| मलिनम् – मलीमसं तु मलिनं कच्चरं मलदूषितम् । | मलीमसम्, मलिनम्, कच्चरम्, मलदूषितम् । |
| प्रभूतम् – प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु । | प्रभूतम्, प्रचुरम्, प्राज्यम्, अदभ्रम्, बहुलम्, बहु । |
| पूर्णम् – समग्रं सकलं पूर्णमखण्डं स्यादनूनके । | समग्रम्, सकलम्, पूर्णम्, अखण्डम्, अनूनकम् । |
| पुत्रः – आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी । | आत्मजः, तनयः, सूनुः, सुतः, पुत्रः । |
| यमः – कृतान्तो यमुनाभ्राता शमनो यमराड् यमः । | कृतान्तः, यमुनाभ्राता, शमनः, यमराट्, यमः । |
| दिनः – घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ । | घस्रः, दिनम्, अहः, दिवसः, वासरः । |
| राक्षसः–राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः। | राक्षसः, कौणपः, क्रव्यात्, क्रव्यादः, अस्रपः, आशरः। |
| शङ्करः – शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः । | शम्भुः, ईशः, पशुपतिः, शिवः, शूली, महेश्वरः । |
| मेघः – अभ्रं मेघो वारिवाहस्तडित्वान् वारिदोऽम्बुभृत्। | अभ्रम्, मेघः, वारिवाहः, तडित्वान्, वारिदः, अम्बुभृत्। |
| मीनः – पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः । | पृथुरोमा, झषः, मत्स्यः, मीनः, वैसारिणः, अण्डजः । |
| नभः – नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् । | नभः, अन्तरिक्षम्, गगनम्, अनन्तम्, सुरवर्त्म, खम् । |
| महिला – स्त्री योषिदङ्गना योषा नारी सीमन्तिनी वधूः । | स्त्री, योषित्, अङ्गना, योषा, नारी, सीमन्तिनी, वधूः । |
| जगत् – त्रिष्वथो जगती लोको विष्टपं भुवनं जगत् । | जगती, लोकः, विष्टपम्, भुवनम्, जगत् । |
| वर्ष – संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः । | संवत्सरः, वत्सरः, अब्दः, हायनः, शरद्, समः । |
| शुभम् – श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् । | श्वःश्रेयसम्, शिवम्, भद्रम्, कल्याणम्, मङ्गलम्, शुभम्। |

## शब्दकोषः। (पाठानुसारम्)

**१. सुष्ठु गृहीतः चौरः।**

१) धनस्यूतः (पुं.) –
२) मायायष्टिका (स्त्री) –
३) अङ्गुलिमात्रम् (नपुं) –

**२. अव्ययमाला।**

१) अल्पाक्षरत्वम् (नपुं.) –
२) आस्यम् (नपुं.) –
३) घ्राणम् (नपुं.) –
४) सृष्टम् (विशे.नपुं.) –
५) षट्पदः (पुं.) –
६) केतकीगन्धः (पुं.) –
७) आघ्रातुम् (अव्यय) –
८) परसन्तापः (पुं.) –
९) वर्त्मन् (नपुं.) –
१०) द्वितीया (स्त्री) –
११) स्थानभ्रष्टः (पुं.) –
१२) अनुद्यमः (पुं.) –
१३) आहृत्य (अ.) –

**३. धन्यौ तौ दातृयाचकौ।**

१) प्रकृत्या (स्त्री) –
२) पटुः (पुं.) –
३) भृशम् (अ.) –
४) स्वस्ति (अ.) –
५) सकाशात् (अ.)–
६) परावर्तितुम् (अ.) –
७) आक्रान्तुम् (अ.) –
८) प्रभूता (स्त्री) –

**४. विध्यर्थमाला।**

१) चेत् (अव्यय) –
२) कुतः (अव्यय) –
३) अनृतम् (अव्यय) –
४) काङ्क्षेत (क्रि.) –
५) सम्यक् (अ.) –
६) प्रत्यहम् (अ.) –
७) वृकः (पुं.) –
८) अवलुम्पेत (क्रि.) –

**५. किं मिथ्या? किं वास्तवम्?**

१) मन्थनम् (नपुं.) –
२) सुखासन्दः (पुं.)–
३) चलभाषः (पुं.) –
४) द्वारघण्टिका (स्त्री) –
५) यष्टिकन्दुकक्रीडा (पुं.) –
६) लालायितम् (विशे.) –
७) बुभुक्षा (स्त्री) –
८) आभासात्मकम् (नपुं.) –

**६. वीरवनिता विश्पला।**

१) भुवम् (स्त्री) –
२) युगपद् (अ.) –
३) प्रत्युत (अ.) –
४) इतःपरम् (अ.) –
५) आयुधप्रहारः (पुं.) –
६) कदलीवृक्षः (पुं.) –
७) संहृतः (विशे.) –

**७. योगमाला।**

१) उत्तानम् (नपुं.) –
२) जानु (नपुं.) –
३) व्योमस्थम् (पुं.)–
४) पाणिः (पुं.) –
५) प्रजल्पः (पुं.) –
६) अन्तरायः (पुं.) –

**८. पिन्कोड्–प्रवर्तकः महान् संस्कृतज्ञः।**

१) आङ्ग्लभाषा (स्त्री) –
२) दुर्बोधम् (नपुं.) –
३) प्रत्यूहाः (पुं.) –
४) विद्वद्वरेण्यः (पुं.) –

**९. सूक्तिसुधा।**

१) भ्रातृभाज्यम् (नपुं.) –
२) गणना (स्त्री) –
३) दुहन्ति (धातुरूप) –
४) जाड्यम् (विशे.) –
५) हन्त – (अ.) –
६) विग्रहे – (पुं.) –
७) परः (पुं.) –
८) व्यसनिन् (पुं.) –

**१०. पितृभक्तः नचिकेताः।**

१) लालितः (पुं.) –
२) क्रोधावेशः (पुं.) –
३) निवारयितुम् (अ.) –

**११. मनसः स्वच्छता।**

१) हठम् (नपुं.) –
२) उत (अ.)–
३) लघुभारम् (नपुं.) –
४) आर्द्रः (पुं.) –
५) शाटिकाञ्चलम् (नपुं.) –
६) कियन्तः (अ.) –
७) रजकः (पुं.) –
८) चन्दनफेनकम् (नपुं.) –
९) व्यापृतम् (अ.) –

**१२. अमरकोषः।**

१) अध्येतृ (पुं.) –
२) यथेष्टम् (अ.) –
३) आचन्द्रतारकम् (नपुं.) –
४) अनुशासनम् (नपुं.) –
५) विनायासम् (अ.) –

**१३. सरमायाः शीलम्।**

१) उपहारः (पुं.) –
२) किङ्करः (पुं.) –
३) मघवान् (पुं.) –
४) तटरुहतरुः (पुं.) –
५) जलौघः (पुं.) –
६) पृथुलरभसा (स्त्री) –
७) विनयवचसा (स्त्री) –
८) म्लानमुखी (स्त्री) –
९) परतीरम् (नपुं.) –
१०) वलः (पुं.) –
११) जारु (नपुं.) –

**१४. काव्यशास्त्रविनोदः।**

१) मस्तिष्कखाद्यम् (नपुं.) –
२) सरसम् (नपुं.) –
३) पक्षिराजः (पुं.) –
४) शूलपाणिः (पुं.) –
५) बिभ्रत् (विशे.) –
६) लुब्धकः (पुं.) –
७) धीवरः (पुं.) –
८) पिशुनः (पुं.) –
९) चञ्चलतरः (पुं.) –
१०) वक्त्रम् (नपुं.) –
११) चाटून् (अ.) –
१२) मृषा (अ.) –
१३) प्रत्याशा (स्त्री.)
१४) बालतृणम् (नपुं.) –
१५) मुहुः (अ.) –
१६) कुरङ्गः (पुं.) –

| | | |
|---|---|---|
| **१५. मनोराज्यस्य फलम्।**<br>१) अधीते (क्रि.) –<br>२) शक्रः (पुं.) –<br>३) सक्तुः (पुं.) –<br>४) नागदन्तः (पुं.) –<br>५) वडवा (स्त्री.) –<br>६) यूथम् (पुं.) –<br>७) महिषी (स्त्री.) –<br>८) विक्रयणम् (नपुं.) – | ९) चतुःशालम् (नपुं.) –<br>१०) प्राप्तवयस्का (स्त्री.) –<br>११) जानुचलनयोग्यः (पुं.) –<br>१२) श्रोष्यति (क्रि.) –<br>१३) पाण्डुरता (स्त्री.) –<br>१४) शेते (क्रि.) –<br>**१६. स्वागतं तपोधनायाः।**<br>१) नेपथ्यम् (नपुं.) –<br>२) अध्वगवेषा (स्त्री.) – | ३) अधिगन्तुम् (अ.) –<br>४) अतिप्रदीप्तप्रज्ञामेधे (स्त्री) –<br>५) अस्मादृशः (पुं.) –<br>६) जडः (पुं.) –<br>७) मृदा (स्त्री.) –<br>८) आम्नायः (पुं.) –<br>९) सवनम् (नपुं.) –<br>१०) निषादः (पुं.) – |

## घटकपरीक्षा १ प्रारूपम् — अङ्काः २०

(पाठ १, २, ३, भाषासूत्रम् १)

**प्र. १. अ) १) चित्रं दृष्ट्वा नामानि लिखत (३ तः २)** — १

**२) सङ्ख्याः अक्षरैः/अङ्कैः लिखत (३ तः २)** — १

**प्र. १. आ) गद्यांशं पठित्वा कृतीः कुरुत। (२ गद्यांशौ) ।** — ८

१) एकवाक्येन उत्तरत। (१)

२) सत्यम् असत्यं वा/उचितं कारणं/ कः कं वदति ? (१)

३) गद्यांशात् समानार्थकं/विरुद्धार्थकं शब्दं चिनुत। (१)

४) द्वे त्वान्त/ल्यबन्त/तुमन्त-अव्ययपदे/विभक्त्यन्तपदे चिनुत। (१)

**प्र. २ अ)पद्यांशं पठित्वा कृतीः कुरुत।** — ३

१. पद्यांशः-१ कस्यापि एकस्य श्लोकस्य अनुवादं माध्यमभाषया लिखत।(२ तः १) (२)

२. पद्यांशः-२ एकवाक्येन उत्तरत। (१) अथवा २ समानार्थकौ/विरुद्धार्थकौ शब्दौ चिनुत।(१)

**आ) श्लोकं पूर्णं शुद्धं च लिखत। (२ तः १)** — २

**प्र. ३. व्याकरणम्।** — ५

**अ) तालिकां पूरयत। (३ तः २)** (नाम-सर्वनाम-क्रियापदतालिका) (२)

**आ) अव्ययानां/धातूनाम् उपयोगं कृत्वा वाक्यानि लिखत। (३ तः २)** (२)

**इ) वाक्यं शुद्धं कुरुत। (२ तः १)** (१)

* * *

**नवमी कक्षा-मूल्यमापनम्।**

**प्रथमं/द्वितीयं सत्रम् - (१०० अङ्काः)** **लेखनपरीक्षा (८० अङ्काः)**

**मौखिकी परीक्षा (१० अङ्काः)**

- श्रवणम् - २ अङ्कौ। (श्रुतलेखनम् ४ शब्दाः)
- वाचनम् - २ अङ्कौ। (पठितगद्यांशः/पूरकसाहित्यम् यथा- पठत बोधत...) (वर्णोच्चाराः, स्/ष्, न्/ण् भेदाः द्रष्टव्याः)
- भाषणम् - २ अङ्कौ। आशुभाषणम्/ चित्रं दर्शयित्वा वर्णनम्/सम्भाषणम्।
- कण्ठस्थीकरणम् - ४ अङ्काः। प्रार्थना, श्लोकपठनम्, तालिकापठनम् (नाम, सर्वनाम, क्रियापदम्), सर्वलकारेषु पञ्चदशवाक्यानि।

**अन्य-अङ्काः (१० अङ्काः)** = घटकपरीक्षा + लेखनपुस्तिका।

नवमी कक्षा | कृतिपत्रिका-प्रारूपम् | अङ्काः (८० )
सम्पूर्ण-संस्कृतम् | समयः - ३ होराः

## प्रथमः विभागः - सुगमसंस्कृतम्। (५)

१) अ) चित्रं दृष्ट्वा नामानि लिखत। (५ तः ४) (चित्रपदकोषतः ५ चित्राणि) २

१) ☐ २) ☐ ३) ☐ ४) ☐ ५) ☐

आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत। (३ तः २)(प्रथमसत्रम्-१ तः ५०, द्वितीयसत्रम्-५१ तः १००) १

इ) अक्षरैः समयलेखनं कुरुत। (५ तः ४) २

## द्वितीयः विभागः - गद्यम्। (२१)

२) अ) गद्यांशः १ - गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। (प्रथमसत्रम् - १, ३, ५, ६) ७

आ) गद्यांशः २ - गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। (द्वितीयसत्रम् १०, ११, १२, १५) ७

(५०-८० शब्दमितौ गद्यांशौ अपेक्षितौ।)

कृतयः - क) एकवाक्येन उत्तरत। (३ तः २) (त्रिषु एकः प्रश्नः पाठस्य नामविषये प्रष्टुं शक्यते।) (२)

ख) सत्यम् असत्यं वा/ कः कं वदति/उचितं कारणं चित्वा वाक्यं पुनर्लिखत। (१)

ग) सन्धिं/सन्धिविग्रहं कुरुत। (पूर्वपदं/उत्तरपदं/चतुर्थपदं/विग्रहं लिखत।) (१)

घ) सूचनानुसारं कृतीः कुरुत। (४ तः ३) (३)

(१ ) शब्दस्य वर्णविग्रहं कुरुत। (केवलम् १) (२) प्रश्ननिर्माणं कुरुत। (केवलम् १)
(३) लकारं लिखत।(केवलम् १) (४) त्वान्त/ल्यबन्त/तुमन्त/विभक्त्यन्तरूपाणि। (केवलम् १)
(५) विशेषण-विशेष्य-सम्बन्धः। (स्तम्भमेलनं कुरुत/गद्यांशतः चिनुत/चतुर्थपदं लिखत।)
(६) समानार्थकं/विरुद्धार्थकशब्दं चिनुत। (केवलम् १)

इ) गद्यांशः ३ - माध्यमभाषया अनुवादं कुरुत। (५/६ वाक्यानि) (प्रथमसत्रम्-८ द्वितीयसत्रम् - १६) ५

ई) माध्यमभाषया उत्तरं लिखत। (२ तः १) (प्रथमसत्रम् - १, ३, ५, ६) (द्वितीयसत्रम् - १०, ११, १२, १५) २

(प्रस्तावना अपेक्षिता।)

## तृतीयः विभागः - पद्यम्। (१६)

३) अ) पद्यांशं पठित्वा कृतीः कुरुत। (प्रथमसत्रम्-२, ४ द्वितीयसत्रम्-९, १४) (२/३ श्लोकाः प्रष्टव्याः।) ४

क) एकवाक्येन उत्तरत। (३ तः २) (२)

ख) सूचनानुसारं कृती कुरुत। (३ तः २) (२)

(१ ) विशेषण-विशेष्य-सम्बन्धः। (२) त्वान्त/ल्यबन्त/तुमन्त/विभक्त्यन्तं पदं चिनुत।
(३) लकारं लिखत। (४) समानार्थकं/विरुद्धार्थकं शब्दं चिनुत। (५) प्रश्ननिर्माणं कुरुत। (अधोरेखनम् आवश्यकम्)

आ) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत। (प्रथमसत्रम्-२, ४, ७ द्वितीयसत्रम्-९, १४) २

इ) पद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत। (२ तः १)(प्रथमसत्रम्-२, ४ द्वितीयसत्रम्-९, १४) २

ई) रिक्तस्थानानि पूरयित्वा अन्वयं पुनर्लिखत। (श्लोकः न दातव्यः।) (प्रथमसत्रम्-४ द्वितीयसत्रम्-९) २

उ) श्लोकौ शुद्धौ पूर्णौ च लिखत। (३ तः २) (प्रथमसत्रम्-२, ४ द्वितीयसत्रम्-९, १४) ४

ऊ) माध्यमभाषया उत्तरं लिखत। (२ तः १) (प्रथमसत्रम्-७ द्वितीयसत्रम्-१३)(प्रस्तावना अपेक्षिता।) २

## चतुर्थः विभागः – लेखनकौशलम्। (१६)

**४) अ) निबन्धं/संवादं पूरयत।** ५

(केवलं ५ रिक्तस्थानानि प्रष्टव्यानि। वाक्यस्य पुनर्लेखनं करणीयम्। शब्दमञ्जूषा आवश्यकी।)

**आ) अव्ययानां / धातूनाम् उपयोगं कृत्वा वाक्यानि लिखत। (५ तः ३)** (उपपदविभक्तिः।) ३

**इ) सङ्ख्याविशेषणानाम् उपयोगं कृत्वा वाक्यद्वयं लिखत। (३ तः २)** (केवलं १ तः १० सङ्ख्याः।) २

(१ तः ४ सङ्ख्याः अनुसृत्य एका सङ्ख्या अपेक्षिता।) (प्रथमसत्रम् – प्रथमाविभक्तिः, द्वितीयसत्रम् – प्रथमां विहाय)

**ई) माध्यमभाषातः संस्कृतभाषया अनुवदत। (६ तः ४)** (सङ्ख्यां/समयम् अनुसृत्य एकं वाक्यम्)

**अथवा**

**मञ्जूषातः शब्दान् प्रयुज्य चित्रवर्णनं कुरुत। (४ वाक्यानि)** (शब्दमञ्जूषा आवश्यकी।) ४

**उ) अमरकोषात् समानार्थकशब्दं योजयित्वा वाक्यं पुनर्लिखत। (४ तः २)**

(एकमेव पदम् अधोरेखितं कर्तव्यम्।) २

## पञ्चमः विभागः – व्याकरणम्। (१४)

**५) अ) तालिकां पूरयत।** ६

(क) नाम-तालिकां पूरयत। (६ तः ४) (२)

(ख) सर्वनाम-तालिकां पूरयत। (६ तः ४) (२)

(ग) धातु- तालिकां पूरयत। (लकारतालिका) (६ तः ४) (२)

**आ) सूचनानुसारं कृतीः कुरुत। (५ तः ३)** ३

(क) प्रयोगपरिचयं कुरुत। (ख) पूर्वकालवाचकम् अव्ययं निष्कासयत/योजयत।

(ग) कारकपरिचयं कुरुत (घ) 'स्म' निष्कासयत/योजयत। (ङ) लकारपरिवर्तनं कुरुत।

(च) वचनपरिवर्तनं कुरुत। (छ) 'भवान्' स्थाने 'त्वम्'/'त्वम्' स्थाने 'भवान्' योजयत।

**इ) समासाः। (८ तः ६)** ३

प्रथमसत्रम्- पृथक्कुरुत। (इतरेतरद्वन्द्वः, समाहारद्वन्द्वः-८ समस्तपदानि)

द्वितीयसत्रम्- स्तम्भमेलनं कुरुत। (स्तम्भः अ-४ समस्तपदानि, ४ विग्रहाः। स्तम्भः ब-८ समासनामानि।)

**ई) वाक्यं शुद्धं कुरुत। (३ तः २)** २

(वाक्यत्रयं दातव्यम्। वाक्ये एकः एव वाक्यरचनादोषः अपेक्षितः।)

## षष्ठः विभागः – अपठितम्। (८)

**६) अ) गद्यांशं पठित्वा कृतीः कुरुत।** (अवबोधनाय ५०-६० शब्दमितः सरलः गद्यांशः दातव्यः।) ४

क) एकवाक्येन उत्तरत (२ तः १)। (१)

ख) सत्यम् असत्यं वा लिखत। (१)

ग) प्रातिपदिकं (मूलशब्दं) लिखत। (शब्दद्वयम् आवश्यकम्) (१)

घ) विभक्त्यन्तम्/अव्ययम्/क्रियापदं चिनुत लिखत च। (केवलम् १) (१)

**आ) पद्यांशं पठित्वा कृतीः कुरुत।** (अवबोधनाय सरले पद्यांशे दातव्ये।) २

क) एकवाक्येन उत्तरत। (२ तः १) (१)

ख) विशेषण-विशेष्य-सम्बन्धः/समानार्थकं/विरुद्धार्थकं शब्दं चिनुत। (केवलम् १) (१)

**इ) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** (४ रिक्तस्थानानि)। २

* * *

नवमी कक्षा कृतिपत्रिका अङ्काः (८० )

सम्पूर्ण–संस्कृतम् समयः – ३ होराः

## प्रथमः विभागः – सुगमसंस्कृतम् (५)

**१) अ) चित्रं दृष्ट्वा नामानि लिखत। (५ तः ४)** २

१)  २)    

**आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत। (३ तः २)** १

१) ६४ २) नवनवतिः ३) २३

**इ) अक्षरैः समयलेखनं कुरुत। (५ तः ४)** २

१) १२.१५ २) ७.२५ ३) ८.३० ४) २.०० ५) ४.५५

## द्वितीयः विभागः – गद्यम्। (२१)

**२) अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** ७

कस्मिंश्चित् तपोवने वरतन्तुः नाम ऋषिः आसीत्। सः अध्यापने निपुणः प्रकृत्या दयालुः च आसीत्। तस्य आश्रमे बहवः मेधाविनः बटवः आसन्। तेषु कश्चित् कौत्सः नाम बटुः आसीत्। विद्याध्ययनं समाप्य गुरुदक्षिणां दातुमुत्सुकः कौत्सः गुरुम् उपागच्छत्। सविनयं च स्वस्य इच्छां गुरवे अकथयत्। तस्य वचः श्रुत्वा गुरुः उक्तवान्, ''वत्स कौत्स, तव अध्ययनेन सेवया च भृशं प्रीतोऽस्मि। अन्यां कामपि दक्षिणां नेच्छामि। गच्छ, स्वस्ति तुभ्यम्।'' गुरुणा वरतन्तुना निवारितः अपि कौत्सः वारंवारं दक्षिणां दातुम् ऐच्छत्।

तदा तं परीक्षितुं वरतन्तुः अकथयत् – ''त्वया मम सकाशात् चतुर्दशविद्याः अधीताः। अतः चतुर्दशकोटिसुवर्णमुद्राः आनय।''

क. एकवाक्येन उत्तरत। (३ तः २) २

१) कः प्रकृत्या दयालुः आसीत् ? २) कौत्सः कम् उपागच्छत् ?

३) अयं गद्यांशः कस्मात् पाठात् उद्धृतः ?

ख. उचितं कारणं चित्वा वाक्यं पुनर्लिखत। १

वरतन्तुः सन्तुष्टः यतः ________।

१) कौत्सः तपोवनात् निर्गतः। २) कौत्सेन सम्यक् अध्ययनं कृतम्।

ग. सन्धिविग्रहं कुरुत। १

१) दातुमुत्सुकः = ________ + उत्सुकः। २) प्रीतोऽस्मि = ________ + अस्मि।

घ. सूचनानुसारं कृतीः कुरुत। (४ तः ३) ३

१) गद्यांशात् तृतीयाविभक्त्यन्तपदं चित्वा लिखत। (केवलम् १)

२) लकारं लिखत। – आनय

३) गद्यांशात् विशेषणं चित्वा लिखत। ________ बटवः।

४) गद्यांशात् विरुद्धार्थकशब्दं चिनुत। आरभ्य × ________।

**आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** ७

'एषा रणरङ्गात् यावत् न निवार्यते तावत् जयः सर्वथा न प्राप्यते' इति चिन्तयित्वा शत्रुसैनिकाः युगपत् आक्रम्य ताम् अवरुद्धवन्तः। शत्रुसैनिकाः ते असङ्ख्याः आसन्, विश्पला तु एकाकिनी ! तथापि तस्याः मनसि न भीतिलेशः अपि आसीत्। प्रत्युत द्विगुणितेन उत्साहेन युद्धं कृतवती। युद्धसमये शत्रुसैनिकाः तस्याः एकं पादं कर्तितवन्तः। अनन्तरम् 'इतः परम् एतस्याः कारणात् पीडा न भविष्यति' इति निर्णयं कृत्वा ते शिबिरं प्रतिगतवन्तः।

यद्यपि विश्पलायाः पादः भग्नः तथापि सा हतोत्साहा न जाता। चैतन्यमूर्तिः सा वीराङ्गना एव आसीत्। 'श्वः मया युद्धं करणीयम् एव' इति निश्चित्य सा पादं पुनः प्राप्तुम् ऐच्छत्। अतः सा निश्चलतया उपविश्य अश्विनीकुमारयोः ध्यानं कृतवती। तस्याः भक्तेः कारणात् अश्विनीकुमारौ लोहयुक्तं पादं योजयित्वा तां यथापूर्वं कृतवन्तौ। एतस्मात् विश्पला यथापूर्वं चलितुं युद्धं कर्तुं च समर्था जाता।

क) एकवाक्येन उत्तरत। (३ तः २) २

१. विश्पला कयोः ध्यानं कृतवती ? २. युद्धसमये शत्रुसैनिकाः किं कृतवन्तः ?

३. अश्विनीकुमारौ विश्पलां यथापूर्वं कथं कृतवन्तौ ?

ख) वाक्यं पुनर्लिखित्वा सत्यम् असत्यं वा इति लिखत। १

शत्रुसैनिकाः युगपत् आक्रम्य खेलराजम् अवरुद्धवन्तः।

ग) सन्धिविग्रहं कुरुत। यद्यपि = ______ + ______ १

घ) सूचनानुसारं कृतीः कुरुत। (४ तः ३) ३

१. प्रश्ननिर्माणं कुरुत। - विश्पला युद्धं कर्तुं समर्था जाता।

२. गद्यांशतः समानार्थकशब्दं चित्वा लिखत। - अगणिताः = ______।

३. गद्यांशतः पूर्वकालवाचक-ल्यबन्त-अव्ययं चित्वा लिखत। (केवलम् १)

४. शब्दस्य वर्णविग्रहं कुरुत। - आक्रम्य

**इ) गद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत।** ५

अनुशासनप्रियस्य वेलणकरमहोदयस्य सङ्गीतमपि प्रियः विषयः। सः व्हायोलिनवादने तथा तबलावादनेऽपि अतीव निपुणः। अतः एव सः 'गीतगीर्वाणम्' इति सङ्गीतविषयकं शास्त्रीयग्रन्थं संस्कृतेन रचितवान्। कथाः, गीतानि, बालगीतानि, नृत्यनाट्यम् इति बहुविधाः रचनाः तेन कृताः तथापि नाट्यलेखनं तस्य अभिमतः साहित्यप्रकारः। लेखनं, दिग्दर्शनं, नाट्यनिर्मितिः, व्यवस्थापनं, सङ्गीतसंयोजनम् इति सर्वमेव कर्तुं सः समर्थः अतः ''सबकुछ श्रीभिः'' इति तस्य नाटकानां ख्यातिः आसीत्।

**ई) माध्यमभाषया उत्तरं लिखत। (२ तः १)** २

१. माता तनयायाः विचारपरिवर्तनं कथं करोति ? २. नचिकेताः यमपुरं किमर्थम् अगच्छत् ?

## तृतीयः विभागः - पद्यम्। (१६)

**३) अ) पद्यांशौ पठित्वा कृतीः कुरुत।**

दुःखे दुःखाधिकान् पश्येत् सुखे पश्येत् सुखाधिकान्।
आत्मानं शोकहर्षाभ्यां शत्रुभ्यामिव नार्पयेत्।।१।।
प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमजना न परित्यजन्ति।।२।।

क) एकवाक्येन उत्तरत। (३ तः २) २

१. के प्रारब्धं कार्यं न परित्यजन्ति ? २. दुःखे कान् पश्येत् ?

३. आत्मानं काभ्याम् न अर्पयेत् ?

ख) सूचनानुसारं कृती कुरुत। (३ तः २) २

१ विरुद्धार्थकशब्दं लिखत। – शोकः × ________।

२. प्रश्ननिर्माणं कुरुत।

विघ्नभयेन नीचैः कार्यं न प्रारभ्यते।


२. मञ्जूषातः उचितं पर्यायं चित्वा स्तम्भपूरणं कुरुत।

| नीचाः | मध्यमाः | उत्तमाः |
|---|---|---|
| कार्यम् | | कार्यम् |
| | | |

(न परित्यज्यन्ति, कार्यात्, न प्रारभन्ते, विरमन्ति)

आ) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत। २

१. स्थानभ्रष्टा न शोभन्ते दन्ता केशा नखा नराः।
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत्।।




इ) पद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत। (२ तः १) २

१. श्रोतुं कर्णौ वक्तुमास्यं सुहास्यं घ्रातुं, घ्राणं पादयुग्मं, विहर्तुम्।
द्रष्टुं नेत्रे हस्तयुग्मं च दातुं ध्यातुं चित्तं येन सृष्टं स पातु।।

२. प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः। किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति।।

ई) रिक्तस्थानानि पूरयित्वा अन्वयं पुनर्लिखत। २

दृष्टिपूतं ________ न्यसेत्। ________ जलं पिबेत्। सत्यपूतां वाणीं ________। ________ समाचरेत्।

उ) श्लोकौ पूर्णौ शुद्धौ च लिखत। (३ तः २) ४

१. अकृत्वा .......।। २. गुणाः कुर्वन्ति .....।। ३. सुखार्थी चेत् .....।।

ऊ) माध्यमभाषया उत्तरं लिखत। (२ तः १) २

१. शवासनं कथं स्वास्थ्यकरं भवति ? २. केन किं जयेत् ?

## चतुर्थः विभागः – लेखनकौशलम्। (१६)

४) अ) निबन्धं पूरयत। (मञ्जूषा – भूषणम्, मधुरा, प्राचीना, देवानाम्, सामवेदः) ५

'भाषासु मुख्या ________दिव्या गीर्वाणभारती।' इति यत् कथ्यते तत् सत्यम् एव। संस्कृतभाषा अतीव ________ भाषा। ________ भाषा इति तस्याः ख्यातिः। वेदवाङ्मयं संस्कृतभाषायाः ________ एव। ऋग्वेदः, यजुर्वेदः, ________, अथर्ववेदः च इति चत्वारः वेदाः। सा अस्माकं राष्ट्रस्य भाषा।

आ) अव्ययानां / धातूनाम् उपयोगं कृत्वा वाक्यानि लिखत। (५ तः ३) ३

१. रुच् २. दा–यच्छ् ३. बहिः ४. समीपे ५. गम्–गच्छ्

इ) सङ्ख्याविशेषणानाम् उपयोगं कृत्वा वाक्यद्वयं लिखत। (३ तः २) २

(क) २ (ख) ६ (ग) ८

ई) माध्यमभाषातः संस्कृतभाषया अनुवदत। (६ तः ४) ४

१. बाई, मी फळा पुसू का? / Teacher, may I wipe the board?
२. मी उद्या पुस्तक आणतो. / Tomorrow I will bring the book.
३. बायकांनी कपडे धुतले. / Women washed clothes.
४. तुम्ही दोघे बागेत जा. / Both of you go to the garden.
५. विद्यार्थी प्रश्न विचारतात. / Students ask questions.
६. माझ्या वर्गात ४४ विद्यार्थी आहेत. / There are 44 students in my class.

अथवा

मञ्जूषातः शब्दान् प्रयुज्य चित्रवर्णनं कुरुत। (४ वाक्यानि)



(मञ्जूषा – मयूरः, सिंहः, नृत्यन्ति, गर्जति, नौका, जलप्रपातः, पक्वटान्, जनाः, वर्षासमयस्य, मण्डूकः)

उ) अमरकोषात् समानार्थकशब्दं योजयित्वा वाक्यं पुनर्लिखत। (४ तः २) २

१. मुनिः यज्ञं करोतु। २. नृपः सेवकम् आदिशत्। ३. राघवः गायने निपुणः। ४. देवः मनुष्यान् रक्षति।

## पञ्चमः विभागः – व्याकरणम्। (१४)

प्र. ५ अ) तालिकां पूरयत। ६

(क) नाम-तालिकां पूरयत। (६ तः ४)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| भानुना | | | तृतीया |
| | | मातृभ्यः | पञ्चमी |
| | कव्योः | | सप्तमी |

(ख) सर्वनाम-तालिकां पूरयत। (६ तः ४)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| | | अस्माभिः | तृतीया |
| भवते | | | चतुर्थी |
| | इमौ | | प्रथमा |

(ग) धातु- तालिकां पूरयत। (६ तः ४)

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष |
|---|---|---|---|
| पठेत् | | | प्रथमः |
| | नृत्यतम् | | मध्यमः |
| | | अलभामहि | उत्तमः |

**आ) सूचनानुसारं कृती: कुरुत। (५ तः ३)** ३

१. सुधा गीतं गायेत्। (प्रयोगपरिचयं कुरुत।) २. त्वं पश्य। ('भवान्' उपयोजयत।)

३. स्वसार: इच्छन्तु। (एकवचने परिवर्तयत।) ४. पशव: अरण्ये अचरन्। (लट्लकारे परिवर्तयत।)

५. अहं गृहं गत्वा पुस्तकं पठामि। (त्वान्त-अव्ययं निष्कासयत।)

**इ) पृथक्कुरुत। (८ तः ६)** ३

| इतरेतरद्वन्द्वः | समाहारद्वन्द्वः |
|---|---|
| | |

(हरिद्राकुङ्कुमम्, मत्स्यमण्डूकौ, पत्रपुष्पाणि, तिलगुडम्, वृक्षलता:, दुग्धशर्करम्, स्कन्दगणेशौ, मूषकमार्जारम्।)

**ई) वाक्यं शुद्धं कुरुत। (३ तः २)** २

१. वयं सर्वे मिलित्वा नृत्याव। २.सा शूर: बालिका अस्ति। ३. पुण्यपत्तनात् रङ्गोत्सव: सम्पद्यते।

## षष्ठः विभागः – अपठितम्।(८)

**६) अ) गद्यांशं पठित्वा कृती: कुरुत।** ४

अथैकदा नरेन्द्र: बालमित्रै: सह क्रीडति स्म गृहस्य चन्द्रशालायाम्। ते श्रीशङ्करस्य पूजाम् अकुर्वन्। अनन्तरं सर्वै: शिवध्यानं कर्तव्यम् इति निश्चितम्। नरेन्द्र: सुचिरं ध्यानमग्न: अभवत्। इतरे बालका: इतस्तत: अचरन् प्रसादम् अभक्षयन् च। अत्रान्तरे पृथुल: भुजङ्ग: नरेन्द्रस्य पुरत: असर्पत्। फणाम् उद्धृत्य स दोलायते स्म। तद्दृष्ट्वा भीतभीता: ते बालका: भुवनेश्वरीदेवीं धावित्वा सकलं वृत्तान्तम् अकथयन्। भयक्रान्ता सा सेवकै: सह चन्द्रशालां प्राविशत्। ध्यानस्थं नरेन्द्रं दोलायमानं भुजङ्गं च अपश्यत्। तत्क्षणं स नाग: बिले अपासर्पत्। तदा भुवनेश्वरीदेवी नरेन्द्रं हस्तेन अस्पृशत्। नेत्रे उन्मील्य नरेन्द्र: जननीं प्राणमत्। ''न भीत: किं त्वं नागदर्शनात्?' इति सा तम् अपृच्छत्। 'न मया दृष्ट: नाग:। अहं तु परमानन्दे मग्न: आसम्।' इति उक्तवान् नरेन्द्र:।

क) एकवाक्येन उत्तरत। (२ तः १) १

१. बालमित्राणि कस्य पूजाम् कुर्वन्? २. नरेन्द्रस्य पुरत: क: असर्पत्?

ख) सत्यम् असत्यं वा लिखत। १

भुजङ्गं दृष्ट्वा नरेन्द्र: भयभीत:।

ग) प्रातिपदिकं (मूलशब्दं) लिखत। १

१. चन्द्रशालाम् – ..... २. सर्वै: – ........

घ) गद्यांशात् केऽपि २ अव्यये चित्वा लिखत। १

**आ) पद्यांशं पठित्वा कृती: कुरुत। (अवबोधनाय सरले पद्यांशे दातव्ये।)** ४

दिनान्ते च पिबेत् दुग्धं निशान्ते च पिबेत् जलम्।
भोजनान्ते पिबेत् तक्रं किं वैद्यस्य प्रयोजनम्॥

क) एकवाक्येन उत्तरत। (२ तः १) १


१. निशान्ते किं पिबेत्? २. तक्रं कदा पिबेत्?

ख) समानार्थकं शब्दं चिनुत। १

१. तोयम् – ..... २. क्षीरम् – ......

**इ) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** २

वन्दे सरस्वतीं देवीं वीणापुस्तकधारिणीम्।
पद्मासनां शुभ्रवस्त्रां कलाविद्याप्रदायिनीम्॥



महाराष्ट्रराज्य–पाठ्यपुस्तक–निर्मितिः तथा
अभ्यासक्रम–संशोधन–मण्डलम्, पुणे–४

संस्कृत आमोद इयत्ता नववी (संपूर्ण) ₹ ५८.००

